UNIVERSAL
LIBRARY

OU_184224

UNIVERSAL
LIBRARY

OUP- 43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.534 / S2.5S   Accession No. P.G. S2393

Author सत्याषाढ.

Title श्रौतसूत्रम. सप्तमभाग. 1928.

This book should be returned on or before the date last marked below.

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

सत्याषाढविरचितं श्रौतसूत्रम् ।

महादेवशास्त्रिसंकलितप्रयोगचन्द्रिकाव्याख्यासमेतम् ।

सप्तदशाष्टादशप्रश्नात्मकः सप्तमो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० शंकरशास्त्रीमारुलकर

इत्येतैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८५०

खिस्ताब्दाः १९२८

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यमेको रूपकः पञ्चाऽऽणकाश्च (१८५)

ॐ तत्सद्ब्रह्मणे नमः ।

सत्याषाढविरचितं श्रौतसूत्रम् ।

महादेवशास्त्रिसंकलितप्रयोगचन्द्रिकाव्याख्यासमेतम् ।

अथ सप्तदशप्रश्ने प्रथमः पटलः

विनेयवृन्दाखिलसिद्धवर्ग-
लसच्चिदानन्दमयं मुनीन्द्रम् ।
नमामि सूत्रार्थविदं मुदाऽहं
हिरण्यकेश्याख्यगुरुं कृपाब्धिम् ॥
इति षोडशप्रश्ने द्वादशाहविधिर्मया ।
एकाहादिविधिस्त्वत्र प्रश्ने सप्तदशे ब्रुवे ॥

अथैकाहानां कर्मोच्यते —

सर्वक्रतूनां प्रकृतिरग्निष्टोमः ॥ १ ॥

'य एवं विद्वानग्निष्टोमेन यजते' इत्यारभ्य 'तस्मादाहुर्ज्येष्ठयज्ञ इति' (तै० सं० ७-१-१) । यस्मात्सर्वेषां देवानां मध्ये ज्येष्ठः प्रजापतिः सृष्टिसाधनत्वेनाग्र एतेनायजत तस्माज्ज्येष्ठेनेष्टत्वात् प्रथमसिद्धत्वाच्चायमग्निष्टोमो ज्येष्ठयज्ञः [illegible] इति मूलप्रकृतिभूत इत्यर्थः । अग्निविषयेण 'यज्ञायज्ञा वो अग्नये' इति मन्त्रेण समाप्यमानो योऽयमेकविंशस्तोमस्तेन समाप्यमानत्वादयमग्निष्टोम इत्युच्यते ॥ १ ॥

निकायिनां तु प्रथमः सर्वत्र ॥ २ ॥

निकायिनां तु प्रथमः सहस्रादयो निकायिनः । चत्वारः साहस्राश्चत्वारः साद्यस्क्राश्चत्वारो द्विरात्रा इत्येवंविधा निकायिनः ॥ २ ॥

यथादिष्टं वा ॥ ३ ॥

एकाहेष्वहीनेष्वपि प्रकृतिर्दक्षिणा ददाति । यथासमाम्नातं वा चोदकप्राप्तानामनुवादकसूत्रद्वयमिति भाष्यकारमतिः सूत्रस्यात्रोभयथाश्रुतम् ॥ ३ ॥

ज्योतिर्गौरायुरिति त्रिकद्रुकाः ॥ ४ ॥

केचिदत्र विरोधे त्वेकाहाहीनसत्राणां प्रायेण च्छन्दोगब्राह्मण आम्नातत्वम् । तस्माच्छन्दोगब्राह्मणस्य तत्सूत्रमस्यस्य तस्मिन्नाम्नातानामस्मिन्नागमनं कर्तव्यम् । यथा ऋतवे ये यजन्त इत्युक्त्वा प्रसर्पन्ति. इत्यापस्तम्बेनोक्तम । तस्य स्वरूपं नोक्तम् । तच्छन्दोगसूत्रकारेणोक्तम । छन्दोगसूत्रे यदाम्नातमेकाहादिविषयं तत्सर्वं प्रायेण सूत्रकारेणोक्तमनुक्तानि यानि तानि सत्याख्यातव्यास्याम । एवं बह्वृचशाखाया अप्यागमनं कर्तव्यम । च्छन्दोग उपहव्यो नामैकाहोऽनेककामार्थतयाऽऽम्नातः । तत्र सूत्रकारेण भगवताऽऽस्य स्वर्गकामस्येति तत्र सर्वेषा कामानामुपसंहारः कर्तव्यः । दक्षिणा दीक्षोपसदश्चाध्वर्युशाखाया एवोपसंहर्तव्येति भगवता कपर्दिनोक्तम् ।

सत्राणा मध्य ऊहमप्यनुक्त छन्दोगबह्वृचेभ्य आगमयितव्यामिति । एकाहेष्वनिरुक्त-वेदिर्वा विकल्पेन भवितव्यम । पक्षिभ्यामित्यादौ नियत एव महाग्निः सायस्क उत्तर-वेदिर्नियता सत्राहीनेषु काठको महाग्निर्वा ॥ ४ ॥

प्रथमोऽग्निष्टोम उक्थ्यो वा ॥ ५ ॥

अग्निष्टोमस्य तु प्राथम्यम ' तस्मादाहुर्ज्येष्ठयज्ञः ' इति वाक्येनोक्तम । तत्प्राथम्यव-त्प्राथम्यमुक्थ्यस्यापि वैकल्पिकमस्ति ॥ ५ ॥

सर्वे ॥ ६ ॥

अग्निष्टोमादय इत्यर्थः ॥ ६ ॥

ज्योतिषि सहस्रं ददातीति ॥ ७ ॥

विज्ञायत इति शेष. । एव भरद्वाजोऽपि ॥ ७ ॥

**ज्योतिनियमादबृहत्पृष्ठो गौर्भ्रातृव्यवतः ।
आयुः स्वर्गकामस्य । अग्निष्टोमः सभ्रातृव्य-
वतः । विश्वजिदग्निष्टोमः सर्वस्तोमः सर्व-
पृष्ठ्यः श्रैष्ठ्यकामस्य । सहस्रं दक्षिणाः ।
सर्ववेदसं वा यावतीर्वा ऋतोः स्तोत्रियाः ॥ ८ ॥**

अथ सर्वस्तोमेन यजेत (तै० सं० ७—१—३) इति वचनात्स्तोमसमन्वितेष्टिविधि-र्ज्ञेयः । अग्निष्टोमे चत्वार एव स्तोमास्त्रिवृदादयः । अतिरात्रे तु त्रिणवत्रयस्त्रिंशावपि स्तोमौ विद्येते । तस्मादयं सर्वस्तोम. ।

एकाहेषु सहस्रदक्षिणायुक्तेषु नाचिकेत. । अथोच्यते संस्थापृष्ठ्यदक्षिणा आगूर्वा-त्ययेऽनुद्रुत्यमानामेवं विधिषु निर्दिश्यते यत्र पृष्ठ्यविकल्प. । यत्र यत्र पृष्ठ्यस्यैकनियतिः, यत्र संस्थाविकल्पस्तत्रैकस्या संस्थाया , यत्र दक्षिणाविकल्पस्तत्रान्यतरस्य नियतिः । यत्र त्रयाणा समुच्चयेन नियतिस्तत्र त्रयाणा समुच्चयेन विकल्पः । यत्र त्रयाणामन्य-

तमस्य नियतिस्तत्र त्रयाणामन्यतमस्य विकल्पः । यत्र द्वयोर्विकल्पस्तत्र द्वयोरन्यतरस्यैवं संकल्पः । ज्योतिषा त्रिकद्रुकेण साग्निचित्येनाग्निष्टोमेन यक्ष्ये स्वर्गार्थम् । ज्योतिषा त्रिकद्रुकेणोक्थ्येनेति वा । केचिदेकाहेषु सर्वत्र पृष्ठ्यसंस्था दक्षिणाश्च सर्वेत्रेच्छन्ति ।

अथ वैकल्पिके च तदैव ज्योतिषा त्रिकद्रुकेण साग्निचित्येनाग्निष्टोमेन रथंतरसाम्ना द्वादशशतदक्षिणेन यक्ष्ये । स्वर्गार्थमिति वा । ज्योतिषा त्रिकद्रुकेण साग्निचित्येनोक्थ्येन बृहत्साम्ना सहस्रदक्षिणेन यक्ष्ये । केचिद्गायत्रीत्रिकद्रुकेण यक्ष्य इति । सर्वमुक्थ्यवत् । कश्चिन्नाहीन इत्युक्ते नाहीनस्त्रिकद्रुको गौरिति त्रिशत्रयस्त्रैधातवीया च । साग्निको नाचिकेतो वा ।

अथ सर्वस्तोमोऽग्निष्टोमवदग्नानुक्थ्यवतः । आयुरित्यत्राऽऽमयाविनस्तासामनुक्रमेण तस्य कर्माऽऽयुषा त्रिकद्रुकेणोक्थ्येन रथंतरसाम्ना सहस्रदक्षिणेन यक्ष्ये स्वर्गार्थमायुषा त्रिकद्रुकेणाग्निष्टोमेन यक्ष्ये सर्ववेदसेन वा । कश्चिन्नाहीन इत्युक्ते नाहीनो विश्वजित् सर्वपृष्ठ इति प्रतिवचनम् ॥ ८ ॥

सर्ववेदसे ज्येष्ठं पुत्रमपभज्य संविदो विपर्याचेत ॥ ९ ॥

सर्ववेदसे ज्येष्ठपुत्रस्य विभागं कृत्वा दानं सहस्रादधिकम् । सर्ववेदसं समाप्य पुनः पुनः पुत्रं याचेतसो (नो) (चन्नो) विद्याद्वाऽन्यद्भमेः पुरुषेभ्यश्च ॥ ९ ॥

दक्षिणाकाले सर्वस्वं ददाति ॥ १० ॥

दक्षिणाकाले प्राप्ते सहस्रं ददाति, सर्ववेदसं वोभयत्राश्वतरीदानम् । 'सर्ववेदसे वा सहस्रे वाऽवक्लृप्त.' (तै० सं० ७–१–१) इति वचनाद्यावतीर्वास्तोस्त्रियास्तावतीर्दक्षिणा विश्वजितः ॥ १० ॥

यदन्यद्ब्राह्मणानां दिक्षु वित्ताद्भूमेः सेनाभ्यश्च ॥ ११ ॥

गतः ॥ ११ ॥

उत्तमां दक्षिणां नीत्वोदवसाय वा दक्षिणे-
नौदुम्बरीं प्राङ्निषद्य ब्रूयाद्यन्मेऽद ऋणं
यददस्तत्सर्वं ददामीति ॥ १२ ॥

यदुक्थ्यो विश्वजिच्छाखान्तरवचनात्तदाऽपि त्रयोऽतिग्राह्या गृह्यन्ते । विश्वजिति सर्वपृष्ठे ग्रहीतव्याः (तै० सं० ७–१–१)इति वचनादुत्तमां दक्षिणा नीत्वोदवसाय दक्षिणेनौदुम्बरीं प्राङ्निषद्य जुहुयाद्यन्मेऽद इति ॥ १२ ॥

उदवसाय रोहिणीं वत्सच्छवीः सकर्णपुच्छाः
सखुराः सखुरीकामवाच्यतां परिधत्त । उष्णीषे-
ण शिरो वेष्टयत आदत्त औदुम्बरं चमसम् ।

औदुम्बरीं चाभ्रिम् । खादिरीं वैणवीं वा । कल्माषीं सुषिरामसुषिरां वोभयतःक्ष्णु । ताम-न्यतःक्ष्णु । तां वा मूलभक्षो वा फलभक्षो वाऽरण्ये तिस्र उदुम्बरे वसतः । खनित्रेण जीवतो मूलं परिखायौदुम्बरे पात्रेऽवधायान्योन्यमग्या-दयतो मृन्मयेन पिबतो निषादे तिस्रो वैश्ये तिस्रो राजन्ये तिस्रो ब्राह्मण इत्येकेषाम् ॥ (ख० १) ॥ १३ ॥

उद्वमानीयां कृत्वा रोहिणीं वत्सच्छवीमिति पूर्वमेवोक्तम् ॥ १३ ॥

संवत्सरं द्वादशाहं वा न याचेन्न दीयमानं प्रत्याचक्षीत ॥ १४ ॥

संवत्सरं द्वादशाहं वा विकल्पः ॥ १४ ॥

इन्द्रस्याभिजिदग्निष्टोमोऽनभिजितस्याभिजित्यै । उभे बृहद्रथंतरे भवतः । परोक्षपृष्ठं वा ॥ १५ ॥

इन्द्रस्याभिजिदग्निष्टोम इन्द्रेण दृष्ट इन्द्रस्याभिजिदग्निष्टोमेनोभयसाम्ना सहस्रदक्षिणेन यक्ष्ये । अनभिजितस्य स्वर्गस्याभिजयार्थं स्वर्गलोकप्राप्त्यर्थमित्यर्थः । एतच्च साग्निकोऽ-नग्निको वा । केचिदिन्द्रस्याभिजिता यक्ष्य इति । कश्चिदहीन इत्युक्ते नाहीन इन्द्रस्या-भिजित् । त्रिशतत्रय त्र(अशतत्रयोऽ)श्वतरश्चोभयत्र त्रेधातवीया च ॥ १५ ॥

बृहत्तु होतुः पशवश्चैकादशिनः यूपः ॥ १६ ॥

यूपच्छेदनकाल एक एव यूपः । अग्निकोऽप्युपशयश्च न पात्नीवतः । अग्नीषोमीय-काले द्वाभ्यां रशनाभ्यां यूपे परिव्ययणमाश्विनं गृहीत्वा विस्रस्य त्रिवृद्भ्यां परिवीय । एकयूप एकादशिनीनाम् । उपाकरणमाग्नेयादिवारुणपर्यन्तानामुपशयं नियाय कृष्णमृ-गस्ते पशुरिति निर्देशः ॥ १६ ॥

सहस्रदक्षिणा वराणां वा द्वादशशतम् ॥ १७ ॥

दक्षिणाकाले सहस्रं ददाति । अश्वतरं च । समाप्य त्रेधातवीया साग्निश्चेत् सौत्रामणी मैत्रावरुणी च नाचिकेतो वेति भाष्यकृत् ॥ १७ ॥

सर्वजिताऽग्निष्टोमेन सर्वपृष्ठेन सर्वमाप्नोति सर्वं जयति ॥ १८ ॥

प्रातरग्निहोत्रं हुत्वा सर्वजिताऽग्निष्टोमेन साग्निचित्येन महाव्रतपृष्ठेन सहस्रदक्षिणेन यक्ष्ये, सर्वावाप्त्यर्थमिति संकल्पः । पञ्चयुत्तरपञ्चशतेन दक्षिणेन. इति वा सर्वजयो विफलमन्नादनमार्थ्य॰ सर्वपापक्षयो विफलपाप्मानं तरति । 'सर्वं पाप्मानं तरतीति च्छन्दोगब्राह्मणवचनात्' सर्वपापविमुक्तिः । कश्चिदहीन इत्युक्ते नाहीनः सर्वजित् ।

सहस्रपक्षेऽशत्रयोऽग्निश्च नियतो नाचिकेतो वेति । केचिदग्निवद्दौपवसथ्यान्तं महारात्रे बुद्ध्वेत्यादि सर्वं महाव्रतवत् । नात्र त्रयस्त्रिंशदतिग्राह्याः किंतु प्राकृता एव त्रयः । न तु प्राजापत्यः पशुः । आग्नेयश्छाग एव तस्य प्रचरणमित्यादि सर्वं पूर्ववत्, याजनं प्रति मैत्रावरुणो च ॥ १८ ॥

अन्नादश्च भवति ॥ १९ ॥

पूर्ववत्फलनिर्देशः ॥ १९ ॥

तस्य महाव्रतं पृष्ठ्यमवर्थं शस्यते ॥ २० ॥

तस्य सर्वपृष्ठस्य महाव्रतं पृष्ठ्यमवर्थं शस्यते प्रशंसतीत्यर्थः ॥ २० ॥

सहस्रं दक्षिणा । विंशतिर्वाऽष्टाविंशती-
नाम् ॥ २१ ॥

सहस्रदक्षिणेन पष्ठ्युत्तरशतपञ्चशतेन वा ॥ २१ ॥

चत्वारः साहस्राः ॥ २२ ॥

चत्वारः सहस्रदक्षिणा निकायिनः ॥ २२ ॥

ज्योतिरग्निष्टोमो रथंतरसामा । सहस्राणां प्रथमः । प्राणेष्वन्नाद्ये च प्रतितिष्ठति । गौरुक्थ्यो बृहत्सामा द्वितीयः । पशुषु प्रतितिष्ठति । सर्वज्योतिरग्निष्टोम उभयसामा तृतीयः । सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै । त्रिरात्रसंमितोऽग्निष्टोमो रथंतरबृहत्सामोभयसामा वा चतुर्थः । त्रिरात्रस्य फलमवाप्नोति । २३ ॥

ज्योतिरग्निष्टोमो रथंतरसामा प्रथमः प्राणेष्वन्नाद्ये च प्रतितिष्ठ त्रिषु (प्रतितिष्ठतीति) सर्वमायुरेतीत्यर्थः । सहस्रैर्ज्योतिषोऽह्न साम्नाऽग्निष्टोमेन (साम्ना) सहस्रदक्षिणेन यक्ष्ये । सर्वमायुष्यमवाप्नवानीति संकल्पः । केचित्सहस्रैर्यक्ष्य इति संकल्प्य सर्वमग्निष्टोमवत् । कश्चिन्नाहीन इत्युक्तः नाहीनः साहस्रो ज्योतिरिति । अंशत्रयः सहस्रदक्षिणा अन्तरश्चामस्य चैवानवीया । गौरुक्थ्यो बृहत्सामा द्वितीयः । पशुषु प्रतितिष्ठतीति । सहस्रैर्यक्ष्ये पशुमान्स्यामिति नामधेयप्राप्ताना गोधर्माणामविरोधेन निकायधर्माः । नामधेयाद्बृहत्पृष्ठनिकायादग्निष्टोमः । शेषं पूर्ववत् । सर्वज्योतिरग्निष्टोमस्तृतीयः । सहस्रेण सर्वज्योतिषा यक्ष्ये । सर्वलोकजयार्थम् । शेषं पूर्ववत् ।

उभयपृष्ठस्त्रिरात्रधर्मतोऽग्निष्टोमश्चतुर्थस्त्रिरात्रस्य फलमवाप्नोति गर्गत्रिरात्रस्य यत्फलं तदवाप्नोति । प्रजापतिं भूमानामित्यादि वसुरुद्रानिति वा सहस्रेण त्रिरात्रसंमितेन

यक्ष्ये । उक्तानामन्यतरकामानां सर्वमग्निष्टोमवत्। एतेष्वग्न्युत्तरवेद्योर्विकल्पः । ताण्डिनां चत्वारः साहस्रा ज्योतिरग्निष्टोमः प्रथमः सर्वज्योतिर्द्वितीयोऽग्निष्टोमो विश्वज्योतिरुक्थ्यस्तृतीय उभयसामाऽतिरात्रसंमित एव चतुर्थः ॥ २३ ॥

चत्वारः साद्यस्क्राः ॥ २४ ॥

चत्वारः साद्यस्क्रा निकायिनो दीक्षाप्रभृति सद्यः क्रियन्त इति साद्यस्क्राः ॥ २४ ॥

तेषां विशेषः ॥ २५ ॥

तेषां प्रथमस्य कर्मोच्यते ॥ २५ ॥

रथंतरसामा बृहत्सामोभयसामा वा प्रथमः । तस्मिन्कामाः सोमाहारे प्राधान्ये स्पर्धायां भ्रातृव्यवतस्तितीर्षा ॥ (ख० २) ॥ स्वर्गः पशवो वा ॥ २६ ॥

वसन्ते त्रयोदश्यां प्रातरग्निहोत्रं हुत्वा साद्यस्क्रेण यक्ष्ये स्वर्गं लोकमवाप्नवानीति पशुमान्स्यामिति वा । विद्युदसि चतुरग्ने सोमप्रवाकान्वृणीते । वर्गचतुष्टयस्य वरणार्थमृत्विजो नानादिक्ष्ववस्थिता भवन्ति । एकः सोमप्रवाकोऽश्वचतुष्टययुक्तं रथमारुह्य तथैव द्रुतिं कृत्वा तथैवोत्तरतस्त्रिक्रोशं गच्छति । एकोऽश्वद्वययुक्तं रथमारुह्य प्रतीचीं दिशं प्रति क्रोशमात्रमेक एकाश्वयुक्तं रथमारुह्य तथैव द्रुतिं कृत्वा दक्षिणां दिशं प्रति क्रोशं गच्छति । तस्मिंस्तस्मिन्नवस्थिता ऋत्विजो भवन्ति । प्राच्यां दिश्यध्वर्युरुत्तरस्यां ब्रह्मा पश्चाद्धोता दक्षिणत उद्गाता एवं गत्वा पूर्वस्यां दिश्यध्वर्युः पृच्छति । आङ्गिरसो भ्रातृव्यो यजमानस्य तं प्रति सोमप्रवाकमाह यज्ञशर्मणस्तृतीयेऽहनि सोमो भविष्यति कच्चिन्नाहीन इति पृष्टे नाहीनः साद्यस्क्र इति महाव्रतमेवोच्च इति जापितवन्तं रथेऽवस्थाप्य यजमानगृहं गच्छति सोमप्रवाकोऽध्वर्युः—पन्था नामासी (सि) देवो देवमेत्विति च रथस्थ एव यजमानगृहं गत्वा पितरो भू., एव ब्रह्माणमानयति उत्तरतः पश्चाद्धोतारं दक्षिणत उद्गातारम् । होत्रोद्गात्रो. स्वस्वसूत्रोक्तप्रश्नप्रतिवचनमिति भाष्यकृत् ।

तानृत्विजो वृणीते होतृप्रभृतीन् । अथ मधुपर्कः सक्षेदं नान्दीश्राद्धं विधाय सक्षेदान्तं प्रकृतिवत् ॥ २६ ॥

पूर्वेद्युराग्नेयः सौम्यो बार्हस्पत्यश्च पशवः ॥ २७ ॥

पशुबन्धेन यक्ष्ये । उदवसाय न विद्युत्पड्ढोता पश्चिष्टचादौ शाखाहरणादिवेदिमानकाले आदित्यं मघा (त्ना) मीतिवत् । तत्र मध्ये दक्षिणतो यूपस्थानमिति यद्वदिह वेदिमानम् । तस्मात्दूद्गातुः हगुन्नृद्धिमानदण्डस्य दशपदोत्तरवेदिरिति केचित् । अपरे तु शम्यामात्रामिति । यूपच्छेदनकाले यूपत्रयस्य (यूपत्रीन्) च्छेदनमुपशयस्य च भार-

यत्याहवनीयं व्याघारयत्युत्तरवेदिं यथाप्राप्तानुवादो द्व्यहकालः पशुरिति न्यायः । न सद्यस्कालः । अतः परं धारयत्याहवनीयमित्यादि ।

श्वोभूते व्याघारणप्रभृति तस्मिन्नहनि प्रोक्षणान्तं कृत्वा विरमेत् । सर्पिष्मदशनं जायापत्योरावश्यकमिति भाष्यकृत् । रात्रौ शयनकाले हिरण्यं मुखे न्यस्य (निधाय) प्रियाया (भार्याया) वोरू (रौ) शेते ब्रह्मचारी भूत्वा यजमानः । उपधानस्थानमूरुं कृत्वा रात्रौ न मैथुनादि । ब्रह्मचारिवचनात् ।

श्वोभूतेऽग्निप्रणयनादि आज्यानि सादयित्वा युनज्मि तिस्र इति केचित् । एता असदन्निति यूपत्रयस्योच्छ्रयणं, पशुभिरित्यादि । केचिदाग्नेयं कृष्णग्रीवमुपाकरोति । श्वेतपृष्ठं बार्हस्पत्यमुपाकरोति । एकादशिनीवदिति । अग्नये त्वा जुष्टं० सोमाय त्वा जुष्टं० बृहस्पतये त्वा जुष्टं० उपशयनीयानामावृन्निर्देशः सर्वमेकादशिनीवत् वपाहोमान्तं कृत्वा शेषं पूर्ववत् । केचिद्धाता रातिरिति नव समिष्टयजूंषि जुहोतीति । ब्राह्मणतर्पणान्तोऽयं पशुरिति भाष्यकृत् ॥ २७ ॥

तदलाभ एतासां देवतानामानुपूर्व्येणाऽऽग्नेयोऽष्टाकपालश्चरू चेतरौ ॥ २८ ॥

अथवा—एतासां देवतानामष्टाकपालः प्रथमः पुरोडाशः, इतरौ चरू । एवमिष्टिर्वा पशुर्वा भवतीति भरद्वाजवैखानसावाहतुः ॥ २८ ॥

धारयत्याहवनीयम् ॥ २९ ॥

पाशुकवदत्रापि द्रष्टव्यम् ॥ २९ ॥

व्याघारयत्युत्तरवेदिम् ॥ ३० ॥

आघारो यज्ञस्य शिरःस्थानीयः । प्राधान्यात् प्राथम्याद्वा । गतमन्यत् ॥ ३० ॥

सर्पिष्मदशनम् ॥ ३१ ॥

दंपत्योः ॥ ३१ ॥

हिरण्यं मुखेऽन्वास्यान्तरो प्रियायै भार्यायै ब्रह्मचारी शेते ॥ ३२ ॥

व्याख्यातम् ॥ ३२ ॥

इष्ट्या यक्ष्ये । ऋत्विजः समारूढा भवन्ति ॥ ३३ ॥

एवमिष्टिकर्म पशुकर्म वा समाप्याग्नीन्समारोप्य देवयजनम् ॥ ३३ ॥

ताञ्निधाय श्वोभूते सर्वदिशोऽश्वरथा सक्षीरदृतयः सोमप्रवाका विधावन्ति ॥ ३४ ॥ तेभ्यो

यन्नवनीतमुदीयात्तदाज्येऽवनयेत् ॥ ३५ ॥ यो जने चतुर्युजा प्राच्यां दिशि युग्यक्रोशान्सर्गेणतराम्‌ प्रसव्यं रश्मिर्णां ततः परिक्रमयेदश्वतर्या रथो वैकप्रदक्षिणं योजनार्दानि वा क्रोशान्यश्वरथेन प्रदक्षिणम् ॥ ३६ ॥

व्याख्यातमिदम् ॥ ३४ ॥ ३५ ॥ ३६ ॥

व्याख्यात उत्सर्गः ॥ ३७ ॥

एवं देवयजनं गत्वाऽभ्यवसायाग्निहोत्रहोमं हुत्वा महारात्रे वुद्‌ वा प्रातरग्निहोत्रं जुहोतीति च्छन्दोगवचनात् । हुत्वाऽऽज्यं पशव इत्यादि रात्रावेव संभारयजुः । अथ सोमपरिवेषणाद्यथ समहोता. उदित आदित्ये पुन प्रणीय स्व दक्ष इत्युपस्थाय दीक्षणीयाद्यभिधानान्तम । अत्र व्रतलोप । व्रत कृणुतेति वाग्विसर्ग एवाग्निर्ज्योतिष्मत इति प्रकृतिवत्र जागरण. न पुषा सन्वेति केचित्कुर्वन्ति । एष्टी स्थल्यन्त कृत्वाऽह तदस्मि० आजुह्वान इत्यादि व्याख्यातम ॥ ३ ॥

त्रिवत्सः साण्डः सोमक्रयणः ॥ ३८ ॥

प्रायणीयया प्रचर्य सोमक्रयण' । त्रिवत्स. साण्ड. सोमक्रयण. । तत्र सोमक्रयप्रकाशकाना मन्त्राणामूहो मीमासकैरभिहित । केचिदूहन तस्या आत्मा तस्या रूपमिति तत्र दशकतय एव क्रतुपरत्वेन विधानादेव द्रष्टव्या। अन्ये त्वेवं मत्वा सोम तत आतिथ्यप्रचारे न तु वृत्त कालाभावात् । तानूनप्त्रादि । न तु प्रवर्ग्यः काललोपात् । केचिदिच्छन्ति । या त अग्न इत्यादि मार्जनान्तम् ॥ ३८ ॥

उपसत्सु त्रिः संसाल्येन ॥ ३९ ॥

उपसद कर्मोपसत् प्रवर्तमानासु त्रि. समस्येत् । एकासामुपसत्समसंसाल्येनेन त्रिरात्रसक्तिः ॥ ३९ ॥

संसाल्य वा प्रचरेत् ॥ ४० ॥

अपि वा · · · · · · · · · · . । पौर्वाह्णिकीना लोप एव । पौर्वाह्णिक्या प्रचर्य संसाल्य वेदिमानम् ॥ ४० ॥

यवोवरा वेदिः ॥ ४१ ॥

भवतीति शेषः । यवभूमिः सस्यायति(स्यमुना) वेदिर्भवति तां यवभूमिं विमैत्वेति मिनोति इमा नरा. कृणुतेति न भवति । पश्चादिषु खननार्थस्य वेदं कृत्वा स्तम्बयजुरादि क्रियते । खनि प्रत्ययवेदय वमनस्त्वा० अपारम्मेत्यस्य लोपः । इमा नरा इति च लुप्यते । देवस्य सवितु., चतु.शिखण्डा तस्या सुपर्णाविति भवति ॥ ४१ ॥

यवानां खलु उत्तरवेदिः ॥ ४२ ॥

यवखलु उत्तरवेदिस्थाने स्यात्तदनुमार्गेण वेदि । तत्खले वित्तायनी मेऽसीत्यादि क्रियते । एवं चात्वालदेशेऽस्याश्यानादि लुप्यते । ध्रुवोऽसि० देवेभ्यः कल्पस्वेत्यादि सर्वं भवति । न तु स्नाभिनिवपनम् । चतु शिखण्डा । इन्द्रघोषस्त्वा० इत्यादि प्रच्छादनान्तम् । न त्वत्र व्रतप्रदानम् । सर्वत्र माध्यन्दिने तदानीमेवाऽपराह्णिक्या प्रचर्याप्रचर्य वा पौर्वाह्णिकया. अ. त्वः सुजागृहीत्यादिर्लोप । अग्निं ज्योतिष्मत इत्यादेश्च पौर्वाह्णिकया प्रचर्य तदानीमेवाऽपराह्णिकया प्रचर्याप्रचर्य वाऽग्निप्रणयनं व्याघारणादि क्रियते उत्तरवेदे पारिग्रहश्च भवति । अग्निवत्युत्तर परिग्राहम् ॥ ४२ ॥

आरोहणे हविर्धाने ॥ ४३ ॥

आरोहणे हविर्धाने देशगमनार्थे शकट इत्यर्थ । हविर्धानप्रवर्तनाद्याग्नीध्रमण्डपसंमार्जन प्रकृतिवद्बोध्यम ॥ ४३ ॥

विमितः सदः ॥ ४४ ॥

परिमितं सदो व्याख्यातम् । पूर्वमेव कृत भवति सद इति भरद्वाजः ॥ ४४ ॥

स्फ्यो यूपः स्फ्याग्रः खल्वेवाली ति वा ॥ ४५ ॥

स्फ्यो यूपो भवति । स्पष्टमन्यत् । केचिदौदुम्बर्यादिर्लोप एन्द्रमसीति संमिताभिमर्शनमौदुम्बर्यादिहोमश्च लुप्यते । केचित्तत्स्थाने स्फ्यणुमित्यन्ति ॥ ४५ ॥

अग्नीषोमीयकालेऽग्नीषोमीयमेकादशकपालं निर्वपति । ईजानस्य गृहाद्वसतीवरीर्गृह्णाति ॥ ४६ ॥

अग्नीषोमीयपशुकालेऽग्नीषोमीयेष्टिरेव । प्रस्तरादिहरण तत्वानिष्ठ्याया बर्हिः परिस्तरणादि कर्मणे वा । यज्ञपात्रसादनादि प्रचरणी स्रुच पञ्चमीं प्रयुनक्त्येकादशकपालानि स्फ्यश्च द्वन्द्वं (कृष्णाजिनादिपट्टसर्वाण्यष्टकादीनि) पवित्रकरण यजमान वाचं यच्छ संविशन्ता वाग्यत पात्राणि० वानस्पत्याऽसीत्यादि । अग्नीषोमाभ्यां जुष्टमित्यादि । सं ब्रह्मणः पृच्यस्वेत्येवमन्तं कृत्वा वेदिकरणादि । प्रोक्षणीरासादयेत्याज्यस्य ग्रहणकाले प्रचरणमादिन इत्यादि गृहीत्वा प्रेतु ब्रह्मणस्पत्नीत्यादि तत्वजमनुनयन्ति तथेध्माबर्हिषोः प्रोक्षणादि आज्यान्यभिमन्त्र्य यूपमानं सामिधेनीभ्य इत्यादि । अग्नीषोमीयेन पुरोडाशेन प्रचर्य पिता पुत्रीयार्य संप्रष्यति । तमाहृयाग(ये)जानस्य गृहाद्बहुयाजिनो गृहादित्यर्थः । तस्माच्च वसतीवरीर्गृह्णाति । अपरेण शान्मरीायमुपसादयित्वा स्विष्टकृदादिसिद्धमिष्टिः संतिष्ठते ।

संस्थितायां वा वसतीवरी परिहृत्य संप्रष्यति । या यजमानस्येत्यादि पञ्चदोहार्थे शाखाद्याहरणमातिथ्याया बर्हिस्तृणमिष्यन्तः मति । तान्परिश्रीत्पाशुक इध्म उपसन्नह्य-

त्येवं परिस्तरणान्तम् । सवनीयवत्तदानीमेवाग्नेये नयेत्यादिसौमिकं कर्म । पशुपात्रसादनकाले त्रिवृः पशुरशना द्वे यूपरशने । तथैव वपाश्रपण्यादयः । आश्विनं गृहीत्वा यूपं संमार्जनकाले खलेवाली यूपो भवति । यूप स्थाने पूर्वमेव निहितो भवति । तदनुसारेण यूपकल्पनादि वृक्षनियमतक्षणच्छेदनाष्टाश्री(श्री)करणश्रयणसंमार्जनादयो निवर्तन्ते । अपरः संस्कारश्च निवर्तते । स्फ्याकृतिर्वा लेङ्गले(लाङ्गली)षाकृतिर्वा । खलेवाली लोकप्रसिद्धैव । आश्विनग्रहणोत्तरकाले .... । यजमानो येन यूपान्कालेनानक्ति काल्होऽपि स चषालो दृतमित्यर्थः । दृतं चषालभाग इति च्छन्दोगवचनात् । अद्भुतमैन्द्रमसीत्यनक्ति सुपिप्पलेति प्रतिमुञ्चति । देवस्य त्वेति लुप्यते । रशनादेशे संमृशति । खलेवाल्यै परिव्ययमाणायानुब्रूहीत्यादि । द्वाभ्या परिव्ययणं न स्वरुगूहनं, येन केनचिद्यज्ञियकाष्ठेनोपवेषवत् ॥ ४६ ॥

सवनीयकाले सह पशूनालभते ॥ ४७ ॥

अत्र सवनीयकाले सह पशूनालभते प्रथममाग्नेय सवनीयमुपाकरोति स्थानात्॥४७॥

अग्नीषोमीयं सवनीयमनूबन्ध्यां च ॥ ४८ ॥

अग्नीषोमीयानूबन्ध्ययोः प्रतिनिधिर्वक्ष्यते । न च सवनीयस्येति वाच्यम् ॥ ४८ ॥

अग्नीषोमीयस्य स्थानेऽग्नीषोमीय एकादशकपालोऽनूबन्ध्यायाः स्थाने मैत्रावरुण्याऽऽमिक्षया यजेत ॥ ४९ ॥

गतः ॥ ४९ ॥

सदश्वः श्वेतो दक्षिणा ॥ ५० ॥

बाह्लीकजातः सैन्धवोऽश्व इत्यर्थः । रुक्मप्रतिमु(यु)क्त दद्यादित्यापस्तम्बः ॥ ५० ॥

तमाङ्गिरसाय भ्रातृव्याय वा दद्यात् ॥ ५१ ॥

तमश्वमाङ्गिरसायाध्वर्यवे शत्रवे वा दानं वचनात् ॥ ५१ ॥

द्वेष्यं वा ब्राह्मणं कृत्वा तस्मा अश्वं श्वेतं रुक्मप्रतियुक्तं दद्यात् ॥ ५२ ॥

क्रु(क्र)तोरारम्भात्पूर्वमेव भ्रातृव्यः पश्चान्मित्रभूतः । एवं भूताय भ्रातृव्यायाध्वर्यव आङ्गिरसाय दद्यात् । अश्वं दक्षिणाऽपनीय इतरेषां केचिदुद्गातुरेव दीयत इति च्छन्दोगवचनात् । सुत्येऽहनि समाप्ते क्रतौ प्रतिपूरुषमितरेषां प्रतिपुरुषमेका गोर्दीयते छन्दोगवचनात् । सुत्येऽहनि ऋत्विग्भ्यः कश्चिद्दद्यादित्येवमश्वदानं कृत्वा विषाणप्रासनं सर्वमग्नि-(ग्नी)षोमवत् । प्रागस्तमयादवभृथः । अनूबन्ध्यायाः स्थाने मैत्रावरुण्याऽऽमिक्षया, उदवसानीयान्तं, अस्य क्रतोराङ्गिरसोऽध्वर्युर्भवति ॥ ५२ ॥

संवत्सरं नोपर्युपविशेत् । न मांसमश्नीयात् ।
न स्त्रियं नावपद्येत । न पादाववनेनिजीत
नाञ्जीत नाभ्यञ्जीत । सा दीक्षा । यदि संव-
त्सरं नोदाशंसीत । द्वादशाहम् ॥ (ख०४) ॥ ५३ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने प्रथमः पटलः ॥

संवत्सरं द्वादशाहं वा पादावनेजनादि व्रतम् ॥ तत्र श्लोकः—

एकाहेष्विति यत्सूत्रं प्राप्तस्याप्यनुवादकम् ।
केचिद्विधायकं ब्रूयुरानर्थक्यभयात्तम: ॥
बृहत्पृष्ठे कृतावेवं सहस्रं तत्र दक्षिणाः ।
इयं तस्य विद्यमानत्वात्सहस्रेणैव शिक्षति ॥
अग्निरुत्तरवेदिश्च विकल्पेन विधीयते ।
ज्योतिस्त्रिकद्रुकस्त्वाद्या गौस्त्रिकद्रुक एव च ॥
आयुस्त्रिकद्रुकस्त्वायुर्वाक्यानामद्वयं भवेत् ।
एकाहेषु च साद्यस्के नाग्निः पश्चोऽग्निर्भिन्ना ॥
एकाहेषु सहस्रेषु नाचिकेतस्तु वा भवेत् ।
नियतं केचिदिच्छन्ति सहस्रेऽश्वतरः स्मृतः ॥
त्रैधातवीयया ऽऽदौ स्यादन्ते चैव ततः परम् ।
दक्षिणापृष्ठसंस्थाननिर्देशे नियमो न हि ॥
एषु त्रैधातवीया हि सर्वपृष्ठस्तु विश्वजित् ।
अत्रावश्यतरं प्रोक्तं दीयते सकलं धनम् ॥
ज्येष्ठस्य च विभज्यैवं दत्त्वा धावेत्सुतं पुनः ।
उत्तमां दक्षिणां नीत्वा यन्मेदस्तु जपेत्ततः ॥
संस्थाप्य रोहिणीमादि शेषमुत्तरतः परम् ।
इन्द्रस्याभिजिता यज्ञे सहस्रं तत्र दीयते ॥
एकयूपे ह्यनग्नौ च तथैकादशिनाः स्मृताः ।
उत्तरं सर्वजित्कर्म पापस्याद (पापानाम) पनोदकम् ॥
चयनं नियतं प्रोक्तं व्रतं वत्सरमेव च ॥ ९३ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने प्रथमः पटलः ।

=====

अथ सप्तदशप्रश्ने द्वितीयः पटलः ।

द्वितीयस्यैकविंशतिमग्निष्टोमसाम कृत्वाऽऽमया-
विनं याजयेदेतेनान्नाद्यकामं प्रजाकामं पशु-
कामं वा ॥ १ ॥

एतेनोत्तरे व्याख्याताः—द्वितीयस्य कर्म साद्यस्क्रेण यद्यपि विरोगामस्त्यर्थमामया-व्यन्नादिकामी पशुकामी वा । एतेन यजेत । शेषं पूर्ववत् । पञ्चदशमग्निष्टोमसाम कृत्वा (२२-४-२) इत्यापस्तम्बः । पञ्चदशस्तोममग्निष्टोमसाम । छन्दोगानामेकविंशमग्निष्टोमसाम द्वितीयस्य कर्म ॥ १ ॥

तिसृभिस्तिसृभिरावर्तेत ॥ २ ॥

ऋग्भिरित्यर्थः ॥ २ ॥

तृतीयस्य चतुर्थस्याष्टादशावुत्तरौ पवमानौ वा ॥ ३ ॥

हीनानुजावरोऽनुक्रिया । तस्याष्टादशावुत्तरौ पवमानौ चेत्यापस्तम्बः ॥ ३ ॥

परोक्षपृष्ठो वा चतुरष्टादशः । पञ्चमो होतुराज्य-
मष्टादशावुत्तरौ पवमानौ । होतुः पृष्ठं परिक्री-
श्चतुर्विंशबहिष्पवमानः स्वर्गकामा भवन्ति ॥ ४ ॥

छन्दोब्राह्मणमतात् ॥ ४ ॥

हीनानुजावरोऽनुक्रिया । तस्य चतुर्विंशावुत्तरौ
पवमानौ ॥ ५ ॥

हीनानुजावरोऽधिकारी । आनुजावरो व्याख्यातः । स एव हीनः दुःखभीर्दारिद्र्या-दिभीर्वा न मन्त्रिरिति कर्म नाम । श्वः सुत्येति च । तस्य कर्म साद्यस्क्रेणानुक्रियया श्वः सुत्या यक्ष्ये । आदित्यानवाप्नवानीति सङ्कल्पः सर्वं प्रथमवत् ॥ ५ ॥

अश्वसादः सोमप्रवाकः ॥ ६ ॥

एक एवाश्वारोहः । न रथारोहः ॥ ६ ॥

दधिद्रुतिश्च त्रिक्रोशेऽन्ततः प्राह ॥ ७ ॥

क्षीरद्रुतिस्थाने दधिद्रुतिर्भवति । त्रिक्रोशेऽन्ततो गव्यूत्यन्तेन इत्यर्थः ॥ ७ ॥

स्त्रीगौः सोमक्रयणी ॥ ८ ॥

योजने प्रथमं तत्राऽऽङ्गिरसमध्वर्युमथ क्रोशे दक्षिणतो ब्राह्मणाच्छ द्विक्रोशे पश्चिमे भारद्वाजं होतारमत्रोत्तरतास्त्रिक्रोशेऽन्तत उद्गातारमेव सोमप्रवाके तत्र तत्र गत्वा वरण

कुर्यात् । काचित्साहीन इत्युक्ते नाहीन. माध्यन्दिनोऽनुक्रीतश्वः. श्वः सुत्येत्यश्वारूढा ऋत्विज आग्नेयाद्यादिष्टिर्वा पशुर्वा पूर्ववत् ॥

शयनं चाशयनं च तथैव दीक्षणीयादि प्रायणीयान्तं विधाय विराम: । श्वोभूते सोमक्रयप्रभृत्युद्वसानीयान्त छन्दोगवचनात्तस्य क्रयप्रभृत्युत्तराहः स्यादिति वचनात्त्रि-(स्त्री) गौ. समक्रयणी प्रकृतिवत् ॥ ८ ॥

प्रश्णुताग्रो यूपः ॥ ९ ॥

श्लक्ष्णुताग्रो यूपो भवति ॥ ९ ॥

संमीलनं वेदिर्हविर्धानेऽग्नीषोमीयो वसतीवरीर्दक्षिणा च ॥१०॥

व्रीहिर्वरा वेदि । व्रीहिणा स्थल उत्तरवेदि ॥ १० ॥

प्रथमेन समानं चात्र द्रव्यस्य वरणम् ॥ ११ ॥

गतः ॥ ११ ॥

यद्यत्स्वाराज्येन सद्यः स्वाराज्यं गच्छति ॥ १२ ॥

यद्यत्स्वाराज्येन च्युम इत्यर्थः ॥ १२ ॥

अप्नगग्निष्टोमेन सर्वमन्नाद्यमवरुन्धे ॥ १३ ॥

अन्न ददातीति स्वन्नाद्य प्रतिवघ्नातीत्यर्थः ॥ १३ ॥

प्रजापतेरेकत्रिकोऽग्निष्टोमः । प्रजापतिमाप्नोति ॥ १४ ॥

तेन प्रजापतिस्वाराज्यमाप्नोति ॥ १४ ॥

भ्रातृव्यस्मायामनुक्रियो पश्वालम्भो भेजनः हि-रण्यान्वसनः शय्यावनयनम् । प्रथमेन समा-नः सदः ॥ १५ ॥

गतः ॥ १५ ॥

सोमप्रवाको दधिद्र(द्र)निश्च ॥ १६ ॥

व्याख्यातः ॥ १६ ॥

अत्राश्विपदं परं मध्ये क्रोश ऋत्विजो निरतिता-भवन्ति ॥ १७ ॥

ऋत्विजोऽध्वर्य्वादयः ॥ १७ ॥

त एनं प्रातरुपसमेत्य प्रजापतिर्गोधूमोर्वेश ।वेदि-र्गोधूमानां खल उत्तरवेदिरारोहणे हविर्धाने विमितः सदः । स्फ्यो यूपः स्या(स्फ्या)ग्रः

१ म. °ध्ये क्रोश ।

खलेवाली वा । वडवा श्वेता दक्षिणा । ब्रह्मणे देया । यथा प्रकृतीतरेभ्यः परिक्रिया चतुर्विंशतिस्तोमीयेण भ्रातृव्याय प्रोच्य यजेत । विश्वजिच्छिल्पेन सर्वस्तोमेन सर्वान्कामानवाप्नोति ॥ १८ ॥

मुख्यं षोडशिमन्तं कृत्वा पुनश्च क्रम एवमग्निष्टोममिन्द्रस्तुतं विश्वजित्सर्वपृष्ठोऽतिरात्रो दशमाहविकारः पूर्ववन्मानादि । तैत्तिरीयाणा क्लृप्तिः । तृतीयच्छन्दो[नु]क्रमाच्छन्दोवतां दशरात्रेण यक्ष्ये पुरुषं पशुमोजो विश्रामी(न्द्रानी:)ति फलनिर्देशः । अहर्विशेषः—अभ्यासङ्ग्यः षडन्तः । यत्र च्छन्दोमातिरात्रस्तत्रापि मानसम् । अभ्यासङ्ग्य इति कोऽर्थः । तृतीयसवनषट्त्रिंशस्तोत्राणां समुदायः । अथैतेषामभ्यासग्यः पञ्चाहश्चत्वारः छन्दोमा अतिरात्रपृष्ठ्यमहरतिरात्रो वि(विधी)यते । उभयपक्षे चतुर्थं षोडशी, चत्वारश्छन्दोमा इति । अपि वाऽन्येन सहातिरात्र छन्दोमाना चतुर्थस्य नामातिदेशान्मानसप्राप्तिरतिरात्रस्य स्थानात्प्राप्तिः । एवं सत्युभयत्र केचित्कुर्वन्ति । अतिरात्र एवोभयपक्षेऽग्निषोमीयपशुक्लृप्तिश्च पूर्ववत् ।

कौसुरुबिन्दश्चतुर्थः—कौसुरुबिन्दुनातिरात्रेण यक्ष्ये । बहवो मृगादिपूर्ववत् । अहर्योगविशेषः—वृत्तोऽग्निष्टोमः पार्ष्ठिकस्य पूर्वत्र्यहविकारः, त्रयः पञ्चदश उक्थ्याः । उत्तरत्र्यहविकारास्त्रयः सप्तदश उक्थ्याः । छन्दोमानामविरामः । एकविंशोऽतिरात्रः । अत्रापि मानसमतीका पशुक्लृप्तिश्च पूर्ववत्पयस्यान्तम् ।

पौण्डरीक एकादशरात्रोऽयुतदक्षिणाऽत्र कर्म द्वादशाहवत् । शिशिर एकाष्टकाया पौण्डरीकेण यक्ष्ये सर्वामृद्धिमवाप्नवानीति । अथवा परमेष्ठिना गच्छामीति । अथवा—स्वर्गार्थमिति । महाग्निः काठको वौपवसथ्यान्तं द्वादशाहवत् । अग्नीषोमीये रात्रौ वसतीवरीः परिहृत्य पयसा विशसनं कृत्वाऽभ्यासङ्ग्यः षडहस्याऽऽरम्भः । अभ्यासङ्ग्यः षडहश्चतुष्टो[illegible]श्छन्दोमानामिति वाक्यधर्माः केचित्स(षड)हान्तः । मध्वशनादि । अथ चतुष्टोमच्छन्दोमाना पृथग्विकारोऽन्वहं सहस्राणि ददाति । अश्वसहस्रमुत्तमेऽन्वहं शतमाना अत्र गावः । अथ ग्रहः—ऐन्द्रवायवाग्रः शुक्राग्र आग्रयणाग्र एव त्रिरावृत्तिर्भवत्यहः दशम ऐन्द्रवायवाग्र इत्यादि ।

अथ कापेयानामन्वह एकैकेन व्यत्यासेनाग्नो यूपः प्राकृत एव । चषालो यूपे भवति । व्रीहुत्तरा वेदिः व्रीहीणा स्वल उक्ता (त्तरा)वेदिः । भारद्वाजो होता भवतीत्यापस्तम्बः । अस्मिन्क्रताविति शेषः । शेष पूर्ववत् ॥

विश्वजिच्छिल्पश्चतुर्थं । तस्य कर्म—साद्यस्केन विश्वजिच्छिल्पेन यक्ष्ये । सर्वस्याऽऽसाद्यस्य प्रस्तुतप्रसवः गच्छेयमिति नामधेयाद्विश्वजिति विशेषेण निकायिना धर्माः । सर्वं प्रथमवत् । ऋत्विग्वरणाद्यं नार्हीना विश्वजिच्छिल्प साद्यस्कः पश्च(शव)श्च । तथैवोदित आदित्ये ... मुत्या च च्छन्दोगवचनात् । अथ वा त्र्यहसाद्यो(स्यो) वा दीक्षाप्रभृतिप्रायणीयान्त प्रथमाह ... सवनीयपशिस्तरणान्त द्वितीय सौम्यमुत्तमे च वि ... सर्ववेदसदक्षिणा विश्वजिच्छिल्प इति । शिल्पयुक्त इत्यर्थः । ... इत्येके । तत उदवसानीयान्त विधाय गार्हिणी वत्समित्यादि । ततः पादावनेजनादिसाद्यस्कधर्मा भवन्तीत्यर्थः ॥ १८ ॥

श्येनेनाभिचरन्यजेत ॥ १९ ॥

श्येनादिशब्दास्तेषु गुणविधिरुत कर्मनामधेय वेति संशयः । अत्यन्तनिरूढत्वाद्गुणविधिर्ज्योतिष्टोमादिषु काम्यत्वाच्च नित्यमुत्पत्तिशिष्टमपि सोम बाधते । यद्वा गुणविशिष्टकर्मविधानमपि ... मत्वर्थलक्षणा सोमादिवत् । नच यथा वै श्येनो निपत्येत्यादिवाक्यशेषप्रदर्शितक्रियासामान्येन कर्मणि गौणत्वेन कर्मवचनत्व युक्तम् । अत्यन्तविप्रकृष्टार्थत्वाद्गौणत्वस्य ... वक्ष्यति । तद्वरं लक्षणैवाऽऽश्रिता । गौणत्वे चात्यन्तार्थान्तरपरत्वाच्छ्रुतिबाधः । लक्षणायां तु तद्वत्यपि वर्तमान श्येनशब्दो लोहितार्णीपादिद्रव्यसंजनार्थश्येनविधिपर एव करणीभूतेन तु यागेन करणीभूतस्य ... मत्वर्थलक्षणा लभ्यत इत्येकवाक्यत्वार्थं लक्षणाश्रयणम् । तात्पर्यं तु श्रुत्यर्थं एवेति न श्रुतिबाधः । उच्यते—गुणविधौ तावत्स एव स्तोतव्यः । तस्य चाऽऽत्मनैवोपमानमनुपपन्नमिति तद्व्यपदेशात्मकवाक्यशेषानुपपत्ति । विशिष्टविधिस्तु गौरवादेवायुक्तः । न च सोमादिवत्पदान्तरस्यानन्यगतित्वं यथा वै श्येन इति वाक्यशेषानुसाराद्गौणत्वेन नामत्वसंभवात् । अवश्यं हि वाक्यशेषस्येदमेव प्रयोजनम्—कथ नाम श्येनशब्दस्य ... विज्ञायेतेति । तस्मान्नामधेयम् (जै० सू० १-४-५) ।

तस्य कर्म श्येनेन यक्ष्ये । शत्रुमरणार्थमिति संकल्पः । ऋत्विग्वरणकाले व्रात्यपुत्राञ्छत्रशास्त्रकुशलाननूचानांस्त्वा ऋत्विजो वृणीते । व्रति(वासा)नवनीतमाज्यप्रतिनिधिः । सर्वेषामङ्गानामाज्यस्थानीया वासाया दुग्धम् । अभिवाता ज्याधिगता इति च्छन्दोगवचनात् द्वादशी दीक्षा भवति ॥ १९ ॥

रथौ हविर्धाने ॥ २० ॥

भवत इति शेषः ॥ २० ॥

तैल्वको बाधको वा स्फ्याग्रो यूपः ॥ २१ ॥

चषालस्थाने विघ्नेत ॥ २१ ॥

शावनभ्ये अधिषवणफलके भवतः ॥ २२ ॥

चोदनाद्भवतः ॥ २२ ॥

अग्नये रुद्रवते लोहितः पशुः ॥ २३ ॥

लोहितवर्णः पशुः ॥ २३ ॥

सादयन्त्युपांश्वन्तर्यामौ ॥ २४ ॥

हविर्धाने इति शेषः ॥ २४ ॥

शरमयं बर्हिः ॥ २५ ॥

भवतीति शेषः । यत्र यत्र बर्हिर्भवति तत्र तत्र औद्भव प्रस्तर इत्यापस्तम्बः ॥२५॥

वैभीदक इध्मः ॥ २६ ॥

वैभीतक इध्मः सर्वत्र । बाणवन्त परिधय इत्यापस्तम्बः ॥ २६ ॥

लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति ॥ २७ ॥

छन्दोगवचनात्प्रधानधर्मो हिरण्यमालात्वं यजमानस्य लोहितोष्णीषादिर्नियमः । यागकाले निवीताः कण्ठालम्बितयज्ञोपवीता ऋत्विजः प्रचरेयुः ॥ २७ ॥

नवनवदक्षिणाः काणा खण्डाः कूटाः ॥ २८ ॥

खण्डा काणा इत्यापस्तम्बीये विशेषः ॥ २८ ॥

तां दक्षिणाकाले कण्टकैर्वितुदेयुः ॥ २९ ॥

तां लोहितोष्णीषादिकाम् । वितुदेयुः पीडयेयुरुद्गाता लोहितोष्णीषादिभिर्वितुदेयुः समाख्यानात् । अत्रापस्तम्बीये विशेषः—'इच्छन्हन्येनेति कण्वरथन्तरं पवमाने कुर्याद्बृहत्पृष्ठम् । जीयेतन्येनेति विपरीतम् । परा परावतं गच्छेन्न प्रतितिष्ठेदिति पूर्ववत्स्तुतं च ब्रह्मसाम कुर्यात् । प्रजापतेरेकत्रिकोऽग्निष्टोमः सर्वस्य पाप्मनो निर्दिश्य गच्छति । चतुर्विंशतिं गा दक्षिणा ददाति' (आप० श्रौ० २२ ४–२९) इति । यदीच्छन्हन्येनेति तथा रथंतरपवमाने माध्यंदिने बृहत्पृष्ठो भवत्येतद्वा विपरीतमाम्नोः सर्वज्यानि जीयेतेति श्येन आरभ्यश्चेत्तदानीं विपरीतं बृहत्पवमाने रथंतरपृष्ठ इति सर्वज्यानिपक्षे परा परावतं गच्छेद्यत्र तत्रापि न प्रतितिष्ठेदिति श्येन आरब्धस्तदा पूर्ववत्समानविधि , रथंतरपवमाने (वा) बृहत्पृष्ठ इति तदा स्तुतं ब्रह्मसाम कुर्यात् । इतरयोस्तु पक्षयोः स्तुतं आहव वरमाणं सर्वज्यानिश्च । यत्र कुत्रचित्प्रतिष्ठानिवृत्तिश्च श्येनफलं शापमुक्तं साद्यस्क्रो वा श्येन एकत्रिकस्ता. पद्साद्यस्क्रा इति शौचि(?) वक्षति(वक्ष्यति)

इति च्छन्दोगवचनात्। आपस्य साद्यस्क इति शबरस्वामिना व्याख्यातं जैमिनीयतृतीयाध्याये। तदा प्रथममाद्यस्कवच्छ्लो च्छ्ये निभमांश्च वर्तन्ते। प्रजापतेरेकत्रिकोऽग्निष्टोमो भवति। तस्य कर्म—प्रजापतेरेकत्रिकेण यक्ष्ये। सर्वपापक्षयार्थमिति सकल्प.। शेषं सर्वमग्निष्टोमवत्॥ २९॥

अथो वाचस्तोमास्तेषां द्वावग्निष्टोमौ। सर्वस्तोमोऽतिरात्र उत्तमः। तस्मिन्सर्वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि प्रयुज्येरन्॥ ३०॥

साग्निकोऽनग्निको वा भ्रूणहत्यापनोदकं सर्वपापापनोदकमेतत्कर्म तृतीयो वाचस्तोमा निकायिन. पूर्वावग्निष्टोमौ सप्तरसामानौ। प्रथमस्य कर्म। वाचस्तोमेन यक्ष्ये। सर्वभूतानामाधिपत्यार्थमिति। तस्याग्निष्टोमवत्कल्प। नाहीनो वाचस्तोमस्तत्र विशेष.—तस्मिन्निति। सर्वा ऋच सर्वाणि सामानि सर्वाणि यजूंषि प्रयुज्यन्ते। तत्रैव समाम्नातमेकया बहिष्पवमान सहस्रेण ज्यान्यपन नियुतमर्बुद न्यर्बुदं निखर्वक समुद्रं सलिलमन्तमिति स्तोत्राणां संख्यामुक्त्वाऽऽह—‘तस्मिन्सर्वा ऋच’ इति। ऋग्वेदविहिताः सर्वे (वा) जप्याः। यत्र यजुषा यजुर्वेदविहिताश्चान्यश्चाकरणा जपोपस्थानानुमन्त्रणाः सर्वे (वा.) समुच्चयेन प्रयोक्तव्या.। केचित्—करणा विप्रयोगा यथाभाग व्यावर्तेथाम्। पूषा वा विलं विष्यतु। देवो वा विभजतु। अर्यमा वा विभजतु इत्येवमादीनामपि चतुर्भिरग्निमादत्त। अष्टासि सभरति, इत्येवमादीना समुच्चय। साम्न्येकया प्रथमया बहिष्पवमानं दशभिर्द्वितीयया अन्तेन तृतीयया सहस्रेण चतुर्थ्येव समाम्नातश्छन्दोग.। तत्र चत्वारो वाचस्तोमा एव शसन्ते सति अनेकास्वयूनतृणीते। तथैव सामगाणा तथैवोद्गातृगणानन्तत्व.द्वसामसजुषामनन्तत्वा या।दिन ऋत्विजो भवन्ति। तथा कात्यायनेन भगवतोक्तम—‘ छन्दोगोऽश्व यावद्भिरुद्गातृगणे.’ इति। इहानन्तवेदाध्यायिनोऽभावादस्मिन्कालेऽस्मदादीना नाधिकार इति।

केचिदाहु.—ऋष्यधिकारत्वादस्मिन्कालेऽस्मदादीना नाधिकार.। मनुष्या विद्यमाना इत्यस्मिन्काले नास्त्यधिकारोऽस्ति.। तस्मात्सर्वाणि यजूंषि सर्वाणि सामानि प्रयुज्यन्त इत्यर्थवाद सहस्रप्रयोग। अनेका ऋच आवपेत्तच्छंसावापस्थाने (पु) स्तोमातिशंसनवद्यजुषस्तथा जपोपस्थानादयस्तथ सामानि पवमानेष्वावापो विद (वा)-चस्तोमवद्ये (दे)व सर्वमग्निष्टोमवत् कार्यम्। द्वितीये सामनि विशेष.—तृतीयस्य वाचस्तोमेन सर्वस्तोमेन यक्ष्ये। सर्वभूतानामाधिपत्यार्थमिति। स्वं ज्योतिष्टोमातिरात्रवदिति गुणविधिपरत्वान्न सर्वस्तोमविकार। उक्ता वाचस्तोमधर्मा। चतुर्थः सामवेदोक्तस्याप्येवं प्रयोग इति भाष्यकृत्॥ ३०॥

व्रात्यानां प्रवासो व्रात्यस्तोमाः ॥ ३१ ॥

व्याख्यास्याम इति शेषः । व्रात्य संस्कारहीन । प्रवासोऽन्यत्र द्वीपान्तरनिवास । अन्यत्र वासः प्रवास इति भाष्यकृत् ॥ ३१ ॥

त्रिवृतोऽग्निष्टोमो रथंतरसामान उक्थ्या द्विपर्ता: षोडशीः सर्वेषाम् ॥ ३२ ॥

उक्थ्या रथंतरसामानु (नो) द्वितीयो वाऽग्निष्टोमो वाक्या (व्रात्या)ना प्रवासेभ्यः पुनरागमने व्रात्यस्तोमैर्यजेतेत्यर्थ । पट्षोडश्य इति व्रात्यस्तोमविशेष । त्रीणि पवमानानि त्रीण्यच्छावाकसामान्याज्यपृष्ठयोऽन्तगतानि । त्रिपदषोडशय-वर्गस्तोमो ज्येष्ठानां व्रात्याना वयसा ज्येष्ठाना वा पुण्यकर्मभिर्वा व्रात्यस्तोम कुर्यादिति स्मृत्यन्तरात् । तत्र पञ्चदशसप्तदशैकविंशत्रि (त्रि) णवस्य (स्त) यस्त्रिंश स्तोमो भवति । चतुःषोडशी सर्वेषा व्रात्याना मीन रवौ वा यजन्ते. इति वचनम् । एते हीयन्ते, एते हीयन्ते यूयं व्रात्या प्रवसन्ति नहि ब्रह्मचर्यं चरन्ति नहि कृषिवाणिज्य गि(च) रन्ति । अदीक्षितवाच वदन्ति इति च षोडशो वा एतेषा स्तोम एषामान निहन्तुमर्हति । य एते चत्वार. षोडशा भवन्ति. तेन पाप्मनो निर्मुच्यत इति च्छन्दोगब्राह्मणम् । (अ) हीना वा. इत्यादिना य उक्तास्ते चतु षोडशिनमृषेयु । वाक्या-(व्रात्या) उपनयनादिसंस्कारहीना अप्यन्यस्य पूर्व समानगोत्राद्वा भार्यात्वेन परिगृहीतवन्तस्तेषामपि अवकीर्णिवद्(द)पतिका एतेषेयु· पृथक्पृथगाहि यज्ञोपकरणादीनि पात्रादीनि च कृत्वा प्रथमयज्ञेनेष्ट्वा व्रात्यस्तोमैर्यजेरन्निति द्राह्यायणमति । दाविष्टुताभिति व्रात्याय प्रतिपदं कुर्यादिति ज्योतिष्टोमे विहित. तस्माज्ज्योतिषष्ट्वा व्रात्यस्तोमैर्यजेरन्निति निदानकारमतिः ।व्रात्या बहव· सह त्रयस्त्रिंशदिति केचिदनियतपरिमाणा इति । बहुयजमाना अहीनभूतद्वादशाहवत्प्रयोग.— न शिशिरे दीक्षन्त इत्यादि सर्वं ज्योतिष्टोमवत् ॥३२॥

उष्णीषं प्रतोदो ज्याह्रोडो रथो विपथः फलकास्तीर्णोऽश्वोऽश्वतरश्च युग्यौ कृष्णं वासः कृष्णवलक्षे अजिने राजतो निष्कः ॥ ३३ ॥

उष्णीषं च प्रतोदश्चेत्यादयोऽप्याहाऽऽपस्तम्ब· । उष्णीष शिरसो वेष्टनवस्त्रम । प्रतोदो ज्याह्रोडः कशा । रथः प्रसिद्ध । फलकास्तीर्ण फलकाभिरेवाऽऽस्तीर्णो न कलशाभिः । केचिदधिकफलकाभिरिति । अश्वोऽश्वतरश्च युग्यौ रथान्तरवाहौ । कृष्णं वासः । कृष्णदशमित्यर्थ. । कृष्णवलक्षे अजिने आविके द्वे चर्मणी एकमेव द्वाभ्यामाविभ्यां क्रीतं भवति । तयोश्चर्मणो. पार्श्वे साहित कृष्णवलक्षे अजिने भवतः। कृष्ण-

श्वेते इत्यर्थः। राजतो निष्को रजतेन सहितो निष्को योजितो व्रात्यानामलंकरणार्थ आभरणविशेष इत्यर्थः ३३ ॥

तद्गृहपतेः ॥ ३४ ॥

गृहपतिर्यजमानः। एतत्सर्वं गृहपतेराहरेत्। एतानि द्रव्याणि गृहपतेः संभार्याणि त्रयस्त्रिंशद्गाव(तं गाश्च)गृहपतेराहरेदिति च्छन्दोगेन स्पष्टमुक्तम् ॥ ३४ ॥

वल्कान्तानि दामतूषाणीतरेषाम् ॥ ३५ ॥

इतरेषां यजमानानां वक्ष्यन्ति बल्कान्तानि दामतूषाणीतरेषामिति भावः ॥ ३५ ॥

द्वे (द्वे) दामनी द्वे (द्वे) उपानहौ ॥ ३६ ॥

स्पष्टम् ॥ ३६ ॥

द्विषंहितान्यजिनानि ॥ ३७ ॥

संहितं संधिः ॥ ३७ ॥

त्रयस्त्रिंशता त्रयस्त्रिंशता गृहपतिमुपसमायन्ति ॥ ३८ ॥

गवा त्रयस्त्रिंशच्चैवमेकैकस्य यजमानस्य, एषा व्याख्या। बल्कान्तानि दामतूषाणि वासांसीत्यर्थः। केचिद्वल्कान्तानीति आविकानि लोहित्रि(तप्रा) याणि वसनानि स्युः। रत्नकम्बलमिव वासांसीत्यर्थः। द्वे द्वे दामनी द्वे द्वे एकैकस्य देशे स्यातामेकं वस्त्रमुभयत्र दशायुक्तं भवतीत्यर्थः। एकैकस्य यजमानस्य द्वे द्वे उपानहावेकैकस्य द्विषंहितान्यजिनानि त्रीणि पूर्वाभ्यामजिनाभ्या व्याख्यातान्याविके द्वे चर्मणी। एकमेकं द्वाभ्यामाविभ्यामिति। व्याख्याता गवां त्रयस्त्रिंशच्चैकैकस्य बल्कप्रभृत्येतदन्तानि, इतरेषां यजमान(नानाम्)। (?) हतं नवेत्युपोषणं पृथक् सर्वस्यैव। दहनम्। यदि जीवेत्तदोदवमानीयान्तं करोति ॥ ३८ ॥

ता दक्षिणा भवन्ति ॥ ३९ ॥

गत. ॥ ३९ ॥

अपि वा षट्षष्टिर्गावो दक्षिणा भवन्ति ॥ ४० ॥

अथ वा षट्षष्टिर्गा दद्यादित्यापस्तम्बसूत्रम् ॥ ४० ॥

अथो खल्वाहुर्यदेवैषां संपादितं स्यात्तद्युस्तद्धि व्रात्यधनमिति विज्ञायते ॥ ४१ ॥

अथ व्रात्येभ्यो यानि निष्कान्युष्णीषप्रतोदादिवल्कान्तानि च ये व्रात्याचार्याया-त्ताः स्युस्तेभ्यो ब्रह्मबन्धवे परमागधाय वेति च्छन्दोगवचनात्। एवमुदवमानीयान्तम् ॥ ४१ ॥

**षट्षोडशी निन्दितानाम् । द्विषोडशी कनिष्ठानाम् ।
ऊर्ध्वस्तोमो ज्येष्ठानाम् । चतुष्षोडशी सर्वेषाम् ॥ ४२ ॥**

वाचः स्तोमेन यजेत । न च वमन्ते व्रात्यस्तोमः । व्रात्यस्तोमेन चतुःषोडशिना यक्ष्यामह इति संकल्पः । अकाम्यार्थः प्रायश्चित्तार्थस्तस्मान्न फलनिर्देशः । नाहीनो व्रात्यस्तोमश्चतुष्षोडशी सर्वेषां गृहपतीनां दक्षिणतो दण्डस्थानीया । तदुक्तं भाष्यकारेण कपर्दिना—इतरेषां प्राकृत एव दण्ड उष्णीषं प्रतोदो यूपः । यथा प्रतोद उष्णीषेण सह पशुनियोजनार्थो भवति । उष्णीषो रशनास्थानीयः । पशोरुपकरणेऽसमर्थत्वात्प्रतोदस्य काष्ठान्तरं समर्थं (तेन) सह मिनोति । अथवा प्रतोदाकृतिर्यूप उष्णीषेण सह सर्वेषां यजमानानां कुर्युर्द्वादशाहवत् दक्षिणाकाल एवं कुर्वन्ति । एते सर्वा (गावा)-स्त्रयस्त्रिंशदृत्विग्भ्यो दद्युरिति च्छन्दोगवचनम् ।

षट्षोडशीयेनाशंसा निन्दिता (वाक्या व्रात्या) उपेयुः । पूर्ववद्व्रात्यस्तोमेन षट्षोडशिना यक्ष्ये । शेषं पूर्ववत् । स्तोत्रे वा शेषः । द्विषोडशी कनिष्ठाः प्रथमवद्यु(दु)पेयुः । पूर्ववद्व्रात्यस्तोमेन द्विषोडशिना यक्ष्ये । शेषं पूर्ववत् । [illegible] ज्येष्ठव्रात्या उपेयुः । अथैष शमनीयानां मध्यानां स्तोमा ये ज्येष्ठा इति च्छन्दोगब्राह्मणम् । प्रजननात्ते शमनीया इति च्छन्दोगसूत्रकारवचनात् । प्रजननसामर्थ्याज्ज्येष्ठव्रात्याः व्रात्यस्तोमेनोर्ध्वस्तोमेन यक्ष्यामह इति । शेषं पूर्ववद्विधाय स्मृतिचोदितप्रायश्चित्तानि कृत्वा त्रैविद्यवृत्तिं समवतिष्ठेयुः । ऊर्ध्वमन्यैः सह भोजनादयः । तत इतरेषां याजयेच्चेतान् । वाजपेयादिभिरुपनयनं कृत्वेति च्छन्दोगवचनात् । अथ नाकसदः पञ्च निकायिनस्तेषां प्रथम आदित्यानामत्यग्निरुक्त्यामितरेऽग्निष्टोमाः द्वितीया नाकसदो मरुतां चतुर्थो नाकसत्त्रयस्त्रिंशत्सामवेदविशेष आगमयितव्यः न च्छन्दोगे विद्यते तस्मात्साम वेदान्तरं दृष्ट्वा पदार्थविज्ञानं कर्तव्यमिति भाष्यकारेणोक्तम् ॥ ४२ ॥

आदित्यानां प्रयतिरुक्थ्यो नाकसदां प्रथमः ॥ ४३ ॥ व्यावृत्तिं पाप्मना भ्रातृव्येण गच्छन्ति ॥ ४४ ॥ अग्निष्टोमा इतरे आङ्गिरसां द्वितीयः । साध्यानां तृतीयः । मरुतां चतुर्थेनौजो वीर्यमाप्नोति । त्रयस्त्रिंशः पञ्चम इत्येके । प्राजापत्यः पञ्चमः । प्रजाकामोऽभिभवो भ्रातृव्यमाभिभवति(ते) । विनुत्त्या भ्रातृव्यं विनुदते ॥(ख० ५) ॥ ४५ ॥

आदित्यानां नाकसदां प्रयतिना यक्ष्ये पापक्षयार्थमिति संकल्पः । द्वितीयस्याङ्गिरसां नाकसदां प्रयतिना यक्ष्ये. स्वर्गार्थं पापक्षयार्थमिति वा । निकायिना तृतीयस्य साध्यानां

नाकसदा (प्रयतिना) यक्ष्ये । पूर्ववत्फलम् । चतुर्थस्य मरुता नाकसदा प्रयतिना यक्ष्ये, तेजस्वी भूयास वीर्यार्थमिति वा । पञ्चमस्य नाकसदा त्रयस्त्रिंशेन प्रयतिना यक्ष्ये । प्राजापत्येन वेति स्वर्गार्थमिति । अथाभिभूरभिभुवा यक्ष्ये भ्रातृव्यमभिभवानीति । सर्वमग्निष्टोमवत् । अथ विनुदन विनुदत्वया यक्ष्ये, भ्रातृव्यविनोदनार्थमिति । शेषं पूर्ववत् ॥ ४३ ॥ ४४ ॥ ४५ ॥

चितिस्तोमः प्रजननकामः ॥ ४६ ॥

चितिस्तोमेन यक्ष्ये प्रजननार्थमिति संकल्प । सर्वमग्निष्टोमवत् ॥ ४६ ॥

गायत्रेणोक्थ्येन रथंतरसाम्ना ब्राह्मणः पुरोधाकामो यजेत । द्वौ गायत्रौ पूर्वौ ब्राह्मणस्य॥४७॥

गायत्रेण रथंतरसाम्नाऽग्निष्टोमेन ब्रह्मवर्चसकामो यजेतेत्यापस्तम्ब. । अस्मिन्कर्मणि ब्राह्मणस्यैवाधिकार । गायत्रावग्निष्टोमौ प्रथमयज्ञावित्यापस्तम्बीये विशेष: ॥ ४७ ॥

उत्तरः क्षत्रियस्य ॥ ४८ ॥

पूर्ववद्व्याख्यानम ॥ ४८ ॥

तेजो ब्रह्मवर्चसं ब्राह्मणस्य पूर्वेण क्षत्रियस्योत्तरेणाग्रमव्यथं न तु बहुपशु भवतः ॥ ४९ ॥

बृहस्पतिसवन तस्य कर्म—त्रिवृत्स्तोमकेनाग्निष्टोमेनाभयो संकल्प. । ब्राह्मणस्य ब्रह्मवर्चसं फलम् । क्षत्रियस्य राष्ट्र जनपदमुग्रमायुर्वीर्यपुरुषप्राप्त्यर्थो सविचल्यु(अविचाल्यो)भवति । राष्ट्रनिवासिनोऽपि चाल्पास्तथाऽऽयुर्धीयजनाश्च तथैव फलनिर्देश । न तु बहुपशू इव भवत इति निन्दार्थवाद ।ब्राह्मणक्षत्रिययोर्यजमानयोः कर्तव्यौ प्रथमयज्ञाविति ॥ ४९ ॥

त्रिवृताऽग्निष्टुताऽग्निष्टोमेनापूतो यजेत ॥ ५० ॥

त्रिवृ- -ऽग्निष्टु-ऽग्निष्टोमेनापूतो यजेत ब्रह्महत्यादिदोषदुष्ट सर्वपापक्षयार्थमिति । सोमप्रवाकादि सर्वमग्निष्टोमवत् ॥ ५० ॥

आग्नेय्यः पुरोरुचः । आग्नेयी सुब्रह्मण्या ।५१॥

दशाक्षय एव । केचिद्विकारेण अंशुरंशुस्ते देव सोमाऽऽप्यायतामग्नय एकधनविद आ तुभ्यमग्नि. प्यायतामा त्वमग्नेनाऽऽप्यायस्वेत्यादि ॥ ५१ ॥

आग्नेयीषु स्तुवतेऽजां हिरण्यं च दक्षिणा ॥५२॥

अग्निरजया. साम्यत्वात्प्रतिनिधित्वाच्च ॥ ५२ ॥

एतमेव चतुष्टोमं कृत्वा श्रोत्रियोऽक्षहतः स्त्रीहतः कामहतश्चरणहतो वा यजेत ॥ ५३ ॥

---

१ क. ख. चितिस्तो॰ ।

एतमेव चतुःष्टोममिति । एतमेवाग्निषु तं चतुःष्टोमं कृत्वा श्रोत्रियोऽक्षहतो ब्राह्मणो द्यूतकारः । कितव इत्यर्थः । स एतेन चतुःष्टोमेनाग्निष्टुना यजेत । सर्वं पूर्ववत् । एतेन चतुःष्टोमेन स्त्रीहतो यजेत स्त्रीषु परिक्षि(रक्षी)यासु सक्तः । सर्वं पूर्ववत् । कामहतोऽप्येतेन चतुःष्टोमेन यजेत । स्पष्टमन्यत् ॥ ५३ ॥

अश्वः श्यावो दक्षिणा ॥ ५४ ॥

गतः ॥ ५४ ॥

स ब्रह्मणे देयः ॥ ५५ ॥

सोऽश्वः ॥ ५५ ॥

यथाप्रकृतीतरेभ्यः ॥ ५६ ॥

अध्वर्य्वादिभ्यो दक्षिणा अग्निष्टोमवदिति भावः ॥ ५६ ॥

एतस्यैव वायव्यासु पञ्चदशमग्निष्टोमसाम कृत्वाऽऽमयाविनं याजयेत् । अन्नाद्यकामं प्रजाकामं पशुकामं वा॥५७॥

याजयेदित्यन्वयः सर्वत्र । एतस्यैव वायव्यास्विति कर्मान्तरोपदेशः । अग्निष्टु(ष्टुद्ध)मात्मकस्तेन मेधावी यजेत । अग्निष्टुना यक्ष्ये, निरोगमुक्त्यर्थं सर्वं पूर्ववत् । अन्नाद्यकामोऽप्येतेन यजेत । अग्निष्टुना यक्ष्ये अन्नाद्यमवाप्नवानीति । प्रजाकामः प्रजामवाप्नवानीति । पशुकामः पशूनवाप्नवानीति विशेषः ॥ ५७ ॥

(एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामम् ।) एतस्यैव शक्करीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामम् । एतमेव चतुःष्टोमं कृत्वा ग्रामकामः । (अपवर्ग्या भवन्तीत्येके ।) त्रिवृताऽग्निष्टुना ब्रह्मवर्चसकामः । पञ्चदशेनाग्निष्टुना वीर्यकामः ॥ ५८ ॥

एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत । तस्य कर्म पूर्ववत् । ब्रह्मवर्चसमवाप्नवानीति । प्रजाकामः प्रजामवाप्नवानीति भरद्वाजापस्तम्बौ । फलनिर्देशः सर्वत्र द्रष्टव्यः । एतमेव चतुःष्टोमं कृत्वा ग्रामकामो [illegible] फलनिर्देशः । एतेष्वपवर्ग्या इति केचित् । त्रिवृताऽग्निष्टुनाऽन्नाद्यकामः । पञ्चदशेनाग्निष्टुना वीर्यकामः (आप० श्रौ० २२-६-१३) इत्यापस्तम्बः ॥ ५८ ॥

सप्तदशेनाग्निष्टुनाऽग्निष्टोमेन यज्ञविभ्रष्टो यजेत । यस्मिन्वा यज्ञक्रतौ विभ्रश्येत् ॥ ५९ ॥

सप्तदशेनाग्निष्टुता यज्ञविभ्रष्टो यजेत । नैमित्तिकमेतत् । यस्मिन्कर्मणि विभ्रंशिते पुनः पुनः क्रिया । अथवा यस्मिन्क्रतौ विभ्रंशितस्तं क्रतुं पुनः कुर्यात् । अग्निष्टोमवत्कुर्यादिति भाष्यकृत् । तन्न समञ्जसम् । सूत्रार्थस्तु—यज्ञविभ्रष्टः प्रमादादालस्याद्वा चेत्पुनः संकल्पादारभ्य सर्वं कुर्यात् । छन्दोगसूत्रेऽप्येवम् ॥ ५९ ॥

त्रिवृदवाद्यं वदतः ॥ ६० ॥

अवाद्यं पैशुन्यादि राजगामि । त्रिवृदग्निष्टुत् ॥ ६० ॥

पञ्चदशोऽनिहत्यस्य निघ्नतः ॥ ६१ ॥

अनिहत्यस्य शास्त्रे योऽनिहननमर्हस्तेन यातयादित्येवमादिविशिष्टस्य पञ्चदशोऽग्निष्टुत् ॥ ६१ ॥

सप्तदशोऽनाशा(श्या)न्नस्य भोजने प्राश्यैकविंशो जनं यतो गान्धारकलिङ्गमागधान्पारस्करान्सौवीरान्वा ॥ ६२ ॥

सप्तदशेन ब्रह्महादेरन्नस्य भक्षितेन यजेत प्रायश्चित्तम् । एकविंशमान यतो गान्धारादिदेशान् गत्वैकविंशेनाग्निष्टुता यजेत । एतेन पापदेशगमननिषेधः प्रतीयते ॥ ६२ ॥

त्रिणवेनौजस्कामः ॥ ६३ ॥

यजेतेति शेषः । ओजो बलमिन्द्रियं वीर्यमिति मन्त्रवर्णाच्च । ओजस्कामस्त्रिणवेनाग्निष्टुता, नियमोऽत्र द्रष्टव्यः ॥ ६३ ॥

पञ्चदशेन वीर्यकामः । सप्तदशेन प्रजाकामः । एकविंशेन प्रतिष्ठाकामः । (त्रयस्त्रिंशेन स्वर्गकामः) ॥ ६४ ॥

गतः । त्रयस्त्रिंशोऽग्निष्टुत्स्वर्गकामस्य ॥ ६४ ॥

अपि वा ज्योतिष्टोम एव । अग्निष्टोमे सर्वान्कामान्कामयेत् ॥ (ख०९) ॥ ६५ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने द्वितीयः पटलः ।

अथवा यदग्निष्टुत्फलमाम्नातं नैमित्तिकं तत्सर्वं प्रकृते ज्योतिष्टोम एव विकारे कामयेत । तत्र ' प्रजननं ज्योतिः ' (तै० स० ७–१–१) इत्यधिकृत्य यदेतत्फलमाम्नातं ' यं कामयते तमेतेनाभ्यश्नुते ' इति तेनाभिहितं प्रकृतिविकारयोः फलं सर्वेषां पक्षे विकल्पः । सर्वेषामग्निष्टुता यक्ष्ये सर्वान्कामानवाप्नवानीति फलनिर्देशः । गत-

मन्यत् ॥ ९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोग-
चन्द्रिकायां सप्तदशप्रश्ने द्वितीयः पटलः ।

अथ सप्तदशप्रश्ने तृतीयः पटलः ।

त्रिवृताऽग्निष्टोमेनानिरुक्तेनान्नाद्यकामो यजेत ॥ १ ॥

चत्वारस्त्रिवृतोऽग्निष्टोमा रथंतरसामानः । तेषां प्रथमेनानिरुक्तेन ग्रामकामो यजेत, (आप० श्रौ० २२–७–११२) इत्यापस्तम्बः । निकायिनस्त्रिवृत्स्तोमा अग्निष्टोम-संस्था रथंतरसामान । त्रिवृता यक्ष्ये ग्रामसिद्ध्यर्थमग्निष्टुदुपहवेन यक्ष्ये, (यक्ष्यामहे) इत्यादि शेषं पूर्ववत् ॥ १ ॥

अनिरुक्तं प्रातःसवनमित्येके ॥ २ ॥

एक इति शाखान्तरोक्तं सर्वमग्निष्टोमवदित्यर्थः ॥ २ ॥

अश्वः श्वेतो दक्षिणा । स ब्रह्मणे देयः ॥ ३ ॥

व्याख्यातमेतत्सायस्के । इतरेषां किंचिद्दानमुक्तम् ॥ ३ ॥

बृहस्पतिसवो द्वितीयः ॥ ४ ॥

द्वितीयो द्वितीययज्ञः । गतमन्यत् ॥ ४ ॥

ब्राह्मणो ब्रह्मवर्चसकामः पुरोधाकामो वा यजेत।
यं वा स्थापत्यायाभिषिश्चेयुः ॥ ५ ॥

ब्राह्मणस्य यज्ञो न राजन्यवैश्ययोः । त्रिवृता बृहस्पतिसवेन यक्ष्ये, बृहस्पतिसवा-प्रवाप्ति, पुरोधार्थमिति वा सङ्कल्पः । सर्वमग्निष्टोमवत् ॥ ५ ॥

परिस्रजी होता भवति ॥ ६ ॥

परिस्रुद्वर्तीति वचनाद्धोतृवरणकाले परिस्रजी होता भवति ॥ ६ ॥

अरुणो मिर्मिरस्त्रिशुक्रः ॥ ७ ॥

अरुणो वर्णतः । अक्षिणी यः पुनः पुनरुन्मीलति स मिर्मिरः त्रिशुक्रः कर्मभिः श्रेष्ठः । मातृतः पितृतश्च स्वयमभिजनविद्यावृत्तैर्वा । एवंभूतं होतारं वृणीत इत्यर्थः॥७॥

बृहस्पते जुषस्व न इति बार्हस्पत्यमतिग्राह्यं गृह्णाति ॥ ८ ॥

अतिग्राह्यकाले प्राकृतौ द्वौ गृहीत्वा बार्हस्पत्यमतिग्राह्यं गृह्णात्याग्नेयैन्द्रसौर्याणामन्य-तमस्य विकारः । अपिवा समुच्चय एव न विकारः । अन्ते निवेशः प्राकृतान्गृहीत्वा स्थानापन्नत्वात्सौर्यविकारः । बृहस्पते जुषस्व न इत्यृचमुक्त्वोपयामगृहीतोऽसि बृह-

स्पतये भ्राजस्वते । सौर्यपक्षे तथैव—एष ते योनिरिति ॥ ८ ॥

बार्हस्पत्यः पशुरुपालम्भ्यः ॥ ९ ॥

'आग्नेयं सवनीयं पशुमुपाकृत्य बार्हस्पत्यमुपाकरोति' इति वचनाच्च । प्रजापतये त्वा जुष्टमुपाकरोमीत्यादि । प्रजानन्त इत्यादि(षु) द्विवचनेनोहः । सर्वमेकादशिनीवदेक एव यूपः । केचित्पृथगिच्छन्ति । तदापशयपान्नीवता । एकयूपपक्षे द्वे रशने इत्यादयः स्वरुद्वित्वं सर्वेदात्वेन । चोदनाभावाद्गुणगणधर्मा न प्रवर्तन्त इति केचित् ॥ ९ ॥

प्रातःसवने सन्नेषु नाराशंसेष्वेकादश दक्षिणा व्यादिशति ॥ १० ॥

प्रातःसवने सन्नेषु नाराशंसेष्वेकादश दक्षिणा गावस्तुभ्यं वो विश्ववेदा विभजत्विति विभज्य दानम् । दाक्षिणादिहोमो नयनादि च व्यादिशति ॥ १० ॥

आज्येन माध्यंदिने सवनेऽग्निमन्वारब्धं कृष्णाजिनेऽभिषिञ्चति । यथाऽग्निचित्याया शुक्रामन्थिनोर्वा संस्रावेण ॥ ११ ॥

माध्यंदिने प्रातःसवनवद्दानमात्र दक्षिणाहोम कृत्वा प्रातःसवने दक्षिणा दत्ता इह न दीयमानास्तृतीयसवने दानव्याख्यास्मिन्काले तीर्थेन नेयाः ॥ ११ ॥

अश्वद्वादश माध्यंदिने सवने ता उभयीरुपाकरोति । द्वादश तृतीयसवने ॥ १२ ॥ ता वशायामुपाकरोति ॥ १३ ॥

अश्वद्वादश माध्यंदिने ददात्येकोऽश्वोऽन्या गावस्ता उभयीरुपाकरोतीति या माध्यंदिन आग्नेयीस्तृतीयसवनार्था[स्तासा]सर्वासामुभयोः पृथक्करणमित्यर्थः । माहेन्द्रस्तोत्रं प्रत्यभिषेक आज्येन । कृष्णाजिनमास्तीर्य तस्मिन्नासीनं यजमानमभिषिञ्चति । शुक्रामन्थिनोर्वा । संस्रावेण 'बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य । धत्तं रयिꣳ स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः' इति सूत्रान्तरोक्तमन्त्रेणातिग्राह्यकाले बृहस्पते भ्राजस्विन्भ्राजस्वी त्वमित्यादि सुवच्छब्दसीत्यनुमन्त्रणम् । सौर्यपक्षे तृतीयसवने सन्नेषु नाराशंसेष्वेकादश गावः प्रदीयन्ते ॥ १२ ॥ १३ ॥

अपिवाऽष्टौ प्रातःसवन एकादश माध्यंदिने सवने द्वादश तृतीयसवने । अश्वं तृतीयशोऽनुसवनं दद्यादित्येकेषाम् । सर्वा माध्यंदिने सवन इत्येके ॥ १४ ॥

अपि वेति विकल्पः ॥ १४ ॥

मननमेतरयोः सवनयोर्न वा मनसा च न ॥ १५ ॥

अयं कल्पः शाखान्तरस्थोऽपि सत्याषाढीये दर्शनाच्च ॥ १५ ॥

त्रिवृतोऽग्निष्टोमस्येषुं विकृ(घृ)तिं कृत्वाऽभिचरन्यजेत ॥ १६ ॥

शेषं सर्वमग्निष्टोमवदिति न्यायाच्च । इषुस्तुतायोऽभिचारार्थः । इषुणा त्रु(त्रि) वृता यक्ष्ये परमरणार्थम् । श्येनवत् ॥ १६ ॥

तत्र विशेषः—

समानमितरच्छ्येनेन ॥ १७ ॥

व्यक्तम् ॥ १७ ॥

त्रिवृतोऽग्निष्टोमः ॥ १८ ॥

'अश्वः श्यावो दक्षिणा । स ब्रह्मणे देय.' (आप० श्रौ० २२–७–१९) इत्यादि पूर्ववत् ॥ १८ ॥

शुनस्कर्णस्तोमः । सर्वस्वारः ॥ १९ ॥

चतुर्थः सर्वस्वार इत्यापस्तम्बः । सर्वस्वार उत्तरे वयस्यधिकारः । साद्यस्कादीनि कर्माणि कृत्वा जातपुत्रवानस्मिन्कर्मण्यधिक्रियते । त्रिवृताऽग्निष्टोमेन शुनस्कर्णस्तोमेन सर्वस्वारेण यक्ष्य इत्यादि । शेष पूर्ववत् ॥ १९ ॥

मरणकामो यजेत यः कामयेतानामयतां स्वर्गं लोकमियामिति विज्ञायते ॥ २० ॥

त्रिवृता शुनस्कर्णस्तोमेन सर्वस्वारेण यक्ष्ये । स्वर्गलोकमवाप्नवानीति संकल्पः । [illegible] । दीक्षाप्रभृति यजमानस्याऽऽर्भवकाले मरणं यथा संभविष्यति तथा यत्नः कर्तव्यः । छन्दोगवचनात् । [illegible] । न व्रताद्दीक्षि । अन्नमन्नमेव मासापवर्गदीक्षा. । आरभ्य यान्भक्षान् गर्तेऽवनयेत् । सूक्तवाक आयुरादिलोपो मरणका- मार्थत्वाच्च ॥ २० ॥

याम्यः पशुः शुक्लहरित उपालम्भ्यः ॥ २१ ॥

पशुकाल आग्नेयं सवनीयं पशुमुपाकृत्य यमदेवत्यं पशुं शुक्लवर्णमालभते । यमाय त्वा जुष्टमुपाकरोमीत्येवं निगमो भवति ॥ २१ ॥

कृताश्वं दक्षिणा ॥ २२ ॥

गतः ॥ २२ ॥

आर्भवे स्तूयमाने दक्षिणेनोदुम्बरीमहतेन वाससा पत्तोदशेन प्रावृत्य दक्षिणाशिराः संविशति

ब्राह्मणाः समापयतमेतं यज्ञमिति ॥ (ऋ० ७) ॥ यज्ञ-
सच्छ्रथामनु संतिष्ठते ॥ २३ ॥

आर्भवे स्तूयमाने (पवमाने) स्तूयमाने दक्षिणेनोदुम्बरीं कृष्णाजिनमास्तीर्य दक्षिणा शिराः पत्तोदशनाहतेन वाससा संवेष्टच ब्राह्मणाः समापयतमेतं यज्ञमिति प्रैषमकृत्वा तत्रैव संतिष्ठते परिसमाप्यते ॥ २३ ॥

पृथगरणीष्वग्नीन्समारोह्योत्तरनारायणेनाऽऽदित्य-
मुपस्थायारण्यमभिप्रैति। यदि ग्रामे विवसेत्पृथ-
गरणीष्वग्नीन्समारोह्योत्तरनारायणेनाऽऽदित्यमुप-
स्थाय गृहेषु प्रत्यवरोहेत्। यत्रनभिप्राप्नुयात्तान्य-
ज्ञक्रतूनाह। तेन भूरुक्थ्यो रथंतरसामा। भूति-
कामो यजेत। धेनुर्दक्षिणा ॥ २४ ॥

गतार्थः। भूतिकामो भूरुक्थ्येन यक्ष्ये भूतिमनन्तागतीति संकल्प। सत्रसूक्थ्य-
वत् ॥ २४ ॥

अक्षय्यं ह वै सुकृतं चातुर्मास्ययाजिनः ॥ २५ ॥

अक्षय्यं ह वा इति। चतुर्षु चतुर्षु मासेषु क्रियन्त इति चातुर्मास्यानि तत्प्रयुक्-तानि वैश्वदेवादीनि, तेभ्यश्चाचातुर्मास्ययाजी 'करणे यज' (पा० सू० ३-२ ८५) इति भूतकाले यजतेर्णिनिः। तस्य चातुर्मास्ययाजिनः सुकृतं यागजनितफलसाधनधर्मा-पूर्वपर्यायमपूर्वमक्षय्यं क्षेतुमशक्यं न कदाचिदपि भोगेन क्षपयितुं शक्यते। 'क्षय्यजय्यौ शक्यार्थे' (पा० सू० ६-१-८१) इति। क्षि क्षये (भ्वा० धा० २३६) इत्यस्मान्नि-पातितः। व्याख्यातमन्यत् ॥

शिशिरे द्वादश दीक्षाः कृत्वा द्वादशोपसदश्च कृत्वा फाल्गुन्या पौर्णमास्या सुत्या यथा भवति तथोपक्रमः। अथ वा चैत्र्या वा यथा स्यात् उत्तरस्याहनि वै देवशुनासी-रीये स्याताम्। प्रतिपदीत्यर्थः। उत्तरं च वारुणप्राघासिक वारुणप्राघासिकयोरुत्तरपर्वणि प्रतिपद्युत्तरसाकमेधयोनामातिरात्रं पञ्चदश्या द्वादश्यां (श) दीक्षाद्यविरोधेनोपक्रम-श्छन्दोगवचनात्। फाल्गुन्या पौर्णमास्यामिति पक्षमाश्रित्य प्रयोग—शिशिरे षष्ठ्यां प्रातरग्निहोत्रं हुत्वा चातुर्मास्यैर्यक्ष्ये अक्षय्यं मे सुकृतं स्यादिति सकल्प। नित्यमिदं कर्मेति भगवता मनुनोक्तम्। सोमचातुर्मास्यैर्यक्ष्ये इति संकल्प कृत्वा त्रिवृता यक्ष्ये, विद्युदसि० सोमप्रवाकादि सर्वमग्निष्टोमवदिति भाष्यकृत। यज्ञदीक्षाश्रमणमातु-र्मास्यानि भविष्यन्ति तत्रभवता इत्यादिना। चातुर्मास्यानीति सूत्रवचनमतिरात्रप्रभृ-तयश्चाहर्गणा अन्यत्र चातुर्मास्यानि राजसूयाभ्याम्, इति छन्दोगवचनात्स्मिन्नेवाहनि

दीक्षा द्वादशाहवदत्रापि अन्वारम्भणीलोप केचिदिच्छन्ति । द्वादशोपसदश्च कृत्वा द्वादशाहवद्यूपच्छेदनकाले न यूपच्छेदनम् । उत्तरवेदिकाले नोपवपति चात्वालस्य लोप: । वेदिमानं कृत्वा नतु शिम्यण्डत्यवोऽग्नेयोत्कर कृत्वा वितायनीत्यादि सर्वं लुप्यते प्रच्छादनान्त शिष्टं सर्वमहीनभूतद्वादशाहवत् । पयस्यार्थं वत्मानपाकृत्य पश्चाद्वैश्वदेव-स्याऽऽमिक्षाया अपाकरणमग्नीषोमीयस्येध्ममनहनकाले आतिथ्याया प्रयुक्तान्परिधीन्प्र-युनक्ति (परिदध्यात्) पशुनियोजनमसर्व संनह्यति । आतिथ्ये काले अग्नीषोमीयस्याऽऽ-ज्याभिमन्त्रणान्त कृत्वाऽभ्यादानादि लुप्यते। यवमतीभि: प्रोक्षण पृथिव्यै त्वेति परिधेः मर्वा अप [illegible] सम्प्रेप । येन केनचिच्छकलेनानक्ति । न चषाल:, नियोजनकाले परिधौ नियोजनम् । दक्षिणे परिधौ, वपया प्रचर्य पुरोडाशमनु वैश्वान-रपार्जन्यहविर्षी निर्वपति, इति आश्वलायनोक्त पयसो विशमनं कृत्वा वैश्वदेव्या आमि-क्षाया दोहनं पूर्ववदुक्तम (ततो) वत्मापाकरणं कृत्वा (त) मेवं परिस्तरणा-न्तम् ॥ २५ ॥

त्रिवृदग्निष्टोमो वैश्वदेवस्य लोके ॥ २६ ॥

श्वोभूते महारात्रे बुद्ध्वाऽग्न नयत्यादि (त्रिवृत) ग्निष्टोमो वैश्वदेवस्य लोके वैश्व-देवस्य स्थाने सवनीयाना निर्वाप: काले सवनीयार्थानि सर्वाणि वैश्वदेवानि सर्वाणि च पात्राणि प्रयुनक्ति । (अपरत) सवनीयकपालानि भर्जनार्थमेकं बृहत्कपालं च वैश्वदेव-कपालानि चरुस्थाल्यौ स्फ्यश्च द्वन्द्व (परत) पात्रीद्वयमवशिष्टानि तन्त्रेण सवनी-यवत्प्रातर्दोहपात्र वाजिनपात्र चेत्यादीनि । तन्त्रेण वानस्पत्याऽसीत्यादि वेषाय वां सवनीयान्निरूप्य वैश्वदेवहवींष्यनुनिर्वपति निरुप्तान्व्रीहीनिति शूर्पे निर्वापो भारत्यर्थैः सहत्यर्थ । उभयार्थं निरुप्य प्रोक्षणादय: । अवहननकाले सवनीयानवहत्य व्रीही-नष्टधा कृत्वा सम भागान्संमृज्य यथाभागं व्यावर्तध्वमिति लाजार्थान्विभजत्युभयोर्यथा-देवतानिर्देश । कनिष्ठा लाजार्था भवन्तु । भूयिष्ठा वैश्वदेवार्था तानवहत्य पर्यायेण त्रिष्फलीकरणं वैश्वदेवसवनीयार्थाना निधान तन्त्रेण सवनीयाना पेष्यान्विभज्य वैश्व-देवान्पेष्यान्विभजति सवनीयानामैन्द्रमपि वा वैश्वदेविकानां पूष्णान्तानि सर्वाणि कपा-लान्युपधाय मैत्रावरुण्या दोहनम । ततो वैश्वदेव्या दोहनम् । सदन्तीरधिश्रयति इत्यादि । एकस्या पात्र्या पिष्टान्यास्य पिष्टानुत्पूय व्रीहीनुत्पुनाति । क्रमेण यवपिण्डं कृत्वा चातुर्मास्यवद्विभज्य निर्दिश्य क्रमेणोद्वासनम् । उद्वासनकाले सवनीयानुद्वास्य वाजिनसेच-नान्त कृत्वा चातुर्मास्यानामुद्वासन वाजिनसेचनान्तं क्रमेणालंकरणमित्यादि ॥ २६ ॥

---

१ °न्ताना ।

वैश्वदेवः पशुः । बार्हस्पत्याऽनूबन्ध्या ॥ २७ ॥

भवतीति शेषः । प्रोक्षणादि कृत्वा प्रदक्षिणं परिधिं परिवीय वैश्वदेवं पशुमुपाकरोति । ऐकादशिनावृत्तिः । पूर्ववत्सवनीयपशोर्नियोजनं परिधौ । सवनीयानामाद्यं चातुर्मास्यानासादयति । द्वयोर्वाजिनं संसृज्योत्करे सादयति । प्रचरणकाले सवनीयैः प्रचर्य वैश्वदेवहविर्भिः प्रचरति ॥ २७ ॥

न यूपं मिन्वन्ति ॥ २८ ॥

परिधिनियमाच्च ॥ २८ ॥

नोत्तरवेदिमुपवपन्ति ॥ २९ ॥

नियमाच्च ॥ २९ ॥

परिधौ पशुं नियुञ्जन्ति । उल्मुके बर्हिषि वा ।
उत्तरेषु विमिन्वन्ति । यूपानुत्तरवेदिमुपवपन्ति ॥ ३० ॥

प्रातःसवनीयान्वैश्वदेवहवींष्यनु निर्वपति । समानं तु स्विष्टकृदिडम् । न यूपं मिन्वन्ति । नोत्तरवेदिमुपवपन्ति । परिधौ पशुं नियुञ्जन्ति । उल्मुके बर्हिषि वा । मिन्वन्त्युत्तरेषु यूपान् । उत्तरवेदिमुपवपन्ति (आप० श्रौ० २२-८-११८) इत्यापस्तम्बः । समानं तु स्विष्टकृत्तन्त्रेणेत्यर्थः । वसाप्राशित्रयोश्च तन्त्रेणाभयोरुभयोः पयस्ययोरेकैव शाखा तन्त्रेणोत्कर्षपक्षे उत्कर्ष इति । दक्षिणाकाले पञ्चाशद्दक्षिणा ददाति । न यूपोपस्थानम् । न परिधिप्रहरणं कृतमिति चात्वालकार्यं सर्वं लुप्यते उपस्थानादि सर्वमग्नीषोमीयवत् । पाक्षिकस्यातिग्राह्यस्य निवृत्तिः, त्रीणि गृह्णाति केचित्पाक्षिकमेवेति तस्या अत्रापि परिधौ नियोजनम् । अथोदवसानीयान्त विधायाहतं वासः परिधाय चातुर्मास्यव्रतान्युपेयुः । समासो वैश्वदेवः ॥ ३० ॥

ततश्चतुर्षु मासेषु वरुणप्रघासानां लोके त्रिरात्रोऽग्निष्टोम उक्थ्योऽतिरात्रः । मारुतः पशुः । वारुणो द्वितीयः । मैत्रावरुण्यनूबन्ध्या ॥ ३१ ॥

आषाढ्यां पौर्णमास्यां सुत्यारम्भो यथा स्यात्पूर्ववद्द्वादश दीक्षा द्वादशोपसदश्च कृत्वा, एवं कालं प्रतीक्ष्याऽऽरम्भः । वरुणप्रघासानां लोके द्विदिवस इति छन्दोगवचनात् । षष्ठ्यां द्वितीयेन यष्टव्ये, केचित्त्रिरात्रेणेति सर्वं च दशाहवत् । तस्मिन्नहन्येव दीक्षणीया । यूपच्छेदनकाले एकयूपं छिनत्ति, उत्तरवेदिमुपवपन्त्यौपवसथ्येऽहन्यग्निवदुत्तरं परिग्राहं कृत्वा प्रतिप्रस्थाता शाखामाहरति मारुत्याः शाखाया अपि वत्सापाकरणं,

यूपकाले यूपं मिन्वन्ति। पयसा विशसनं कृत्वा मारुत्या दोहनं सवनीयेध्माबर्हिराहरणम् । प्रसूनमयं अेना संनद्धमित्यादि परिस्तरणान्तम् ।

सोमे महारात्रे बुद्धवाऽग्ने नयेत्यादि अग्निष्टोमवत् । सवनीयनिर्वापकाले वैश्वदेव- [illegible] हवींषि निर्वपति पूर्वस्मिन्नहन्युत्तरस्मिन्नहनि सर्वाणि विभज्य वा (आप० श्रौ० २०-८-११) इत्यापस्तम्बसूत्रम् । कपर्दिना भाष्यकारेणाप्युक्तं तस्मादेव विचारः कर्तव्यः । अस्मिन्नहनि सर्वाणि वारुणप्राघासिकानि हवींषि कर्तव्यानीति विभज्यास्मिन्नुत्तरस्मिन् । अथवोत्तरस्मिन्नेवेति संशयः ।

प्रथमेऽहनि सर्वाणि निर्वाप, इति केचिद्वर्णयन्ति । अथ प्राथम्यात्प्रथममतिक्रम्योत्तरस्मिन्निर्वापकरणाभावात् । तस्मात्पूर्वेऽहनि विभज्य पूर्वस्मिन्नुत्तरस्मिन्निति सिद्धान्तः । लिङ्गदर्शनादापस्तम्बेन भगवता साकमेधहवींष्यपच्छिद्योक्तमिति । पुनश्च लिङ्गं चातुर्मास्येष्विष्टिषु सर्वत्र पयस्या देवता इह सोमेषु पशुदेवता वैश्वदेवे वैश्वदेवः पशुः । वरुणप्रघासेष्विह मारुतः पशुः । द्वितीयस्य वारुणः । साकमेधे पयस्या नास्ति तस्मादन्यः पशुः शुनासीरीये वायव्यः पशुः । ऐष्टिके वायव्यः पशुरिति दर्शनान्मारुतः पशुः पूर्वस्मिन्विद्यमानत्वात् । मारुतपर्यन्तानि सर्व हवींषि पूर्वस्मिन्नेवाहनि द्वितीय उत्तरस्मिन्नहनि वारुणस्य [illegible] पयस्यासिकश्च कायश्चोत्तरस्मिन्नहनि अपि च प्रतिपद्दर्शनाच्च कायमप्युत्तरस्मिन्नहनि कथं साकमेधे त्र्यहे वारुणप्राघासिकेभ्यो द्व्यहे च साकमेधे वरुणप्रघासेष्वेककपालत्वेन [illegible] च तद्देवत्यं प्रतिपद्द्वयं विधीयते वरुणप्रघासेष्वाहवनीयोत्तरस्मिन्नहनि प्रतिपदि विहितं साकमेधे त्र्यहमेवोत्तरेऽहनि वैश्वकर्माणि प्रतिपदि विहितं तस्मिन्कायमप्युत्तरस्मिन्नहनि कर्तव्यमेवं प्रयोगः कर्तव्यः । अत्र प्रकृतमनुसराम ।

सवनीयानां पात्रप्रयोगकाले सवनीयार्थानां वारुणप्राघासिकानां च पात्राणि प्रयुनक्ति, सवनीयानिरूप्य तस्मिन् शूर्पे यानि वारुणप्राघासिकानि ऐन्द्राग्नपर्यन्तानि निरूप्य प्रतिप्रस्थाता सन्नद्धवस्त्रा० तत करम्भपात्रार्थान् । सहैव प्रोक्षणादयः प्रागधिवपनान्तं कृत्वेन्द्रामित्रस्य पूषण्वत सोमस्य सरस्वत्या इति तण्डुलानिदमिन्द्रस्याग्नेः सवितुः पूष्ण इन्द्राग्न्योर्मरुतामिति पेषणान्तं त्वात्नेवमविवाप । क्रमेण चतुर्थ्यन्तेन कपालान्युपधाय- मैत्रावरुण्या दोहनम् । मरुत्सोऽग्निश्रयति इत्यादि पिण्डं कृत्वा प्रथमतण्डुलान्यथाभागं व्यावर्तध्वमिदमिन्द्रस्य हरिवत इन्द्रस्य पूषण्वत इत्येकं भागमिदं सोमस्य सरस्वत्या इत्युक्त भागमथ पुरोडाशानां व्यावर्तध्वमिति पुनश्च व्यावर्तध्वमथ तण्डुलानां व्यावर्तेथां व्यावर्तध्वं व्यावर्तेथामिदं सोमस्य सरस्वत्या इति चरोः । इदमिन्द्राग्न्योर्मरुतामुत्तमो मेषमध्वर्यु करोति । अथ यवानामभिश्रयणादिलाजानैन्द्रमथ मैत्रावरुण्या दध्यानयने-

मथ वारुणप्रघासिकानां यथाक्रमं मेषमधिश्रयति । ततो दध्यानयनमन्तरेणं सर्वेषामु-द्वासनकाले सर्वेषां क्रमेणोद्वासनम् । द्विरात्रवदग्निष्टोमसामानुमार्गेणेति । केचित्पशु काले मारुतः पशुः । विहरणादूर्ध्वं काले मार्जालीयस्य रक्षणं सवनीयपशोरग्ने वाजजिदिति कृत्वा मार्जालीये करम्भपात्रैः प्रचारः । अक्रन्निति जपित्वा सवनमर्मात्यादिसवनीयै-प्रचर्य वारुणप्रघासिकैर्मेषान्तैः प्रचरति । समानं तु स्विष्टकृदिडम् । वैशेषिकाणां च । पञ्चाशद्दक्षिणा ददाति पत्नीसंयाजान्तमहः संतिष्ठते ।

द्वादशाहवदहीनसंततयः । मैत्रावरुण्या वत्सापाकरणं कृत्वा तदानीमेव वारुण्याऽ-ध्वर्युः करोति । मैत्रावरुण्या दोहनं कृत्वा वारुण्या दोहनमध्वर्युरेव । केचित्—प्रतिप्र-स्थातैव । सवनीयस्य परिस्तरणान्तम् ।

महारात्रे बुद्ध्वा अग्ने नयेत्यादि । सवनीयनिर्वापकाले द्वे भर्जनार्थे कपाले एका-दश कपालानि मेष्यर्थमष्टौ वा कायार्थमेककपालं स्फ्यश्च द्वन्द्वम् । शिष्टं सर्वं पूर्ववत् । सवनीयान्निरुप्य तस्मिन्नेवाग्नये जुष्टं० प्रागधिवपनात् । यथाभागं व्यावर्तध्वमिदमिन्द्रस्य हरिवत इन्द्रस्य पूषण्वत इदमिन्द्रस्य वरुणस्य कस्यैन्द्राग्नीना च क्रमेणाधिवाप कृत्वा कपा-लान्युपधाय मैत्रावरुण्या दोहनं कृत्वा यथाभागं व्यावर्तध्वं व्यावर्तेथामिदं वरुणस्येदं कस्येत्यादि प्रथममैन्द्रं सवनीयक्रमेणाधिश्रित्य सायंदोहाद्यन्तरितमित्यादि । उद्वासन-काले क्रमेणोद्वासनम् । नात्र मेष्यमेषयोर्व्यतिहारः । (स्वस्या स्वस्या) पशुकाले वारुणः पशुः । प्रचरणकाले सवनीयै. प्रचर्य ततो वारुण्या. प्रचार करोति । अध्वर्यु काया-नुब्रूहि इत्यादि, समानं स्विष्टकृदिडं प्राशित्रं च पञ्चाशद्दक्षिणा । अवभृथकाले त्रिन्दु-स्पर्शं कृत्वा पितृनिष्क्रमणोन्तरणी प्रक्षेप ।

मैत्रावरुण्यनूबन्ध्या भवति । उदवसानीयान्तं, ततश्चातुर्मास्यानि भवन्तीति ।

अथवाऽऽश्वलायनमतादुत्तरेद्युरेव वारुणप्राघासिकाना सर्वेषा निर्वाप. करम्भपात्राणां च । अथैवं प्रयोगः—पूर्वस्मिन्नहनि पयस्यात्रयस्य दोहन मैत्रावरुणस्य मारुत्या वारु ण्याश्च । श्वोभूते सवनीयकाले उभयार्थानि पात्राणि प्रयुज्य सवनीयानि निरुप्य तामु यवासु वारुणप्रघासिकानि सर्वाणि निर्वपति करम्भपात्रार्थानि उभया(नि) निगद्योपसादनमु-भयं निगद्य प्रागधिवापनात्कृत्वा यथाभागं व्यावर्तध्वमिदमिन्द्रस्य हरिवत इदमिन्द्रस्य पूषण्वत इदं सोमस्येदं सरस्वत्या इति चर्वर्थान् (इदमिन्द्राग्न्यो.) इदमिन्द्रस्याग्नेः सवितुः पूष्ण इन्द्राग्न्योर्मरुतां वरुणस्येति पौष्णान्तान्क्रमेणाधिवाप. । क्रमेण कपाला-न्युपधाय मैत्रावरुण्या दोहनम् । (ततो मारुत्या वारुण्याश्च) । सदन्तरिविश्रयण पिण्डं कृत्वा पृथक्तण्डुलान्यथाभागं व्यावर्तध्वमिदमिन्द्रस्य हरिवत इदमिन्द्रस्य पूषण्वत इत्येकं भागम् । इदं सोमस्य सरस्वत्या इत्येकं भागं पुरोडाशस्य व्यावर्तध्वमैन्द्रपुरोडाशमथ

तण्डुलान् , व्यावर्तेथां व्यावर्तध्वमिति त्रि०. पुनर्व्यावर्तध्वं (या) सा मेषी पुनर्व्यावर्तेथां वारुणकार्यौ । इद सोमस्येदं सरस्वत्या इति चरू । इदं वरुणस्येदं कस्येत्युक्तमितरेषां यथाक्रममधिश्रयणं घर्मः स्त(स्थ) घर्मोऽसि (लाजा) इत्यैन्द्रमथ मैत्रावरुण्या दध्यानयनमथाग्नेयमथ सौम्य चरुमथ सावित्राद्यैन्द्राग्नपर्यन्तानधिश्रित्य मेषीमधिश्रित्य मारुत्या दध्यानयनमथ कायमन्तरितं सर्वेषाम् । उद्वासनकाले सवनीयानुद्वास्य द्वयोः पात्रयोरुद्धरणं कृत्वा [illegible] क्रमेण । पशुकाले वारुणः पशुः । धिष्णियविहरणस्योर्ध्वं मार्जालीयस्य धारण सवनीयस्य पशोः० अग्ने वाजजिदिति कृत्वा मार्जालीये करम्भपात्रैः प्रचार । अक्रन्निति जपित्वा भुवनमसीत्यादि सवनीयैः प्रचर्य वारुणाद्यैः सर्वैः समान नु स्विष्टकृदिड वैशेषिकाणां च । दक्षिणाकाले पञ्चाशद्दारानीति पूर्वकल्पेन समानम् । केचित्प्रथमेऽहनि सर्वेषां निर्वापः । तदा प्रयोगोऽनन्तरोक्ते तुल्य. । तदाऽप्यवभृथादुदेत्योदवसानीयान्तमिति । समाप्ता वरुणप्रघासाः ॥ ३१ ॥

**ततश्चतुर्षु मासेषु साकमेधानां लोके त्रिरात्रोऽ-
ग्निष्टोम उक्थ्योऽतिरात्रः ॥ ३२ ॥**

अथ कार्तिक्या पौर्णमास्या त्रिरात्रस्य प्रथमेऽहनि सुत्या यथा भवति तथा द्वादश दीक्षा द्वादशोपसदश्च कृत्वा तदनु आरम्भः । अथवा छन्दोगमतात्तस्य त्रिरात्रस्योत्तममहः पर्वणि यथा स्यात्तथाऽऽरम्भः ।

द्वादश दीक्षा विधाय द्वादशाहवत्तस्य कर्म- अतिरात्रेण यक्ष्ये विद्युदसि० सर्वं द्वादशाहवत् । नाग्निचयन न सावित्रः । उत्तरवेदिविधानात् । प्रसिद्धसौपवसथ्यान्तं कर्म वसतीवरीसरि(भि)द्रुत्य पयासि विशाम्नि । अस्मिन्कर्मणि यूपं मिन्वन्ति, अग्नीषोमीयकाले सवनीयपरिस्तरणान्तम् ।

महारात्रे बुद्ध्वाऽग्ने नयेत्यादि अग्निष्टोमः । प्रातःसवनीयानां पुरोडाशानां निर्वापकाले प्रातःसवनीयाना निरुप्याग्नयेऽनीकवते जुष्टं निर्वपामीति । यवपक्षे निरुप्तयवेषु व्रीहिपक्षे निरुप्तव्रीहिषु । अवहननात्पूर्वं विभागः । व्रीहिपक्षे व्यावर्तेथामिति । इतरथा [illegible] । व्यावर्तध्वमिन्द्रस्य हरिवत इन्द्रस्य पूषण्वत इदमिन्द्रस्याग्नेरनीकवतः । शिष्टं यथोक्तम् ॥ ३२ ॥

**आग्नेयः पशुरैन्द्राग्नो द्वितीयः । ऐकादशिना-
स्तृतीये प्राजापत्यो वा सौर्यनूबन्ध्या ॥ ३३ ॥**

पशुकाले प्राप्त आग्नेयः पशुः । ऐन्द्रवायवाग्रः । पौष्णिकस्य प्रथममहर्विकारत्वात्तस्य त्र्यहस्य [illegible] । सवनीयैः प्रचर्याग्नयेऽनीकवते प्रचारः । माध्यंदिने सवनीयैः सह मरुद्भ्यः सांतपनेभ्यो निर्वापश्चरुः । मरुद्भ्यः सांतपनेभ्यो जुष्टं निर्व-

पामीति पूर्ववत्प्रचारः । सर्वमग्निष्टोमवत् । पत्नीसंयाजान्तमहीनसंततयः । रात्रौ वसती-वरीषु परिहृतासु गृहमेधीयेन चरन्ति (२२-८-१६) इत्यापस्तम्बोक्तम् । अञ्जना-भ्यञ्जने च पश्वदोहादि परिस्तरणान्तम् ।

महारात्रे बुद्ध्वाऽग्ने नयेत्यादि उक्थ्यः षोडशी न स्वहीन. । छन्दोगमताच्च प्रात-रनुवाकमुपाकरोति तथाऽऽहाऽऽपस्तम्बः—'उत्तरस्याहन उपाकृते प्रातरनुवाके पूर्णा-दर्व्येण चरन्ति' (२२-८-१७) इति । शालामुखीये प्रतिप्रस्थाता पुनः सवनीयैः पुरोडाशैः—'क्रीडिनः प्रात.सवनीयान्' निर्वापो भवति । ऐन्द्रं निरुप्य पूर्ववद्यव-व्रीहिविभागः । ऐन्द्राग्नः पशुः । सवनीयैः प्रचर्य क्रीडिनां प्रचारः । माध्यंदिनसवनीयैः सह स्वतवसो निर्वापः । मरुद्भ्यः स्वतवद्भ्यो जुष्टं निर्वपामि । स्वतवानत्र नियतः । ऐन्द्रं निरुप्य स्वतवद्भ्यो मरुद्भ्यः स्वतवद्भ्यो हव्यं रक्षस्व । संविशन्तामित्यादि सवनीयैः प्रचर्य तेन प्रचरति । तृतीयसवनीयैः सह महाहविषा निर्वापः, वैश्वकर्मण-वर्ज्यं कुतः लिङ्गदर्शनात् । वैश्वकर्मणे प्रकृतिवदिति । उत्तरस्मिन्नहनि प्रतिपद्विहितं, तस्मादुत्तरास्मिन्नहनि वैश्वकर्मणान्तं लिङ्गविरोधात् । अस्मिन्नहन्येव सर्वेषां महाहविषाम-विशेषेण विधानाद्वैश्वकर्मणोऽप्यहन्येव निर्वाप. । उभयार्थानि पात्राणि प्रयुनक्ति । ऐन्द्रं निरुप्य तेषु यवैष्वाग्नेयादिवैश्वदेवान्तान्निर्वपति । एवं प्रोक्षणादयः । प्रागधिवापना-त्कृत्वा यथाभागं व्यावर्तध्वमिदमिन्द्रस्य हरिवत इदमिन्द्रस्य पूषण्वत इदं सोमस्य सरस्वत्या इति तण्डुलान् । इदमिन्द्रस्याग्नेः सवितुः पूष्ण इन्द्राग्न्योर्विश्वकर्मणः पेषणार्थान् । क्रमेण कपालोपधानमदन्तीरधिश्रयणादिपिण्डं कृत्वा विभजति । यथाभागं व्यावर्तध्वमित्येकम-णीयांसं पुरोडाशं विभजति । व्यावर्तध्वं स ऐन्द्रः सवनीयभूतः पुनश्च व्यावर्तध्वं स आग्नेयो महाहविषां प्रथमः । अथ तण्डुलान्व्यावर्तध्वं स सौम्यः । अथ पुरोडाशं व्यावर्तध्वं स सावित्रः । अथ तण्डुलान्व्यावर्तध्वमथ पुरोडाशं व्यावर्तध्वं स पौष्णः । अथ पुरोडाशौ व्यावर्तेथामैन्द्राग्नवैश्वकर्मणौ । अथ निर्वापः । इदं सरस्वत्या ऐन्द्रस्येति चर्वोः । इदमिन्द्राग्न्योरिदं विश्वकर्मण इति पुरोडाशयोः । अथ घर्माः स्थ विश्वायुष इत्यादि वैश्वकर्मणान्तमधिश्रयति । क्रमेणान्तरितमित्यादि । ... क्रमेणोद्वास-नम् । सवनीयैः प्रचर्य एतैः प्रचरति । एककपालाभिहोमान्तं पूर्ववद्धिहरणप्रभृति मार्जा-लीयस्य धारणम् । 'सन्नेषु नाराशंसेषु परिश्रिते मार्जालीये पितृयज्ञेन चरन्ति' (आप० श्रौ० २२-८-१९) इत्यापस्तम्बेनोक्तम् । वेदिवर्जमुद्धरणादयोऽपि न भवन्ति । अस्मिन्नन्वाधानं केचिदिच्छन्ति तन्न । समूलं बर्हिरित्यादि सर्वं प्रस्तरमेव पारिस्तरणं वा स्तीर्णे इति विधानात् । पात्रप्रयोगकाले पितृयज्ञवत् (अन्यानि वा) प्रयुनक्ति । प्राकृतायाः अन्यत्र स्थाप्रुतरा...मुदादीनि प्राकृतान्येव । शालामुखीयद-

क्षिणाग्न्योर्हविःश्रपणम् । प्राजहितदक्षिणाग्न्योरिति केचित् । ततः कृत्स्नं पितृयज्ञं कृत्वा तस्मिन्नेव काले त्र्यम्बकैश्चरित्वा पूर्ववत् । नान्वाधानं तूष्णीं प्रत्येत्याऽऽदित्येन प्रचरन्ति (आप० श्रौ० ८–८–२०) इत्यापस्तम्बः । पशुपुरोडाशवत्तस्य तन्त्रम् । हविराहुतिप्रभृतीडान्ता संततस्थमसिन एतत्ते. ततासावित्यादि पत्नीसंयाजान्तमहः संतिष्ठतेऽर्हानमननतः । वसतीवरीः परिहृत्य रात्रौ परिस्तरणान्तम् ।

महारात्रे बुद्ध्वाऽग्नै नयेत्यादि । अतिरात्रषोडशिमान् । सवनीयकाले सवनीयानेव । पशुकाले प्राजापत्यः पशुः । एकादशिनाग्निष्टोमकाले (अग्नीषोमीयकाले) एकादश यूपान्मिन्वन्ति । आग्रयणाग्रम् । अवभृथादुदेत्य सौर्येनूबन्ध्या । उदवसानीयपूर्णाहुत्यन्तमन्वह पञ्चाशत्पञ्चाशद्ददाति । ततोऽहतं वासः परिधत्त इत्यादि । गतानि चातुर्मास्यव्रतानि साकमेधानि ॥ २२ ॥

ततश्चतुर्षु मासेषु शुनासीरीयस्य लोके चतुःष्टोमोऽग्निष्टोमः । वायव्यः पशुराश्विन्यनूबन्ध्या ॥ २४ ॥

फाल्गुन्यां पौर्णमास्यां यथा सुत्या स्यादेका दीक्षा तिस्र उपसदस्तथाऽऽरम्भः । ज्योतिष्टोमेन यक्ष्ये । सर्वं ज्योतिष्टोमवत् । नाग्निरुत्तरवेदिरेव । मिन्वन्ति यूपमौपवसथ्यान्तम् । रात्रौ मैत्रावरुण्या दोहनं वायव्यस्य पयसो वत्सापाकरणं पञ्चदोहादि परिस्तरणान्तम् ।

महारात्रे बुद्ध्वाऽग्नै नयेत्याद्यग्निष्टोमवत् । उभयार्थानि पात्राणि प्रयुनक्ति । सवनीयान्निरुप्य शुनासीरीयान्निर्वपति । यवपक्षे निरुप्तयवेषु तथा व्रीहिपक्षे तथैव प्रयोगः । अवहननात्प्राग्विभागः । यथाभागं व्यावर्तध्वमिदं सरस्वत्या भारत्या इदमग्नेः सोमस्य सवितुः सरस्वत्याः पूष्ण इन्द्राग्न्योर्विश्वेषां देवानामिन्द्रस्य शुनासीरीयस्य सूर्यस्य । क्रमेणावहननादि । तन्त्रेणोत्करे निनीय तान्विभज्य शुनासीरीयान्विभजति । यथाभागं व्यावर्तध्वमिति सवनीयान्निर्दिश्य शुनासीरीयान्निर्दिशति । इदमग्नेः सवितुः पूष्ण इन्द्राग्न्योरिन्द्रस्य शुनासीरीयस्य सूर्यस्येति पिष्टान् । इदꣳ सोमस्य सरस्वत्या विश्वेषां देवानामिति तण्डुलान् क्रमेण पेषणं क्रमेण कपालोपधानं कृत्वा मैत्रावरुण्या दोहनम् । सवनीयाधिश्रयणम । सवनीयं पिण्डं कृत्वा तं विभजति । व्यावर्तध्वमाग्नेयस्तण्डुलान् व्यावर्तध्व स सौम्यः पुरोडाशं व्यावर्तध्वं स सावित्रः । तण्डुलान्व्यावर्तेथाम् । पुरोडाश व्यावर्तध्वं स पौष्णः पुनश्च व्यावर्तध्वं स ऐन्द्राग्नो व्यावर्तेथामुत्तमौ पुरोडाशावथ निर्देशः । तण्डुलानिदं सरस्वत्या इदं विश्वेषां देवानामिदमिन्द्रस्य शुनासीरीयस्येदं सूर्यस्येत्युत्तमौ पुरोडाशौ । घर्मोः स्थ विश्वायुष इति क्रमेणाधिश्रयणम् । सवनीयस्य पुरोडाशस्य शुनासीरीयाणां पुरोडाशानां च भेदेन पाकः । व्रीहियवयोः (समधिश्रयणे)

संमिश्रणे प्रमाणाभावात् । ऐन्द्रवायवाग्रं, पशुकाले वायव्यः पशुः । सवनीयैः प्रचर्येतरैः प्रचरति । समानमाऽवभृथात् द्वादशशतं दक्षिणा अवभृथान्ते:ऽश्विन्यनूबन्ध्या। उदवमानीयान्तम् । नान्तरालव्रतानि । समानानि सोमचातुर्मास्य नि ॥ ३४ ॥

सर्वत्राहतं वासो वसानोऽवभृथादुदेत्य कालान्तरा-लेषु । नानृतं वदति । न मांसमश्नाति । न स्त्रियमुपैति । नोपर्यास्ते । जुगुप्सेतानृतात् । प्राङ् शेते । न मध्वश्नाति । नाङ्क्ते । नाभ्यङ्क्ते । ऋतौ जायामुपेयात् ॥ (ख०८) ॥ ३५ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने तृतीयः पटलः ।

चातुर्मास्यवदन्तरालव्रतानि । सर्वत्राहत वसानोऽवभृथादुदेति ॥ ३५ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने तृतीयः पटलः ।

अथ सप्तदशप्रश्ने चतुर्थः पटलः ।

पञ्चाशद्वैश्वदेवस्य दक्षिणाः । शतं वरुणप्रघासेषु । अध्यर्धशतं साकमेधेषु । द्वादशशतं शुनासी-रीये ॥ १ ॥

ददातीति शेषः । अत्रेह पञ्चाशत्पञ्चाशद्वा दक्षिणा ददाति । द्वादशशतमुत्तमे (आप० श्रौ० २२-९-६) इत्यापस्तम्बः । गतमन्यत् ॥ १ ॥

यथर्तुजा वा यथास्वं चातुर्मास्येषु ॥ २ ॥

एवमापस्तम्बोऽपि ॥ २ ॥

वत्सांस्तृतीयसवने सह मातृभिः ॥ ३ ॥

गतः ॥ ३ ॥

अथोपहव्यस्य च कर्मोच्यते—

उपहव्येनाग्निष्टोमेन रथंतरसाम्ना बृहत्साम्नोभय-साम्ना वाऽऽमयाविनं याजयेदेतेनान्नाद्यकामं प्रजाकामं पशुकामं वाऽश्वः श्यावो दक्षिणा । स ब्रह्मणे देयः ॥ ४ ॥ यथाप्रकृतीतरेभ्यः ॥ ५ ॥

उपहव्येनाग्निष्टोमेन रथंतरसाम्ना (बृहत्साम्नोभयसाम्ना वा) उपहव्येनानिरुक्तेन यक्ष्ये । ग्रामकाम इत्यापस्तम्बीये विशेष. । विद्युदसीत्यादि सर्वमग्निष्टोमवत् ॥ ४॥५॥

ऋतु(त)पेयेनाग्निष्टोमेन बृहत्साम्ना ब्राह्मणः स्वर्गकामः ॥ ६ ॥

यजेतेति शेषः। ऋतु(त)पेयस्य कर्म। ऋतुपेयेन यक्ष्ये। स्वर्गं लोकमवाप्नवानीति संकल्पः। ब्राह्मणग्रहणादितरयोर्निवृत्तिः ॥ ६ ॥

षड्दीक्षाः। षडुपसदः। घृतव्रतो भवति ॥ ७ ॥

षड्दीक्षा यदा तदा षडुपसद्यदा नव दीक्षा वा (आप० श्रौ० २२-९-१२) तदा त्र्युपसत्। तस्य [illegible] छन्दोगब्राह्मणमतस्य ब्राह्मणस्यैवमर्थ इत्यापस्तम्बेनोक्तं षड्दीक्षा नव वेति। छन्दोगसूत्रकारश्चाऽऽह 'ऋतुपेयस्य द्वादशदीक्षोपसद इति। नाहीना ऋतुपेया इति सूत्रवचनम्। घृतव्रतो भवति। दीक्षावृत्ति प्रकृतिवदापस्तम्बमतिः। घृतमुपसद्विषय (म) इति शाखान्तरे विहितम् 'घृतव्रतो भवति' इत्येतस्य ब्राह्मणस्य [illegible] द्राह्यायणेनापि घृतव्रतो भवतीति। यथोत्साहदीक्षासु प्राश्नीयात् ॥ ७ ॥

यावदिदं प्रथममङ्गुलिकाण्डं तावत्क्रीते सोमे व्रतम् ॥ ८ ॥ उत्तरेणोत्तरकाण्डेन व्रतमुपैति ॥ ९ ॥

उत्तरेणोत्तरकाण्डेन व्रतमुपैतीति [illegible] प्रतिलोमैः प्राश्नीयादिति शाण्डिल्यः। एकाङ्गुल्या पृथक्पर्वभिः सर्वाभिर्वाऽऽश्रमसमा मिताः स्युस्तैरनुलोमैरिति शौचिः। प्रतिलोमैरिति धानंजय्यः, इति छन्दोगवचनम्। [illegible] तावत्क्रीते सोमे, अङ्गुल्याः प्रथमकाण्डेन संमितेन चमसस्य व्यापितेन व्रतयेत्। द्वितीयेऽहन्यङ्गुल्या मध्यमपर्वसंमितेन षडुपसत्सु प्रथमेन काण्डेन द्व्यहं मध्यमेन त्र्यहमुत्तमेन ॥ ८ ॥ ९ ॥

नक्तमग्निमभ्यावृत्याऽऽस्ते। दिवाऽऽदित्यम् ॥ १० ॥

नक्तमाहवनीयमभ्यावृत्याऽऽस्ते। शयनस्य प्रत्याम्नायः। आसीनस्यैव स्वापः। दिवाऽऽदित्यमिति। आदित्याभिमुख इत्यर्थः ॥ १० ॥

ऋतमुक्त्वा प्रसर्पन्ति। ऋतं वदन्तो भक्षयन्ति ॥ ११ ॥

औपवसथ्यान्तं यस्यां कस्या चिदाशीरं दुहन्तीति छन्दोगमतिः। आपस्तम्बेन तु दीक्षाव्रतं दुह्यति। अग्ने नयेत्यादि सदःप्रसर्पणकाले देवीराप इत्युपस्थानमृतमुक्त्वा प्रसर्पन्ति। ऋतं सत्यमित्यर्थः। छन्दोगोक्तमयं भूर्भव इत्येतया उदिते प्रातरादित्य इत्येवमुक्त्वा भूर्भुवः स्वरितिचोक्त्वा सर्पन्ति उपद्रष्ट्रे नम इत्यस्य प्रत्याम्नायः। ब्रह्माऽप्येवम्। भक्षणकाल ऋतमुक्त्वा भूर्भुवः सुवरिति चोक्त्वा द्विदेवत्यप्रभृतीन्भक्षयन्ति। सर्वभक्षमन्त्रप्रत्याम्नायः ॥ ११ ॥

औदुम्बरश्चमसश्चतुःस्रक्तिः सोमस्य पूर्णः
सगोत्राय प्रियाय (विप्राय) ब्रह्मणे देयः ॥ १२ ॥

चमसं सोमपूर्णं तस्मै ददाति । चमसोऽपि लौकि[illegible] । एवं छन्दोगसूत्रकारवचनात् ॥ १२ ॥

यथाप्रकृतीतरेभ्यः ॥ १३ ॥

ऋत्विग्भ्य इत्यर्थः ॥ १३ ॥

बहुहिरण्येनाग्निष्टोमेनानडुहो लोकमाप्नोति ।
ज्योतिष्मतो लोकाञ्जयति ॥ १४ ॥

आदित्यस्य लोकाञ्जयतीत्यर्थः । एतस्य कर्मणो दृणाशसंज्ञा छन्दोगमतात् । तस्य कर्म—दृणाशेन बहुहिरण्येनाग्निष्टोमेन यक्ष्ये, आनडुहलोकप्राप्त्यर्थमादित्यलोकप्राप्त्यर्थमिति वा ॥ १४ ॥

द्वादशमानं हिरण्यं दीक्षणीयायां ददाति ।
द्विस्तावत् प्रायणीयायाम् ॥ १५ ॥

द्वादशमानमित्यादि प्रधानदक्षिणानामेव [illegible]द्वादशमानं हिरण्यं दीक्षणीयायां ददाति । नान्वाहार्यधर्माः । दानमात्रमेव चतुर्विंशतिमानं प्रायणीयायामिति भावः ॥ १५ ॥

एवमत ऊर्ध्वं द्विगुणाभ्यासेनाऽऽतिथ्याया-
मुपसत्सु प्रवर्ग्येष्वग्नीषोमीयस्य वपायां
हुतायामग्नीषोमीये सवनीयस्य हुतायां वपा-
यां सवनीये प्रातःसवने ॥ १६ ॥

एवं द्वे चतुर्विंशतिमाने आतिथ्यायां चत्वारि चतुर्विंशतिमानानि प्रातः प्रथमायामुपसदि अष्टौ चतुर्विंशतिमानान्यपराह्णे षोडश चतुर्विंशतिमानानि मध्यमायामुपसदि द्वात्रिंशत् चतुर्विंशतिमानान्यपराह्णे उत्तमायामुपसदि चतुःषष्टिचतुर्विंशतिमानानि प्रातःसायमुपसदि अष्टाविंशति चतुर्विंशतिमानान्यग्नीषोमीयस्य पशोर्वा वपाया चत्वार्यष्टाविंशतिशतं चतुर्विंशतिमानानि सवनीयस्य पशोर्वपायामष्टाविंशतिशतं चतुर्विंशतिमानानि प्रातःसवने ॥ १६ ॥

सवनेषु नाराशंसेष्ववभृथेष्टावुदयनीयायाम-
नुबन्ध्यावपायां हुतायामनुबन्ध्यायामुदव-
सानीयायामन्ततः ॥ (ख० ९) ॥ १७ ॥

---

१ ख दृणाशय° ।

मन्त्रेषु नाराशंसेषु षोडशमष्टाविंशतिशतचतुर्विंशतिमानानि माध्यंदिनसवने मन्त्रेषु नाराशंसेषु दाक्षिणौ होमौ हुत्वा दानानि दत्त्वोक्तान्यतराणि ततोऽनडुच्छतमधिकं ददाति । हिरण्यस्रजमुद्गात्रे षट्पुष्करान्द्वादशपुष्करान्वा यज्ञायज्ञीयस्य स्तोत्रेऽवभृथे- [illegible]ऽवमानीयायां च. (आप० श्रौ० २२-१०-१) इत्यापस्तम्बः । रुक्मोऽलंकारविशेष । पुष्करोऽलंकारविशेषः । हिरण्यस्रजमुद्गात्रे षट्- पुष्करान्द्वादशपुष्करान्वा । द्वात्रिंशदष्टाविंशतिशतचतुर्विंशतिमानानि । तृतीयसवने मन्त्रेषु नाराशंसेषु चतुःषष्टिरष्टाविंशतिचतुर्विंशतिमानानि । उदवमानीयायामष्टाविंश- तिशतचतुर्विंशतिमानान्यनूबन्ध्याया वपाया हुतायामेवं दक्षिणानुक्रमः । शेषमग्निष्टोम- वत् । एवं छन्दोगब्राह्मणकल्प. ॥ १७ ॥

त्रिवृताऽग्निष्टुताऽग्निष्टोमेन रथंतरसाम्ना ब्राह्मणो ब्रह्मवर्चसकामः ॥ १८ ॥

यजेतेति शेषः । पूर्वमेवोक्तो ब्राह्मणयज्ञः ॥ १८ ॥

पञ्चदशेनेन्द्रस्तुतेनेन्द्रस्तोमेनोक्थ्येन बृहत्साम्ना राजन्यो वीर्यकामः ॥ १९ ॥

पञ्चदशेनेन्द्रस्तोमेन राजा यजेतेति शेषः । इन्द्रस्तुतेति संज्ञा । इन्द्रस्तुतेन्द्रस्तोमेनो- क्थ्येन यक्ष्ये, वीर्यमवाप्नवानीति संकल्प । तस्य प्रयोगः स (पू) र्वमेवोक्तः । तत्र पत्नीसंयाजान्तं यथार्थमूह इति भाष्यकृतोक्तम् । ऐन्द्राग्न. पशुरुक्थ्यत्वात् ॥ १९ ॥

सप्तदशेनाग्निष्टुताऽग्निष्टोमेन कण्वरथंतरसाम्ना वैश्यः पशु (पुष्टि) कामः ॥ २० ॥

यजेतेत्यत्रापि शेषः । अयमप्यग्निष्टोमवदेव वैश्यस्तोम इति च संज्ञा छन्दोगस- मात् । वैश्य एवाधिकारी । वैश्यस्तोमेनाऽग्निष्टुता यक्ष्ये पशूनवाप्नवानीति । वैश्यस्तो- मेन यक्ष्य इति वा संकल्पः । अग्निष्टुता यक्ष्ये इति वा शाखान्तरत्वान्नाहीनो वैश्य- स्तोमोऽग्निष्टोम इति । सर्वमग्निष्टोमवदित्यापस्तम्बछन्दोगाभ्यामुक्तम् । इहोक्तान्यपि ग्रहग्र- हणादीनि । सर्वेषां समुच्चयपक्षमाश्रित्य प्रयोगः । तत्र विशेषः ।

साग्निचित्यश्चेत्तस्यासंभरणे विशेषः—' कृष्णाजिने पुष्करपर्णे च संभरति, इत्यत्र जगतीभिः संभरति । जनस्य गोपा इति त्रिभिर्यद्वा चतसृभिरसावि सोम० इति चतुर्थी दीक्षणीयायामवहननकाले हविष्कृदाद्रवेत्याह्वानम् । सम्यावसथ्यौ चितः स्थ परिचित इत्यपरिमिताभिः शर्कराभिः परिश्रित्यासावि सोम इति जगत्या व्यूहनम् । अदीक्षि- ष्टायं ब्राह्मण इत्यावेदनमामुष्यायणप्रयोगे राजन्यवत् । प्रवर्ग्यसंभरणे पशुभिः पर्यूहामि धर्मोऽसि सुधर्मा मेति वि (वैश्य) शब्दानिव राजन्यवत्कल्पसमस्तप्रयोगः ॥ २० ॥

प्रतिधुषा प्रातःसवने सर्वान्सोमान्क्रीणाति ।
शृतेन माध्यंदिने सवने । दध्ना तृतीयसवने ॥ २१ ॥

प्रतिधुषा प्रातः सर्वान्सोमान्क्रीणाति फलचमसमपि । शृतेन माध्यंदिने दध्ना तृतीयसवने, इत्यादि सर्वमग्निष्टोमवत् ॥ २१ ॥

नीतमिश्रेण वा ॥ २२ ॥

तृतीयसवने इत्यापस्तम्ब. । श्रीणातीत्यन्वयः ॥ २२ ॥

तीव्रसुतोक्थ्येन रथंतरसाम्ना बृहत्साम्नोभय-
साम्ना वा सोमवामिनं याजयेत् ॥ २३ ॥

तीव्रसुतोक्थ्येन रथंतरसाम्ना बृहत्साम्नोभयसाम्ना वेति विकल्पः । तीव्रसुता यदय शेष पूर्ववत् ॥ २३ ॥

सोमातिपवितं याजयेद्राजानमपरुद्धं ग्रामकामं
प्रजाकामं पशुकामꣳ श्रिया प्रत्यवरूढमभिचरन्त-
जेनाभिचर्यमाणो यजेत ॥ २४ ॥

निरोगमुक्त्यर्थं श्रिया वा प्रत्यवरूढं वा याजयेत् । सोमातिपवितो वा प्रजापरुद्धो वेति च्छन्दोगमतात् । रथंतरसाम्ना बृहत्साम्नोभयसाम्ना वा सर्वमुक्थ्यवत् ।

वेदिकाल एकादशिनीवत्मानदण्डो दश रत्नाशमित्यादि । तथैव वेदिमानमसौ मीत्वा उत्तमशङ्कोः पश्चाद्र्धप्रादेशे शङ्कुमयत्न दक्षिणत उत्तरतश्चान्त्य शङ्कुद्वय निरस्यानयोः शङ्क्वो. स्पन्द्यया वेष्टनं वेद्यशस्य । अथ यूपावटदेशमारभ्यार्धप्रादेशविस्तीर्णा चतुर्विंशत्यरत्निसंमितायामा वेदिस्ता प्राची प्रसारयति । अर्धप्रादेशे वेद्या मध्येऽग्निष्ठं मिनोति । अर्धमन्तर्वेद्यर्धं बहिर्वेदि ततोऽपरतोऽथ पूर्वं ततोऽपर तत. पूर्वमित्यादिव्यत्यासेन प्रागपवर्गान् मिनोति । प्रत्यगपवर्गान्पशूनपाकरोति । उपशय च पश्चिमे॥२४॥

प्रतिधुषा प्रातःसवने सर्वान्सोमान्क्रीणाति ।
शृतेन माध्यंदिने सवने । दध्ना तृतीयसवने ।
नीतमिश्रेण वा ॥ २५ ॥

गतः ॥ २५ ॥

शृतमाशिरं दुहन्ति ॥ २६ ॥

तेषामेकैको व्रतधुक् ॥ २६ ॥

शृतमाशिरेणाभिवान्यवत्सा दुहन्ति ॥ २७ ॥

गतः ॥ २७ ॥

ता दक्षिणा भवन्ति ॥ २८ ॥

ता अभिवान्यवत्सा ॥ २८ ॥

अधिचममानुन्नयन्ति ॥ २९ ॥

अभिमामानुन्नयन्ति (२२-१०-११) इत्यापस्तम्बः । पूर्णान्ग्रहान्गृह्णीयात् । केचिच्चमसमविषय यावज्जीव [illegible] । चमसानवजिघ्रन्ति, इति वचनात् । वैश्यसवचस्कृपणानीति भरद्वाजापस्तम्बौ । नीतमिश्रेण वा तृतीयसवने इति वचनात्स्त- [illegible] ॥ २९ ॥

अवजिघ्रन्त्यृत्विजो न भक्षयन्ति ॥ ३० ॥

अवजिघ्रन्त्यन्येषु पात्रेषु स्थापयित्वा न भक्षयन्ति युग्मान्पुनः स्वे स्वे पात्रेऽवनीय ॥ ३० ॥

तानच्छावाकस्य स्तोत्रे भक्षयन्ति ॥ ३१ ॥

तान्सोमान् । एव मा यंदिने तृतीयसवने च भक्षणकाले ॥ ३१ ॥

ब्रह्मणि होत्रका उपहवमिच्छन्ते ॥ ३२ ॥

स्पष्टम् ॥ ३२ ॥

यजमान ऋत्विज उभावध्वर्यू (येवे) सर्वे चम-
माध्वर्यवोऽच्छावाकाय प्रतिगृणन्ति ॥ ३३ ॥

इडा देवहूरित्यादिना । एव माध्यंदिने तृतीयसवने च ॥ ३३ ॥

मान्ध्येकादशिनी संमीयते ॥ ३४ ॥

एवमापस्तम्बोऽपि ॥ ३४ ॥

यावद्यूपं वेदिमुद्धन्ति ॥ ३५ ॥

गतः ॥ ३५ ॥

वडवा श्वेता दक्षिणा । सा ब्रह्मणे देया ॥ ३६ ॥

अ ास्य योषिद्वडवा श्वेता गर्भिणी, इत्यापस्तम्बः ॥ ३६ ॥

यथाप्रकृतीनरेभ्यः ॥ ३७ ॥

गतः ॥ ३७ ॥

मरुत्स्तोमेन राजपुरोहितौ सायुज्यम् ॥ ३८ ॥

मरुत्स्तोमेन राजपुरोहितौ सायुज्यकामौ यजेयातामनेकयजमाना अहीनभूतद्वादशाहव- द्धविर्वचनेन याजमानावभिधानावुभौ तन्त्रेण प्रयोगः । शिशिरे दीक्षन्त इत्यादि वसन्त एव । राजा पुरोहिताश्च मरुत्स्तोमेन यक्ष्यामहे । सायुज्यार्थमिति । उभयोर्वा फलनिर्देशः । सर्वमग्निष्टोमवत् । एक एव गृहपतिः । परार्थान्यन्योऽप्यात्मार्थान्यन्यानि याजमानानि पुर्यानसुमन्तं कात्यायन आह— यथा हि यज्ञे बहुयज्ञेषु सर्वे बन्धमानाः

सर्वाणि याजमानानि क्रियेरन्निति । राजन्यस्य फलचमसम् । पुरोहितस्य सोम एव । पुरोहितप्रवरेण उभयोः ॥ ३८ ॥

अथैष (षोऽ) राट् । यो राज्यमाशंसमानो न लभेत स एतेन यजेत ॥ (ख० १०) ॥ ३९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने चतुर्थः पटलः ।

अथैष (षोऽ) राडिति । यज्ञानां बलवत्साधनसंपन्नो यो राज्यं न लभेत स एतेन यजेत । क्षत्रियस्वराजा यक्ष्ये, राज्यसिद्ध्यर्थमिति संकल्पः । सर्वमग्निष्टोमवत् ॥ ३९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने चतुर्थः पटलः ।

अथ सप्तदशे पञ्चमः पटलः ।

विराजाऽन्नाद्यकामः । स्वराजा प्रतिष्ठाकामः (प्रजाकामः) ॥ १ ॥

द्वावपि राजयज्ञौ । विराजा यक्ष्ये, अन्नाद्यर्थम् । [illegible] । स्वराजा यक्ष्ये प्रतिष्ठा(प्रजा)र्थमिति । सोमप्रवाकादि सर्वमग्निष्टोमवत् । षोडशी च । उक्तं फलचमसम् ।

चत्वारस्त्रिवृतः प्रोक्ताः प्रथमो ह्यनिरुक्तकः ।
मुख्येनैव प्रकारस्तु देवतासु विधीयते ॥ १ ॥

(बहु प्रतिगृह्य यो गरगीरिव मन्येत स पुनःस्तोमेन । अनाश्यान्नस्य वा भुक्त्वा । अयाज्यं वा याजयित्वेत्येके । यो लघुरिवाप्रतिष्ठितः स्यात्स एतेन । एकविंशेनोपच्छदेन प्रजाकाम इत्येके ॥ १ ॥

बहु प्रतिगृह्य यो गरगीरिव मन्येत स पुनःस्तोमेन यजेतेति शेषः । प्रायश्चित्तार्थम् । बहुप्रतिग्रहादिषु(च) केवलं पापक्षयार्थं स्मृत्युक्तं प्रायश्चित्तं कृत्वा पुनस्तोमेन यजेत, इति च्छन्दोगमतिः । पुनस्तोमेन यक्ष्ये पापक्षयार्थमिति संकल्पः । सर्वमुक्थ्यवत् । नाहीनः पुनस्तोमः । उक्थ्यः स्यात्स च्छन्दोगमतात् । साग्निचित्यश्चेत्प्रवृञ्जनमपि कर्तव्यम् । उदवसानीयान्तम् । द्वादश मिथुनौ गावौ दक्षिणा छन्दोगमतात् । यो लघुरिवाप्रतिष्ठितः स्यादिति । यो लघुप्रतिष्ठितः स जितः । लघुरिव दृष्टो वायुवदप्रतिष्ठित इत्यर्थः ॥ १ ॥)

औपच्छदेन प्रतिष्ठाकामः ॥ २ ॥

औपच्छदेन यक्ष्ये प्रतिष्ठार्थं प्रत्यावान्भूयासमिति संकल्पः । सर्वमग्निष्टोमवत् ॥२॥

एकैकया स्तोत्रिययोपगायन्ते ॥ ३ ॥

स्तोत्रे स्तोत्र एकैका, इत्यापस्तम्बः । चोदकप्राप्तत्वात्स्तोत्रिययोपध्वंसनमित्यर्थः ॥३॥

गन्धर्वाप्सरसो मादयन्तामिति प्रातःसवनेऽ-
धस्तात्पूतभृतः पांसूनुत्पांस्यति ॥ ४ ॥

छन्दोगप्रत्ययम ॥ ४ ॥

गन्धर्वा देवा मादयन्तामिति माध्यंदिने सवने ।
गन्धर्वाः पितरो मादयन्तामिति तृतीयसवने॥५॥

सवनेषु नाराशंसेषु इत्यापस्तम्बः । अप्राकृतं शेषमपूतभृतः पांसूनपांस्यति । मध्यंदिने तृतीयसवने च कालपृथक्त्वान्मन्त्रभेद इत्यर्थः ॥ ५ ॥

अपध्वंसमेत इत्याचक्षते ॥ ६ ॥

गतः । एकैकया स्तोत्रिययाऽपध्वंसनं । चोदकप्राप्तमपध्वंसनं सर्वमग्निष्टोमवत् ॥६॥

पुनस्तोमेन बहु प्रतिगृह्य यो गरगीरिव मन्येता-
भिशस्यमानस्य भूत्वेनपाम ॥ ७ ॥

यजेतेति शेषः । पूर्ववदुत्याख्या ॥ ७ ॥

गोतमचतुष्टोमाभ्यां पशुकामः ॥ ८ ॥

यजेतेति शेषः । पूर्ववद्दीक्षाया सुत्यायाश्च कालः । गोतमचतुष्टोमाभ्यां यक्ष्ये । पशुमान्भूयासमिति संकल्पः ॥ ८ ॥

उक्थ्यः षोडशिमानुत्तरः ॥ ९ ॥

नाग्निष्टोमो नोक्थ्यो नातिरात्र । यावदुक्थ्यः स्तोत्रिया विधीयन्ते तावदग्निष्टोम इति श्रुतेः । तस्मादग्निष्टोम । यद्वा— दश स्तोत्राणीत्यनुवादादुक्थ्यः । अथ गोतमचतुष्टोमेन यक्ष्ये । विद्युत० सर्वमग्निष्टोमवत् । तत्र कतुकरणमुक्थ्यस्तोत्रोऽप्यतिग्राह्याः सन्त्येव ॥ ९ ॥

नपुंसकपशु इव भवतः ॥ १० ॥

आग्नेयः सवनीयः । उदवसानीयान्ततः । ततः पृष्ठ्यामुत्तरस्य कर्म गोतमचतुष्टोमेन यक्ष्ये विद्युदसि० पूर्ववदुक्थ्यवत् कतुकरणमुक्थ्यस्तोत्रोऽप्यतिग्राह्यास्तत्र षोडशी च गृह्यते । तथाऽपि न षोडशीसंस्था चोदवसानीयान्तम् ॥ १० ॥

उद्भिद्वलभिद्भ्यां पशुकामः ॥ ११ ॥

यजेतेति शेषः । उद्भिद्वलभिद्भ्यां यक्ष्ये । पश्वर्थमुदवसानीयान्तमग्निष्टोमवत् ॥११॥

उद्भिदेष्ट्वा संवत्सरे बलभिदा यजेत ॥ १२ ॥

चित्रापौर्णमास्यां तिस्रो दीक्षा नियताः समाष्टौ वा स्यादिति च्छन्दोगवचनात् । आगामिन्या चैत्र्या पौर्णमास्या प्रतिपद्युद्भित्समाप्त्यनन्तरम् ॥ १२ ॥

आग्नेयेनाष्टाकपालेनान्तरालं प्रतिपद्यते ॥ १३ ॥

प्रथमाप्रभृत्याग्नेयेनाष्टाकपालेन यजेताहरहश्चान्द्रमासेन । संवत्सरग्रहणमागामिन्यां चैत्र्यां प्रथमायामाग्नेयेष्टिं कृत्वाऽऽग्नेयेन चेष्ट्वा समानतन्त्रेण । केचित्तस्मिन्नहन्येव बलभिदा यक्ष्ये । अत्रापि तिस्रो दीक्षा नियताः । सर्वं पूर्ववत् ॥ १३ ॥

उभयत्र गायत्रीः संपूर्णा दक्षिणा ददाति ॥ १४ ॥

गायत्रीशब्देनाक्षरसंख्याऽभिधीयते । चतुर्विंशत्यक्षरा गायत्री, इति च्छन्दोगवचनाच्च ॥ १४ ॥

अष्टौ पूर्वस्मिन्नष्टा उत्तरस्मिन् ॥ १५ ॥

अष्टावष्टावेकैकस्योद्भिद्बलभिदोरन्तराले नित्यमेव प्रवृत्ति ॥ १५ ॥

अपचितिकामोऽपचितिभ्याम् ॥ १६ ॥

यजेतेति शेषः । गोतमचतुष्टोमवत्कालः समाने पूर्वपक्ष इत्यर्थः । अपचितिभ्यां यक्ष्ये, अपचित्यर्थम् । अपचितिः पूजा । सर्वमग्निष्टोमवत् । उदवसानीयान्तम् ॥१६॥

उभयसामानौ भवतः ॥ १७ ॥

एवं द्वितीयेन तथोत्तरावभृथं च कुर्यात् । दक्षिणा साधारणा प्रथमे दानमुख्यत्वात् । सर्वे शतनिष्क्रिया अश्वा गोशतेनैकैकोऽश्वो विक्रीतः स रुक्मसुवर्णपट्टपरिवृतेन रथप्रावृ-(व र)णेन पट्टवस्त्रेणालंकृतः सर्वाभरणेनालंकृतोऽशुमान्यः सत्रथात् वैयाघ्रपरिभागे व्याघ्रचर्मणाऽलंकृतो रथ सनद्धः पूर्वमेव व्याख्यातो राजसूये निष्की स्रग्वी संग्रहीता भवतीति विज्ञायते । तथाऽपि न षोडशीसंस्था उदवसानीया । एतभूतसंग्रहीतृयुक्तं रथं ददाति । केचित्प्रधानमुभयत्र कुर्वन्ति । तथा चाऽऽहाऽऽपस्तम्बः—'तयोरश्वरथश्चतुर्युग्दक्षिणा । सर्वे शतक्रया अश्वाः । स रुक्मी प्रावेपी सर्वाभरणैरशुमान् । तस्य वैयाघ्रः परिवारो द्वैपो धन्वविरास्थे: कवचः । अस्यास्थाता सनद्धः सनद्धसारथिरावृतः प्रतिहिताभ्याम् । निष्की स्रग्वी संग्रहीता भवतीति विज्ञायते' (आप० श्रौ० २२-१२-४।९) इति ॥ १७ ॥

पक्षिभ्यां साग्निचित्याभ्यां यः कामयेत पक्षी ज्योतिष्मतः स्वर्गाल्लोकाननुसंचरेयमिति ॥१८॥

* पक्षिभ्यां साग्निचित्याभ्या यजेतेति शेषः । एतयोः समाने पूर्वपक्षे यजेत, एकस्मिन्नित्यर्थः । समानोऽग्निचयन उभयोरेक एवेत्यर्थः । वसन्तेऽमावास्यायां पक्षिभ्या

माग्निचित्याभ्यां यक्ष्ये । पक्ष(क्षि)वान्भूत्वा स्वर्गं [illegible]ीति संकल्पः । अथवा पक्षिणा यक्ष्ये । विधुदसि० सक्षेदान्त, बृहस्पतिपुरोहिता इत्यादि उखार्थत्वादुखा अग्निसाग्नि ।

एका दीक्षा तिस्र उपसदः, चयनाभावात् । पञ्चम्यां प्रसुव', पर्वणीत्यर्थः । त्रिहविष्कां दीक्षणीयायां केचिदिच्छन्ति । सोमेन प्रायणीयादि समानं, नोत्तरवेदिः । अग्निप्रणयनकाले गार्हपत्यात्काले गार्हपत्यचितेरादायाग्निष्टोमवत्प्रणयनशिलानिधानवर्जमग्निवदिति । केचित् अग्ने युक्ष्वा हीत्यादि स्वं नो धेहीत्यन्तो लुप्यत इति । केचिद्बुध्यानयोदिवसोर्ध्वागावर्जं स्वं नो धेहीत्यन्तं कुर्वन्ति ।

अग्निवदुत्तरमित्याग्निष्टोमिकमग्निं युनक्ति । नच नमस्ते अस्तु न कल्याणी न हिरण्यपात्रं नैकादश समिष्टयजूंषि केचिदिच्छन्ति । उद्वसानीयान्तमग्निष्टोमवत् । केचिदेवं वर्णयन्ति—द्वयोः पूर्वपक्षयोस्तिथिसमस्थानत्रयोरग्निचयनं कृत्वा पृथक्पृथक् कृत्वा पक्षिभ्यां यजेत । श्येनश्चेदुत्तरस्यापि उत्तरत्वतुरस्र एव पक्षिभ्यां याग इति तन्न ॥ १८ ॥

ऋषभेणाग्निष्टोमेन राजन्यं वीर्यकामम् ॥ १९ ॥

ऋषभो राजसूय. संग्रामसंयुक्ते याजयेदित्यापस्तम्ब । ऋषभेण यक्ष्ये वीर्यवान्भूयासमिति संकल्प. । सर्वमग्निष्टोमवत् ॥ १९ ॥

ऋषभो दक्षिणा ॥ २० ॥

द्वादशशतं दक्षिणा, इत्यापस्तम्बः ॥ २० ॥

गोसवेनोक्थ्येन बृहद्रथंतरसाम्ना स्वाराज्यकामः ॥ २१ ॥

यजेतेति शेषः । गोसवेनोक्थ्येन बृहद्रथंतरसाम्ना (स्वाराज्यकामेन) यक्ष्ये । स्वाराज्यमवाप्नवानीति । सर्वमुक्थ्यवत् ॥ २१ ॥

अयुतं दक्षिणा ॥ २२ ॥

अयुतं दशसहस्रम् ॥ २२ ॥

दक्षिणेनाऽऽहवनीयमनुद्रुते वेद्ये प्रतिधुषा
माहेन्द्रस्तोत्रं प्रत्यभिषिच्यते ॥(ख० ११) ॥
रेवज्जातः सहसा वृद्धः क्षत्राणां क्षत्रभृत्तमो
वयोधाः । महान्महित्वे तस्तभानः क्षत्रे
राष्ट्रे च जागृहि । प्रजापतेस्त्वा परमेष्ठिनः
स्वाराज्येनाभिषिञ्चामीति ॥ २३ ॥

वेद्युद्धननकाले उत्तरवेदेर्दक्षिणदेशस्याऽऽहवनीयमनुद्धूते बृहत. स्तोत्रं प्रत्यभिषिञ्च(च्य)ते रेवज्जातः० अभिषिञ्चामीत्यन्तेन प्रतिधुषा हुतशेषेण पयसा वाऽभिषेकः ॥२३॥

गोसवेनेष्ट्वा संवत्सरं द्वादशाहं वा गोव्रतो भवति ॥ २४ ॥

तेनेष्ट्वोदवमानीयान्न पशुव्रतचारी भवति ॥ २४ ॥

**उपमातरमियादुपस्वसारमुपसगोत्रामुपनिगायो-
दकं पिबति तृणानि वा छिनत्ति ॥ २५ ॥**

उपवहायोदकं पिबेत्तृणानि चाऽऽच्छिन्द्यात् । उपमातरमियादुपस्वसारमुपसगोत्राम् (आप०श्रौ० २२ १३–२) इत्यापस्तम्ब । अन्यत्र येषु गमनेषु न दोषो विहितत्वात् ॥ २५ ॥

**यत्र यत्रैनं विष्ठा विन्देत्तत्र तत्र विति-
ष्ठितोऽपवगाहं गौरिव सिषम् ॥ २६ ॥**

यत्र यत्रैनं विष्ठा विन्देत्तत्र तत्र मलविसर्ग आपन्नो लज्जामपि त्यजेत् । विततोऽन्यानि कर्माणि धर्मलोभभयाद्बुद्धे. सर्मेयन निवृत्तानि स्वभावात् । गवालम्भमिति वचनात्कलौ गोसवनिवृत्ति. । युगान्तरविषयत्वात् ॥ २६ ॥

मरुता॰ स्तोमेनापरिमितां पुष्टिं पुष्यति ॥ २७ ॥

'मरुता॰ स्तोमेनानन्ता॰ श्रिय जयति' (२२–१३–४) इत्यापस्तम्बः ॥ २७ ॥

एतेन त्रीन्याजयेत् ॥ २८ ॥

एतेन द्वौ त्रीन्वा याजयेदित्यापस्तम्ब । श्रीकामा श्रीकामा वा यजेरन् । मरुतां स्तोमेन यक्ष्यावहे इत्यर्थमिति संकल्प । राजपुरोहितयाजवद्द्विवचनेन यजमानाभिधानम् । दीक्षा द्वादशाहवत् । [illegible] ॥ २८ ॥

**इन्द्रस्तोमेनोक्थ्येन रथंतरसाम्ना बृहत्साम्नो-
भयसाम्ना वा तेन द्वौ याजयेत् ॥ २९ ॥**

गतः ॥ २९ ॥

**ऋषभेणाग्निष्टोमेन बृहत्साम्ना ब्राह्मणोऽ-
(ब्रह्मणो॰)धिपतिः समानानां भवति ॥ ३० ॥**

व्याख्यातम् ॥ ३० ॥

**इन्द्राग्न्योः कुलायेन राजपुरोहितावुभावे-
कस्यां याजयेत् ॥ ३१ ॥**

इन्द्राग्न्योः स्तोमो राजपुरोहितयज्ञ । राजपुरोहिताविन्द्राग्न्योः स्तोमेन यक्ष्यावहे ॥३१॥

तेजो ब्रह्मवर्चसं प्रावरुन्द्धे(द्धय) विशश्च राजा प्रविशति ॥ ३२ ॥

ब्रह्मवर्चसमवाप्नवानीति पुरोहित. । राजा राज्यप्राप्त्यर्थमिति क्षत्रियः । तेन सह

संकल्पः । सायुज्यकामयज्ञवत् । यदि राजा गृहपतिस्तदा फलचमसप्रयोग इति केचित् ॥ ३२ ॥

विघ(घ)नेन विपाप्मानं भ्रातृव्यं हते ।
तेन सर्वा मृधो विहते ॥ ३३ ॥

भ्रातृव्यहननार्थमित्यर्थः । पापक्षयोऽपि फलम् । य राजानं विशो नापचायेयुर्यो वा ब्राह्मणस्तमसा पाप्मना प्रावृतः स्यादिति श्रुते । विघ(घ)नस्य ताण्डके पठितम् । उभयं पश्वभिचारार्थं च नैत्तिरीयक उत्तरो विघ(घ)न. पठित । तस्य(दा) पापक्षयफलं विघ(घ)-नस्य पापक्षयार्थता साममंत्रसूत्रकारेण लाट्यायनेनाप्युक्तम् । अपिना ज्ञातप्रायश्चित्तमिति । विघनेन यक्ष्ये, पापक्षयार्थमभिचारार्थं वा पशुकामो वा ... । सर्वमग्निष्टो-मवत् ॥ ३३ ॥

संदंशेन भ्रातृव्यवान वज्रेण षोडशिनाऽभि-
चरञ्छे(ञ्छ्ये)नेन व्याख्यातः ॥ ३४ ॥

श्येनादप्ययम्र विशेष. । राजानं सदंशेनाभिचरेज्जनपं वज्रेण (इति) च्छन्दोगवच-नात् ॥ ३४ ॥

त्रयोदशरात्रस्त्रिरात्रो वृद्धिकामः ॥ ३५ ॥

एताभ्यामिष्ट्वा ज्योतिष्टोमेन यजेत न शान्त्यर्थमिति च्छन्दोगवचनात् । त्रयोदशा-तिरात्रो ज्योतिष्टोमः । ज्योतिष्टोमेनातिरात्रेण यक्ष्ये, ऋद्धिमवाप्नवानीति संकल्पः । सर्वमतिरात्रवत् । सषोडशिकः ॥ ३५ ॥

सर्वस्तोमेन त्रुभूषन् ॥ ३६ ॥

सर्वस्तोमेनातिरात्रेण यक्ष्ये, भूतिमवाप्नवानीति संकल्पः । शेषमतिरात्रवत् ॥ ३६ ॥

अप्तोर्यामेण पशुकामः ॥ ३७ ॥

यजेतेति शेषः । अप्तोर्यामः क्र(क)तुरन्तरं पूर्वोक्तः । पश्चं वाऽप्तोर्यामेणा-तिरात्रेण यक्ष्ये, सर्वान्कामानवाप्नवानीत्यागू षोडशिमान्पूर्वमेवोक्त. अस्याप्तोर्यामस्य बृहस्पतिसवदभिषेकः (शुक्रामन्थिनौ भवत ।) शुक्रामन्थिनो. संख्या तेनैव । शेषं पूर्ववत् ॥ ३७ ॥

यस्मात्पशवः प्र सेव भ्रश्यन्तीति ॥ ३८ ॥

अप्तोर्यामेण सर्वमाप्नोति सर्वं जयति (आप० श्रौ० २२-१३-१९) इत्या-पस्तम्बः ॥ ३८ ॥

ऐकादशिनाः पशवो भवन्ति ॥ ३९ ॥

ऐकादशिनाः पशवः । यूपच्छेदनकाले अग्निष्ठप्रथमानित्यादि । ताण्डके छन्दोगे चैकादश रशना एकादश पशव एकादश यूपा भवन्तीति परिसंख्यानादुपशयपात्नीवतयोर्निवृत्तिरिति केचित् । ऐकादशिनप्रदर्शनार्थमिति न्याय एवेति केचित् । तैत्तिरीये सर्वस्तोमोऽग्निष्टोमसंस्थः । ' योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेत ' (तै० सं० ७–१–३) इति ॥ ३९ ॥

नवसप्तदशेन प्रजाकामः ॥ ४० ॥

नवसप्तदशेनातिरात्रेण यक्ष्ये. प्रजामवाप्नवानीति । सर्वमतिरात्रवत् ॥ ४० ॥

विषुवता ज्येष्ठो ज्यैष्ठिनेयो ज्यैष्ठ्यमाप्नोति ॥ ४१ ॥

द्विभार्यस्य ज्येष्ठायाः पुत्रो ज्यैष्ठ्यकामो यजेत । विषुवताऽतिरात्रेण यक्ष्ये ज्यैष्ठ्यमवाप्नवानीति । नामधेयाद्विषुवद्धर्माः । न षोडशिमान् । तस्यांशिन प्रातस्तु.त.तमुपाकरोतीति भरद्वाजः । तथैवातिग्राह्याः । स्वारसाम्न्या मध्याः सौर्या वोपालम्भः । एकविंशतिः सामिधेन्यः ॥ ४१ ॥

गोष्टोमेन भ्रातृव्यवता ॥ ४२ ॥

यजेतेति शेषः । गोष्टोमेनातिरात्रेण यक्ष्ये. भूतिमवाप्नवानीति । न षोडशिमान् ॥ ४२ ॥

आयुषा स्वर्गकामः ॥ ४३ ॥

यजेत । आयुषाऽतिरात्रेण यक्ष्ये, स्वर्गं लोकमवाप्नवानीति । शेषमतिरात्रवत् ॥ ४३ ॥

अभिजिता पशुकामः ॥ ४४ ॥

यजेतेति शेषः । अभिजिताऽतिरात्रेण यक्ष्ये, पशुमान्भूयासमिति संकल्पः । षोडशिमानभिजिद्धर्माः पशवश्चैकादश एकयूपमित्यादि ॥ ४४ ॥

विश्वजिता ग्रामकामः ॥ ४५ ॥

यजेतेति शेषः । विश्वजिताऽतिरात्रेण यक्ष्ये, भ्रातृव्यजयार्थमिति । विश्वजिद्धर्मा षोडशिमान् । सर्वस्वदानम् । उदवसाय रोहिणीमित्यादि ॥ ४५ ॥

त्रिवृता ब्रह्मवर्चसकामः ॥ ४६ ॥

यजेतेति शेषः । त्रिवृताऽतिरात्रेण यक्ष्ये, अन्नाद्यं ब्र[illegible] वा संकल्पः । षोडशिमान् । सर्वं ज्योतिष्टोमातिरात्रवत् ॥ ४६ ॥

पञ्चदशेन वीर्यकामः ॥ ४७ ॥

यजेतेति शेषः । पञ्चदशेनातिरात्रेण यक्ष्ये प्रजामवाप्नवानीति । षोडशिमान् ॥ ४७ ॥

सप्तदशेन प्रजाकामः ॥ ४८ ॥

सप्तदशेनातिरात्रेण यक्ष्ये प्रजामवाप्नवानीति । सर्वं पूर्ववत् ॥ ४८ ॥

पञ्चत्रिंशेन प्रतिष्ठाकामः ॥ (ख० १२) ॥ ४९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने

पञ्चमः पटलः ।

एकत्रिंशेनातिरात्रेण यक्ष्ये, प्रतिष्ठार्थमिति संकल्पः । अत्रैकयूप वैका(अत्र काप-र्दिकादर्शिनी वेत्युपदेशः । अतिरात्रश्चरम इति वचनात्त्रयोदशातिरात्राः सहस्रदक्षिणा-युक्ताः । तस्मादादावन्ते च नैवातवीयाः । अश्वतरश्चैकाहाः समासाः ।

अथ षोडशिकल्पमितिविकल्पः । प्रकृतावतिरात्रे विकृतौ कारणात्तु नियम्यते । यत्र विरा-ट्संपत्तिमाह विराजं संपद्यत इति । स्तोत्रियाणां यत्र विराट्संपत्तिः षोडशिना प्रयुज्य-मानेन संपद्येत तत्र ग्रहीतव्यः । यत्र त्वगृह्यमाणेन संपद्यते विराण्न तत्र प्रयोक्तव्यः । एकाहिकेष्वतिरात्रेषु ज्योतिःषु प्रयुज्यते । अनुक्रमणात् । तथा सर्वस्तोमे चाप्तोर्यामे च । न च सप्तदशानुक्रान्तः । तथा विषुवति [illegible] नुक्रान्तः । तथैकस्तोमेषु द्वादशाहे ह्यतिरात्रे गृह्यते । तथा विराट्संपद्येत । त्रीणि ज्योतींष्यपि सप्तैते स षोडशीति वचनाच्च । द्वादशाहे गवामयनातिरात्रयोः षोडशिग्रहणं पुरस्ताद्विषुवतः ‘ षोडशिनमुपयन्ति ’ इति ब्राह्मणेनातिरात्रयोः षोडशिग्रहणमेव वा ‘ ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञः ’ इत्यधिकृत्य ‘ न संस्तुता विराजमभिसंपद्यन्ते द्वे चर्चा-वतिरिच्येते ’ इत्यग्निष्टोमेषु सत्सु स्वरसामसु द्वयोः स्तोत्रियर्योरतिरेके षोडशिनः प्रयोगे तस्मादतिरात्रयोर्विप्रतिषेधाद्विकल्पो वा गवामयने त्वर्हानन्त्याम्नानात्सद्विरात्रस्याप्तोर्यामेऽ-हनि प्राप्त्या इत्यादिना तस्यान्यथा समाम्नात एव षोडशिनोऽतिरात्रसत्रेषु द्वादशा-हिकोऽतिरात्रो गृह्यते । अथा(त्र) तु प्रकृतौ विकल्पः ।

सत्रसंस्थयोरेकाहेषु प्राप्त यथा गृह्यते न वा त्रयोदशातिरात्रे सर्वस्तोमे ग्रहणमु-त्तमाप्तोर्यामातिरात्रे च सत्रे सर्वस्तोत्रे ग्रहणम् । यत्र त्वाम्नातस्तत्र ग्रहणमेव । यथा षोडशिनो भवन्ति । यत्र त्वतिरात्रमात्रचोदना तत्र प्रकृतावेव विकल्प इति षोडशि-कल्पः ॥ ४९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां

प्रयोगचन्द्रिकायां सप्तदशप्रश्ने पञ्चमः पटलः ।

अथ सप्तदशप्रश्ने षष्ठः पटलः ।

अथाहीना उच्यन्ते—

द्विरात्रप्रभृतय उपरिष्टादतिरात्रा अहीना एकादशरात्रात् ॥ १ ॥

द्विरात्रादयोऽप्यहीनाः क्रमेण विधीयन्ते । सर्वे च हीना अन्यतरतो(तोऽ)तिरात्रा भवन्ति । यदि चैवाहीनो यदि च सत्रम् । उभयतोऽतिरात्रो द्वादशाहो भवति, आदेशात् । अन्यथाऽहीनोऽप्युभयतोऽतिरात्रो भवति । सर्वमुत्तरत्र वक्ष्यते । चत्वारो द्विरात्रा व्युष्टिद्विर · · · · · · · · । तत्र व्युष्टिद्विरात्रो राज्ञां विहित ॥ १ ॥

तेषां द्वादशाहेनाहीनभूतेन कल्पो व्याख्यातः ॥ २ ॥

गतः ॥ २ ॥

द्विरात्रस्य त्रिरात्रस्य चतूरात्रस्य पञ्चरात्रस्य
सप्तरात्रस्य नवरात्रस्योत्तममैन्द्रवायवाग्रम् ।
शुक्राग्रं वा ॥ ३ ॥

गृह्णातीति शेषः । प्रथमो व्युष्टिद्विरात्रः । व्युष्टिद्विरात्रमौपवसथ्यान्तं कृत्वा वसतीवरीः परिहृत्य परिस्तरणान्तं कृत्वा महारात्रे बुद्ध्वा ज्योतिष्टोमोऽग्निष्टोम ऐन्द्रवायवाग्र इति ॥ ३ ॥

द्विरात्रस्योत्तरेऽहन्षोडशिनं गृह्णाति ॥ ४ ॥

द्विरात्रस्यैन्द्रवायवाग्रं प्रथममह शुक्राग्रमुत्तरम् । त्रिरात्रस्यैतच्चैवाऽऽग्रयणाग्रं च । चतूरात्रस्यैतच्चैवैन्द्रवायवाग्र च । पञ्चरात्रस्यैतच्चैव शुक्राग्र च । षड्रात्रे द्वि परिवर्तते । सप्तरात्रस्यैतच्चैन्द्रवायवाग्र च । अष्टरात्रस्यैतच्चैव शुक्राग्रं च । नवरात्रे त्रि परिवर्तते । दशरात्रस्यैतच्चैवैन्द्रवायवाग्र च । एकादशरात्रस्यैतच्चैव शुक्राग्र च । द्वादशरात्रे चतु परिवर्तते । षोडशिनो ग्रहण द्विरात्रस्योत्तरेऽहनीति (२२-१४-१-१४) ॥ ४ ॥

मध्यमे त्रिरात्रस्य चतूरात्रप्रभृतिषु नानाऽहीनेषु ॥ ५ ॥

ग्राह्यो मध्यमे त्रिरात्रस्य । चतुर्थे चतुर्थे चतूरात्रप्रभृतिषु नानाऽहीनेषु (आप० श्रौ० २२-१४-१५) इत्यापस्तम्ब । कापेयानामेकादशिनाना च विकल्पो लभ्यते । दशसहस्रं ददाति । पत्नीसंयाजान्तमहीनसंततयः । श्वोभूतेऽतिरात्रः शुक्राग्रः । ऐकादशिनानां षट्कं दशसहस्रं ददाति । एवमुदवसानीयान्तम । अतिरात्रः षोडशिमान् । एवं तण्डिना वक्ष्यामि. । तैत्तिरीयाणा स्वर्ग फलमाम्नातम् । छन्दोगानां नित्य एवेति ॥ ५ ॥

आङ्गिरसेन यः पुण्यं ऽहीन इव स्यात्स एतेन यजेत ॥ ६ ॥

अथाङ्गिरसा द्विरात्रो विधीयते ॥ ६ ॥

तस्य ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति ॥ ७ ॥

अभिप्लव इत्यस्य व्याख्यानं ज्योतिष्टोम इति । तत्र हि ज्योतिष्टोमे निरूपितास्त्रि-वृदादयश्चत्वारः स्तोमाः क्रियन्ते । तेजस्तेनावरुन्धे (७–१–४) इति श्रुतेस्तद-नुष्ठानेन तेजः प्राप्नोति ॥ ७ ॥

सर्वस्तोमोऽतिरात्र उत्तरम् ॥ ८ ॥

सर्वस्तोमरूपतोऽतिरात्र इत्यनेन त्रिणवत्रयस्त्रिंशस्तोमाभ्यां सहिता अशेषस्तोमा उक्ताः । सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै (तै० सं० ७–१–४) इति ब्राह्मणम् । द्वादशभिः स्तोत्रैरुपेतोऽग्निष्टोम एकोनत्रिंशद्भिः स्तोत्रैरुपेतोऽतिरात्र इति तयोर्भेदः ॥८॥

अथ होतारं प्रति प्रयोक्तव्ये स्तोत्रे दिनभेदेन सामविशेषं विधत्ते––

गायत्रं पूर्वेऽहन्साम भवति । त्रैष्टुभमुत्तरे ॥ ९ ॥

गायत्रीछन्दस्कायामृच्युत्पन्नं गायत्रमेतन्नामकं साम । तदेतद्धोतुराभिमुख्येन पठनीये स्तोत्रे गायेत् । तदेतत्पूर्वेऽहनि द्रष्टव्यम् । यद्यपि त्रैष्टुभाख्यं किंचित्साम नास्ति तथाऽपि त्रिष्टुप्छन्द[illegible]त्युत्पन्नं तदेतदुत्तरदिने गायेत् ॥ ९ ॥

अथ पृष्ठस्तोत्रे सामविशेषं चोदकप्राप्तविकल्पनिवारणाय नियमयति––

रथंतरं पूर्वेऽहन्साम भवति ॥ १० ॥ बृहदुत्तरे ॥ ११ ॥

प्रकृतौ तु बृहद्रथंतरयोरैच्छिको विकल्पः । इह तु दिनभेदेन व्यवस्था ॥१०॥११॥

पुनरपि दिनभेदेन व्यवस्थितं सामान्तरं विधत्ते––

वैखानसं पूर्वेऽहन्साम भवति षोडश्युत्तरे ॥ १२ ॥

तदाहुः क्व जगती चानुष्टुप् चेति (तै० सं० ७–१–४) इत्यत्र ब्रह्मवादिनश्चोद-यन्ति––अत्र विद्यमाने द्वे एवाहनी । तयोः पूर्वस्मिन् गायत्र्यामुत्पन्नं साम गीतम् । तदुत्तरस्मिंस्तु त्रिष्टुभ्युत्पन्नं साम गीतम् । न ह्यत्र तृतीयचतुर्थे अहनी विद्येते । ततो जगत्यनुष्टुभौ क्वावतिष्ठेते इति । तत्राभिज्ञाः सामान्तर[illegible]:–– यद्बृहत्यामृच्युत्पन्नं वैखानसाख्यं साम तत् पूर्वदिने गायेत् । बृहती च षट्त्रिंशदक्षरा सती चतुर्वारमावर्त्यमाना जगतीत्रयं संपद्यते । अष्टाचत्वारिंशदक्षराणां जगतीनां तिसृणामक्षरसंख्यया बृहतीचतुष्टयसमानत्वात् । तेन वैखानससाम्नाऽयं द्विरात्रयागो जगत्याः सकाशान्नापैति । षोडशिशब्देन षोडशस्तोत्रे गीयमानं गौरवीताख्यं सामोच्यते । तच्चोत्तरेऽहनि गायेत् । तदाधारभूतामृचमवलम्ब्य पूर्ववदनुष्टुभं संपादयेत् । तेन षोडशिसाम्नाऽयं द्विरात्रोऽनुष्टुभः सकाशान्नापैति ।

ननु अङ्गिरसां द्विरात्रे षोडशिनः प्राप्त्यभावादप्राप्तविधानान्न परिसंख्या । ततश्च त[illegible]द्विरात्रेष्वपि गृह्यत इति वृत्तिकारमतिः । भाष्यकारमते तु द्विरात्रान्तरेषु परि-

संख्यातत्त्वेन षोडशिनियतसंख्याभावादाङ्गिरसां द्विरात्र एव नियमेन षोडशी गृह्यते (जै० सू० १०-५-१३) इति ॥ १२ ॥

अथ दिनभेदेन निधनविशेष विधत्ते—

हविष्मन्निधनं पूर्वमहर्भवति । हविष्कृन्निधनमुत्तरम् ॥ १३ ॥

पञ्चधा विभक्तस्य साम्नः पञ्चमभागो निधनम् । हविष्मच्छब्दरूपं निधनं यस्मिन्नहनि तद्धविष्मन्निधनम् । पूर्वदिने हविष्मदिति शब्दः प्रयोक्तव्य इत्यर्थः । एवमितरत्रापि । उत्तरस्मिन्नहनि हविष्कृच्छब्द इत्यर्थः ॥ १३ ॥

अथ दिनद्वयस्य पक्षव्यवस्था विधत्ते—

अमावास्यायां पूर्वमहर्यजनीय उत्तरम् ॥ १४ ॥

शुक्लः कृष्णो वैक एव पक्षः समानोऽर्धमासः । तस्मिन्नेव यद्युभे अहनी स्यातां तदानीमेकपक्षगतत्वादेकस्याह्नो यावद्वीर्यं तावदेव भवेत् । इतरस्य वीर्यं तु लुप्येत । अतः कृष्णपक्षस्यान्तिमदिने प्रथममहः कर्तव्यम् । शुक्लपक्षस्य प्रथमदिने द्वितीयमहः । एवं सति भिन्नार्धमासवर्तित्वाद्भिन्नवीर्ये भवतः ॥ १४ ॥

कापिवनेन यं कामं कामयेत तमेतेनाभ्यश्नुते ॥ १५ ॥

एतेन कापिवनेन सर्वकामानां प्राप्तुं शक्यत्वादिमं कापेयं कुर्यादिति भावः ॥१५ ॥

तस्य ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति । अतिरात्र उत्तरम् ॥ १६ ॥

अग्निष्टोमस्य तु प्राथम्यं 'तस्मादाहुर्ज्येष्ठयज्ञ.' इति वाक्येनोक्तम् । तत्प्राथम्यवत्प्राथम्यमतिरात्रस्यापि वैकल्पिकमस्ति। अत एव सूत्रकारेणोक्तम्। 'अग्निष्टोमः प्रथमयज्ञोऽतिरात्रमेके पूर्वं समामनन्ति' इति ॥ १६ ॥

चैत्ररथेन सर्वमन्नाद्यमवरुन्धे ॥ १७ ॥

चैत्ररथेन प्राणेष्वन्नाद्ये च प्रतितिष्ठति (२२-१४-२२) इत्यापस्तम्बः । चैत्ररथेन द्विरात्रेण यक्ष्य । प्राणेष्वन्नाद्ये च प्रतितिष्ठति न्याख्यातः फलवादः ॥ १७ ॥

तस्य त्रिवृत्पञ्चदशोऽग्निष्टोमः पूर्वमहरायुरतिरात्र उत्तरम् ॥ १८ ॥

अत्र सर्वत्राहःशब्देनैकदिनसाध्यः स्तोमप्रयोग उपलक्ष्यते । अभिप्लवाख्यः कश्चित्षडहयागविशेषः । तस्य च प्रथमदिने ज्योतिष्टोमप्रथमसंस्थारूपोऽग्निष्टोमो विहितोऽस्ति । स एवात्राभिप्लवशब्देनोपलक्ष्यते । सोऽत्र पूर्वमहर्भवति पूर्वदिनेऽनुष्ठेय इत्यर्थः । द्वितीयदिने सोऽतिरात्रोऽनुष्ठेय इत्यर्थः ॥

अग्निष्टोमः पूर्व आयुरतिरात्र उत्तर इति भरद्वाजोऽपि । षोडशिमानाङ्गिरसादिषु विशेषनादयोऽङ्गभूता इति केचिदिच्छन्ति । ज्योतिष्टिरात्रप्रकृतिरिति । ज्योतिष्टिरात्रस्य राजसूयकरणभूतस्यापि विशेषनाद्येऽङ्गभूता इति केचिदिच्छन्ति । ज्योतिष्टिरात्रविध्यन्तामत्र य उत्तरास्तथाऽप्याङ्गिरसचैत्ररथकापिवनपृष्ठ्या षडहस्यैवाऽऽद्या गोविकारे अहनी अतिरात्रस्तु सर्वस्तोमोत्तरमेव । पञ्च पूर्वं [illegible] पर तथैव नामधेयगता धर्माः प्रवर्तन्ते ॥ १८ ॥

गर्गत्रिरात्रेण वसून् रुद्रानादित्यानभ्यारोहति ॥ १९ ॥
एषु लोकेषु प्रतितिष्ठति ॥ २० ॥ अग्निष्टोम उक्थ्योऽति-
रात्रश्चाहानि रथंतरं वामदेव्यं बृहदिति पृष्ठानि ॥ २१ ॥

गर्गत्रिरात्रस्य कर्म—गर्गत्रिरात्रेण यज्ञेन वसूनां रुद्राणामादित्यानां सायुज्यार्थमिति । पृथक्त्वे स्वर्गोऽपि फलम् । द्वादशाहवदारम्भकाल इति ॥ १९ ॥ २० ॥ २१ ॥

आग्नावैष्णव एकादशकपालः सारस्वत-
श्चरुर्बार्हस्पत्यश्चरुरिति ॥ (ख० १३) ॥
दीक्षणीया त्रैधातवीया वा ॥ २२ ॥

इयांस्तु विशेषः – शिशिरे पर्वण्यारम्भः । सर्वं दानं कृत्वा त्रैधातवीया । प्रश्ने कृतेऽर्हीनो गर्गत्रिरात्रः । त्रैधातवीयां कृत्वा बृहस्पतिरदर्गाहिनेत्यादि वा पशुयागान्तमग्निवत् । ततः प्रवर्ग्यसंभरणं च काठकश्रैधातवीयान्तं कृत्वा सावित्रसाग्निचित्य इति सकल्पोपकल्पनमुभयपक्षे दीक्षणीया त्रैधातवीया भवति ॥ २२ ॥

बभ्रुररुणा रोहिणी पिङ्गाक्ष्येकहायनी सोमक्रयणी ॥ २३ ॥

तदेव रूपं स्पष्टीक्रियते—रोहिणी शरीरे लोहितवर्णा पिङ्गला पिङ्गलाक्ष्येकहायन्येकसंवत्सरवयस्का, ईदृशी सती लावण्योपेतं रूपं च कृत्वा गवामन्यासां त्रयस्त्रिंशत्संख्यया शतत्रयसंख्यया च सह जलादुदक्रामत् । यस्मात्सोमार्थं रोहिण्यादिरूपं धृतवती तस्माद्रोहिण्यैकहायन्या पिङ्गलाक्ष्या सोमं क्रीणीयात् । 'तामप्सु प्रावेशयन्त्सोमायोदेहि' (७-१-६) इति श्रुतेः ॥ २३ ॥

सहस्रं दक्षिणा प्रथमेऽहस्त्रीणि च शतानि नयेत् ।
त्रयस्त्रिंशतं चैवं द्वितीये (तृतीये च) सहस्रयातिरि-
च्यते । द्विरूपा रोहिण्युभयत एन्यन्यत एनी वा ॥ २४ ॥

प्रतिदिनमविच्छिन्नानि यथा भवन्ति तथा त्रीणि त्रीणि शतानि ददाति । त्रयस्त्रिंशत्संख्याया अप्येतदुपलक्षणम् । तथा सत्येकस्मिन्दिने त्रयस्त्रिंशदधिकं गवां शतत्रयं दद्यादित्यर्थो भवति । उभयत एनी स्यात् (तै० सं० ७-१-६) इति । उभयोः पार्श्वयोः शुक्लरेखा यस्याः सेयमुभयत एनी । अथ प्रकारान्तरेण लक्षणं विधत्ते—

तदाहुरन्यत एती स्यात्सहस्र परस्तादितम् (७–१–६) इति । तस्मिन्सहस्रतमी-विषयेऽभिज्ञा एवमाहुः—अन्यतरस्मिन्नेव पार्श्वे शुक्ला स्यादिति । तत्रोपपत्तिं चैव-माहुः—एतं परस्तात्सहस्रमेतस्य गोविशेषस्य परभागे गोसहस्रं तिष्ठत्यतो न तत्र शुक्लरूपाऽपेक्षितेति ॥ २४ ॥

तां प्रथमेऽहनि नयेत् । उत्तमे वोत्तमा ॥ २५ ॥

ता दातव्या गाम ॥ २५ ॥

प्रथमेऽहनि देयस्त्वमग्ने सहस्रमानयोद्वल्लस्याभिनस्त्वम् । स नः सहस्रमानय प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति ॥ उद्भूष्ट्रिस्तमनुमन्त्रयेत । वेद्द्वितीये त्वमपामोषधीनां रसेन रसिनी बभूविथ । सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति वेहतं वामनस्तृतीये प्रतिष्ठाऽसि सहस्रस्य वैष्णवो वामनस्त्वम् । स नः सहस्रमाधेहि प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति ॥ २६ ॥

दातुं योग्या देय । योऽस्य वर मेय सहस्रतमी (७–१–६) इति । गतमन्यत् ॥ २६ ॥

वामनं त ऽयेष्ठ्यर्थेनं सहस्रमुत्सृजति ॥ २७ ॥

ऋत्विग्भ्यो निष्क्रीता ता सहस्रतमी स्मृता गृह निरस्तेनान्त्विजे ॥ २७ ॥

यत्तेनैकां प्रतिवरं प्रत्युत्सृजेयुस्तादेकसहस्रयाजी पुनः सहस्र प्रजायते ॥ २८ ॥

यस्मात्सहस्रतमी श्रेष्ठो गोविशेषस्तस्माच्छ्रेष्ठ दत्त सत्यस्य यजमानस्य सहस्रस्वरूपा सा सहस्रतमी दत्ता भवति । यस्माच्छ्रेष्ठो गोविशेष. सहस्रसदृशस्तस्माच्छ्रेष्ठ गोविशेष न प्रतिगृह्णीयात् । तत्प्रतिग्रहे सति गोसहस्रप्रतिग्रहदोषो भवेत् । अथ कथंचित्प्रति-गृह्णीयात्तदानीमेव निर्दिशेत् । योऽस्य वर. मेय सहस्रतमीति । एवं निर्दिश्याथान्या प्रत्येवं ब्रूयात् । इय वरस्यातिरिक्ता ममेति । एव निर्देशे सति वरप्रतिग्रहेऽपि सहस्रप्रति-ग्रहदोषो न भवति ॥ २८ ॥

दानव्यायास्तस्या गोराघ्रापण विधत्ते—

तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्यान्ते द्रोणकलशमवघ्रापयेत् ॥ २९ ॥

अग्नीधः शरणमाग्नीध्रं तस्योत्तरभागे तां दात्तव्यां गां प्रदक्षिणत्वेनाऽऽनीयाऽऽहवनीयस्य समीपे द्रोणकलशस्थितं सोममवघ्रापयेत् ॥ २९ ॥

दक्षिणेन वा वेदिं नीत्वाऽन्तरा यूपमाहवनीयं चावस्थाप्याऽऽग्नीध्रहविर्धानयोर्वाऽऽजिघ्र कलशमिति द्रोणकलशमवघ्रापयेत् ॥ ३० ॥

[illegible] मन्त्रान्तः ॥ ३० ॥

उदीचीमाग्नीध्रमानीय तस्यां तार्यमध्यस्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यामुभा जिग्यथुरिति आग्नीध्रे जुहोति । तस्मिꣳस्तार्प्येऽधिष्णियानां रूपं विग्रथितं भवति ॥ ३१ ॥

आहवनीयसमीपे स्थितया तया गवा सह पुनराग्नीध्रसमीपे प्रत्यागत्य तस्याऽऽग्नीध्रस्य पूर्वभागे प्रत्यङ्मुखत्वेन गवि स्थितायां जुहुयात् । होमाङ्गभूतो मन्त्रः । तदैरयेथामिति मन्त्रान्तः । इन्द्राविष्णू देवते । त्रेधा सहस्रमिति मन्त्रभागस्य तात्पर्यं दर्शयति—' त्रेधा विभक्तं वै त्रिरात्रे सहस्रꣳ साहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां करोति ' (तै० स० ७—१—७) इति । त्रिरात्राख्ये यागे गोसहस्रं दित्सतां त्रेधा विभक्तत्वमिति यत्तेनैतां सहस्रतमीमिव गां साहस्रीं सहस्रोपेतां करोति न केवलं सहस्रोपेतां किंतु तस्य सहस्रस्य यावती मात्रा तावन्मात्रामेवैनां करोति । अथैतदङ्गभूतं होमान्तरं विधत्ते—रूपाणि जुहोति (७—१—७) इति । रोहिणी पिङ्गलैकहायनीत्यादीनि यानि रूपाण्युक्तानि तानि जुहुयात् । रोहिण्यै स्वाहेत्यादयो मन्त्रास्सत्राज्ञेयाः ॥ ३१ ॥

अथैतदङ्गभूतं जपं विधत्ते—

प्रतीचीꣳ सदसः सक्तिमानीयेडेरन्त इति तस्या दक्षिणे कर्णे जपति ॥ ३२ ॥

तस्या गोः कर्णसमीपं प्रत्युपस्थितो भूत्वा मन्त्रं जपेत् । सूनादित्यन्तः ॥ ३२ ॥

तामुत्सृज्य विज्ञानमुपैति यस्य पुरुषाभिवीता प्राची यादरात्सीदयं यजमानः (स्व० १४) ॥ कल्याणं लोकमजैपीदिति विद्यात् । यदि दक्षिणा क्षिप्रेऽस्माल्लोकात्प्रैष्यतीति विद्यात् । यदि प्रतीची बहुधान्यो भविष्यतीति विद्यात् । यद्युदीची भयानस्मिल्लोके भविष्यतीति विद्यात् ॥ ३३ ॥

ता गामित्यादि व्याख्यातम् ॥ ३३ ॥

तस्याः सहस्रतम्या दानं विधत्ते—

ताममीधे वा ब्रह्मणे वा होत्रे वाऽध्वर्यवे वा दद्यात् ॥ ३४ ॥

सहस्रमस्य सा दत्ता भवति (६—१—७) इति हि ब्राह्मणवचनात् ॥ ३४ ॥

द्वौ वोद्गातारौ कुर्वीत यतरो नाऽऽश्रावयेत्तस्मै दद्यात् । द्वे वा तृतीये ब्रह्मणे दद्यात् । तृतीयमग्नीधे ॥ ३५ ॥

नाऽऽश्रावयेत्तस्मै दद्यादिति पैङ्गचब्राह्मणे समाम्नानाच्च ॥ ३५ ॥

सा मा सुवर्गं लोकं गमय सा मा ज्योतिष्मन्तं लोकं गमय सा मा सर्वान्पुण्याँल्लोकान्गमय सा मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्मा विशताद्रयिरित्यभिमन्त्र्य ददातीति ॥ ३६ ॥

तां प्रतिगृह्णीयादेकाऽसि न सहस्रमेकां त्वां भूतां प्रतिगृह्णामि न सहस्रमेका मा भूता विश सा सहस्रं स्योनाऽसि सुपदा सुशेवा स्योना मा विश सुपदा मा विश सुशेवा मा विशेति ॥३७॥

यो मन्त्रमविद्वान्सहस्रतमीं प्रतिगृह्णीयादस्य गोसहस्रं प्रतिगृहीतं भवति तावान्प्रत्यवाय इत्यर्थः । अत एकाऽसीत्यादिमन्त्रेण तां सहस्रतमीं प्रतिगृह्णीयात् ॥ ३६ ॥ ३७ ॥

तामन्यया गवा निष्क्रीय यजमानस्य गोष्ठेऽवसृजति ॥ ३८ ॥

गत. ॥ ३८ ॥

यास्मिन्नस्मिंस्त्रिंशत्यपि तामुपसमाहृत्य दश प्रथमेऽहन्याशिरे दुहन्ति । विंशतिं द्वितीये त्रिंशतं तृतीये ॥ ३९ ॥

सर्वत्र दुहन्तीत्यन्वयः ॥ ३९ ॥

कृतान्नं प्रथमेऽहनि देयम् । हिरण्यं गोवास इति द्वितीये । अतो रथोऽश्वो हस्ती पुरुष इति तृतीये ॥ ४० ॥

१ क. ख. ग. मध्यमेऽहनि देयमथ यद्धाना यदतो नवग्रो गद्धान्युग्या पञ्चाशता नाऽरण्य तदुत्तमेऽहनि देयम ।

कृताश्च कृ॰ गाढाभिर्व्यक्ताः । इदमिति सर्वत्रान्वयः । अत शकट ॥ ४० ॥

य आर्षेयो विद्वांस्तस्मै प्रथमेऽहनि दद्यात् । योऽनार्षेयो विद्वांस्तस्मै द्वितीये । य आर्षेयोऽविद्वांस्तस्मै तृतीये ॥ ४१ ॥

नार्षेयाय नार्षेयस्तस्मै । एतमुक्तत्वेन दृश्यम ॥ ४१ ॥

दक्षिणा नयन्त्यूना दशतो नयत्यस्मा एकां गां विंशेभ्यश्चोदशभ्यो दशतमुपसमाकुर्यात्तस्मै पञ्च भ्यस्तेभ्यो दशतं यस्मै तिस्रस्त्रिभ्यस्तेभ्यो दश तमनेकस्मै चेका यस्य पञ्च द्वाभ्यां ताभ्यां दशतमेवमा शतादा वा सहस्रात्सहस्रमिति किञ्चिद्द्यात् ॥ ४२ ॥

गतं ॥ ४२ ॥

यदि उद्यादनूचनस्यार्षेयाय हुतायां दद्यादुदवसानीयायां वेष्ट्यान्तमा दक्षिणा नान्वोदवसाय वा ॥ ४३ ॥

विकल्पः ॥ ४३ ॥

शबलि समुद्रोऽसि विश्वव्यचा ब्रह्मा देवानां प्रथमजा ऋतस्यान्नमसि शुक्रमसि ज्योतिरसि तेजोऽस्यमृतमसि तां त्वा विद्म शबलि दीद्यानां तस्यास्ते पृथिवी पादोऽन्तरिक्षं पादो द्यौः पादः समुद्रः पादः परो रजास्ते पञ्चमः पाद एषाऽसि शबलिः सा न इषमूर्जं धुक्ष्व वसोर्धारायै शबलि प्रजानायै श्रविष्टाव्रतमपरोपायै स्वाहेति शबलिहोमं जुहोति ॥ ४४ ॥

शबलिरिति होमस्य संज्ञा ॥ ४४ ॥

नित्यः काम्यो वा ॥ (ख० १५) ॥ ४५ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने षष्ठः पटलः ॥

अथ पद्धतिः—रोहिणीं पिङ्गलां महायज्ञीं त्रिंशतामन्यतमा सहस्रदक्षिणा कृत्वा त्रिशत्क्रतवो नवगुणितः पृथगुपस्थानम् । रात्रौ वसतीवरी परिहृत्य पयसा विशसनकाले व्रतदुहाऽऽशिराय जुहोति । महारात्रे बुद्ध्वा प्रातः नयत्यग्निष्टोमः । ऐन्द्रवायवाग्रः । पशुकाले यूपत्रयस्योच्छ्रयणमहितः पर्यग्निकृच्छित्रः । कांपेयानामेकादशिनानामादित्रय आलभन्ते । आसिरोऽसिष्ठ आसिष्ठस्योत्तरेणेन्द्रः । दक्षिणतश्चासिष्ठस्येन्द्रः । अथोपशथनि-

देश. । कृष्णमृगस्ते पशुरिति सहस्रं दक्षिणा । गवामितरासां त्र्यहं विभज्य दानम् । त्रयस्त्रिंशच्च त्रीणि च शतानि प्रथमेऽहनि ददाति । एवं द्वितीये तृतीये च सहस्रस्यातिरिच्यते सहस्रपूरणी । सा तु रोहिणी उपवस्ता त्रिस्रा शुक्लकृष्णवर्णा उभयत एनी उभयत. शुक्ला दक्षिणां होमौ हुत्वा दिवं गच्छेत्यादि त्रयस्त्रिंशच्च त्रीणि शतानि ददाति । अश्वतरोऽपि दीयते । सहस्रदक्षिणां कृत्वा दक्षिणादानकाले न्यूना दशतो नयेत् । दशसंख्यया हीना नयेत् । न दश ना दश नेत्यभिप्रायः । दशतं न विच्छिन्द्यादिति श्रुतेः । यास्मिन्सर्वा त्रयस्त्रिंशत्याधिकास्तासां न दशत्वम् । नयनकाले उत्तमेऽहनि दशत्वसंपत्तिः सहस्रतम्या सह । अधिकानां त्रिगुणा त्रिशता दशकेन सह नयनम् । एकादशैकादशदशत न विच्छिन्द्यादिति दशानां न्यूनतैव प्रतिषिद्धा न विकृता । एवं दक्षिणासु नीयमानासु प्रथमदशकं उद्भूतिर्भूत्वा उत्सृष्टस्त यजमानोऽनुमन्त्रयते नमस इति । प्रदानकाले च दशसंख्याया न्यूनता । तदुक्तं यस्मादेका गा दास्यन्स्यादिति तस्मादेव दानं प्रथमं तावन्मुख्यानां चतुर्णां पार्श्वानां चतुर्णां तृतीयानां च द्वयोरेकैकाम् ।

अथ तृतीयानां चतुर्णामेकस्य च द्वे द्वे । अथ पार्श्वानां द्वितीयानां त्रयाणां तृतीयानां द्वयोर्विगृहीतयोर्द्वे द्वे एवं सति पार्श्वानां द्वितीयानामेव द्वे द्वे । तृतीयानां द्वयोश्चतस्रो द्वयोस्तिस्रोऽर्धिना मुख्यानामेकैका महासंख्या त्रिशतं । अथ मुख्यानां द्वाभ्यां पञ्च पञ्च पुनश्च पञ्च पञ्च मूर्धा(अर्धि ना द्वाभ्यां द्वाभ्यां पञ्च पञ्च महासंख्या भवति । अथ मुख्यानां चतुर्णां पार्श्वा(द्वि)ना चतुर्णां तृतीयानां द्वयोश्चैकैकामेव शतं संपद्यते । एवमुत्तरशतद्वयं त्रिंशच्च प्रथममुख्यानामर्धि(र्धि ना तृतीयानां द्वयोरेका तृतीयानां चतुर्णां पार्श्वाद्वितीयानामेकैकस्य च द्वे द्वे । पार्श्वा(द्वि)ना त्रयाणां तृतीयानां विगृहीतयोश्च द्वे दत्त्वा विरामः ।

यास्मिंस्त्रोऽधिका मुख्यानां त्रयाणामेकैका तत्र न दोषः । उत्तमेऽहनि दशत्वसंपत्तिरेवमुत्तरष्वह सु शतत्रयस्य त्रिशतां त्रिगुणा च दानं, त्रिशतां तु विशेषः —मध्यमेऽहनि मुख्यानां पञ्च पञ्च पुनश्च मुख्यानां द्वयोः पञ्च पञ्च त्रिगुणामधिकानां मुख्यानामेकस्यैकाऽर्धि(र्धि ना द्वयोरेका । उत्तमेऽहनि त्रिशतां विशेषः —मुख्यानां द्वयोः पञ्च पञ्चार्धि(र्धि)ना द्वयोः पञ्च पञ्चाधिकानां त्रिगुणानामर्धानां द्वयोरेकैका तृतीयानामेकस्यैका । एवं कृते सहस्रतमी आग्नीध्रस्यैव । एवं सहस्रापत्तिः ।

अथ द्वादशच्छेदनमेव प्रतिषिध्यते । दशतं न विच्छिन्द्यादिति । अतिरिक्ते न दोषः, इत्यस्मिन्पक्षे त्रिशतामधिकानां त्रिगुणामेव विभागः प्रथमेऽहनि त्रिशतां प्रथममुख्यानां पञ्च पञ्च तमृणा दानं तदा त्रिगुणा पदपदं मध्यमेऽहन्यर्धि(र्धि)ना मुख्यानां च द्विकेन सह त्रिगुणा दानमुत्तमेऽहनि द्विकेन सहैव उद्गातुरिति । पत्नीसंयाजान्तर्हो-नसंस्तवः ।

प्रथमां विशसनकाले ब्रह्मद्वहा सह विंशतिं दहन्ति परिस्तरणान्तम्, महाव्रते बृहद्भ्वास्त्रो नयेत्यादि । उक्थ्य न स्वतिग्राह्या । अत्र षोडशी तैत्तिरीयकश्रुत्या—' त्रैष्टुभं माध्यंदिनस्याह्न आज्यं भवति ' । ' ऐन्द्राणि सूक्तानि शंसति. षोडशिनं शंसति ' इति वचनाच्च । ताण्डिना छन्दोगानां सत्रमध्ये अतिरात्र आम्नातः षोडशी तत्र विकल्प एव न समुच्चयः । सहस्र - स्तोत्रीया इति सूत्रे । शुक्राग्र । पशुकाले आश्विनं गृहीत्वा यूपचतुष्टयस्योपाकरणम् । अग्निष्ठस्य दक्षिणस्य दक्षिणत उत्तरस्योत्तरत पुनर्दक्षिणतश्चोत्तरतस्त्रिवृद्भ्यां पार्श्वयोरग्निष्ठस्योत्तरे सारस्वतमग्निष्ठप्रभृतिदक्षिणतस्तृतीये सावित्रमग्निष्ठ प्रभृत्युत्तरतश्चतुर्थे सौम्य ... ते ऐन्द्राग्नं वैश्वदेवमेव पशवो निर्दिष्टाः । पूर्ववद्दक्षिणाकाले पूर्वं हुत्वा यजमानोऽनुमन्त्रयते । पत्नीसंयाजान्तमहर्निर्मितं तत्र । प्रथमां विशसनकाले त्रिंशतं दहन्त्याशिरान्तं परिस्तरणान्तम् ।

महाव्रते बृहद्भ्वास्त्रो नयेत्यादि अतिरात्र आग्रयणाग्र । पशुकाले आश्विनं गृहीत्वा यूपचतुष्टयस्योपाकरणमग्निष्ठप्रभृति दक्षिणतश्चतुर्थस्य दक्षिणतोऽग्निष्ठप्रभृति । तस्योत्तरतः पुनश्चैवमुत्तरत । अथोपशयनिधानं त्रिवृद्भ्यां पार्श्वयोरग्निष्ठप्रभृत्युत्तरत. पञ्चमे पौष्णं दक्षिणतः पञ्चमे मारुतमुत्तरत पृष्ठ्ये ऐन्द्राग्नं दक्षिणत पृष्ठ्येऽन्ते वारुणम् । अथोपशयनिर्देश —कृष्णमृगस्ते पशावित्ति दक्षिणादानम् । पूर्ववद्दक्षिणासु नीयमानासु वामनो मरुत्यः । यजमानो यथापाठमस्मिन्नन्तमेऽहन्नीत्यनुमन्त्रणान्त कृत्वा ता सहस्रतमीं रोहिण्यूप-वस्त्रादिगुणयुक्ता कल्याणी कृष्णवर्णामसलक्षणा सदस्यतमीमुत्तरेणाऽऽग्नीध्रमण्डपं नीत्वाऽऽहवनीयसमीपे द्रोणकलशं निधाय तं सोममवघ्रापयेत । आ जिघ्र कलशमित्यनेन मन्त्रेण रयिरिति मन्त्रान्त । दक्षिणेन वेदिमिति विकल्प । ... आग्नीध्रमण्डप नीत्वा तस्याः पृष्ठे तार्प्यमवस्थापयति । घृताक्तं वस्त्रं तार्प्यमिति व्याख्यातं वाजपेये राजसूये च । तस्मिंस्तार्प्ये धिष्णिया भवन्ति । सूत्रे चतुरश्राः परिमण्डला वा धिष्णिया उक्ताः । सङ्ख्या द्वादशादय । अथ शब्देन प्रायश्चित्तं कृत्वा पुरस्तादाग्नीध्रमण्डपस्य प्रतीची प्रत्यङ्मुखा स्थापयित्वा रूपाणि जुहोति । यानि तस्या रूपाणि भवन्ति लोहिताय स्वाहेति एवमादीनि । अथ चाऽऽग्नेयमेधिकान्येके समामनन्ति (२२-१६-६) इत्यापस्तम्ब । अज्येतराय स्वाहेत्यादि । प्रतीची प्रत्यङ्मुखा सदसः कोणमानीय तस्या अभिमृश उदेहीति इति यजमानो जपति । उत्थायोत्सृज्य सहस्रतमीं ... । इमितकारकैवत्पापोक्तेण प्रेरित. प्राची दिशं यायाद्वृद्धिं प्राप्नोति यजमान कल्याण लोक जयति । यद्दक्षिणा अस्माल्लोकात्क्षिप्रं प्रयाति । यदि प्रतीची प्रभूतवान्यवाशिर्भविष्यति । यदुदीची श्रेयानस्मिल्लोके तामुत्सृष्टा यजमानोऽनुमन्त्रयते, मा मा सुवर्गं लोकं गमयेति चतुर्भिर्मन्त्रैः । केचिदनुषङ्गं वा पठन्ति । यास्त्रिष्वहःसु

त्रिंशतो नवतिस्तिस्रस्तासु एतां सहस्रतमीं मिश्रित्वा तामग्नीध इत्येवमादिभ्यो ददाति ब्रह्मणे होत्र उद्गात्र उन्नेत्रेऽध्वर्यवे वा दद्यात (२२--१६--११) इत्यापस्तम्ब.। यस्मै ददाति गा तस्य स्वभागो नियम्यते। द्वौ वोन्नेतारौ वृत्वा यतरो नाऽऽश्रावयेत्तस्मै वा इति। दद्यादिति शेषः। उन्नेतारौ द्वौ प्रकृतावप्येक उन्नयति एको हारियोजनं यजति तस्य लिङ्ग सर्पमन्त्रे कपिशर्या उन्नेतारावि ति ताण्डकेऽप्युक्तम्। द्विभागं वा ब्रह्मणे तृतीयमग्नीध इति। अथवा द्विभाग ब्रह्मणे तृतीयमग्नीध इत्येव विभाग.। तदाऽपि स्वभागे नियम.। सर्वेभ्यो वा सदस्येभ्य इति। अथवा सर्वेभ्य. सदस्येभ्य इति। अथवा ऋत्विग्भ्य इति। उदाकृत्य वा सा वशं चरेत्, इत्यादि। उदाकृत्य संस्कृत्य वशं चरेत्। यस्मात्सहस्रात्तस्मिन्महणार्नीत्युक्तम। एका सती-(ऽसी)त्यनेन मन्त्रेण प्राकृतमन्त्रस्य प्रत्याम्नाय.। सदस्याना विधि. (इति) ता शत-मानेन हिरण्येन निष्क्रीय शतमानमविद्धं कृत्वा यजमानस्य गोष्ठे सहस्रतमीं विसृजति, सद एत्य वि सुव इत्यादि शिरोऽहान्तम। यस्मा एका गा दद्यात्र साहस्रेऽपि किंचि-द्दद्यात्। दद्यादित्येके, इत्यापस्तम्बसूत्रम्। ततोऽनुबन्ध्याद्युदवसानीयान्तं कृत्वाऽन्यमा-हवनीयं प्रणीय शबलिहोमान्तम। तत सौत्रामणी मैत्रावरुणी वा। मैत्रावरुणी वा काठक इति भाष्यकृत्।

यक्ष्ये गर्गत्रिरात्रेण शिशिरे तु यजेत्सुधीः।
काठको वा महाग्निर्वा सर्वेदान्त अकल्प्य तु॥ १॥
त्रैधातवीया सावित्र चर्ये पक्षान्तर तथा।
बृह(बार्ह)स्पत्याऽनेन कुर्याद्द्वादशाहवदेव च॥ २॥
रोहिण्यादिश्च संयुक्ता क्रयणी त्रिशता क्रय।
तया सह सहस्र तु विभज्येताग्विह तत॥ ३॥
अतिरिक्ता तु साहस्री एनी श्वेता तथैव च।
उद्धृष्टयुच्छिन्नपृष्ठा स्याद्रत्याख्याता वामनस्तथा॥ ४॥
उत्तमेऽहनि नीतासु दक्षिणासु तथैव च।
साहस्री खलु कल्याणी नीत्वाऽऽग्नीध्रस्य मण्डपम॥ ५॥
घ्रापणं कलशस्यास्य पृष्ठे तार्क्ष्यस्य लङ्घनम्।
धिष्ण्यानामिष्टकागोप सृष्टेर्वर्तनमेव च॥ ६॥
द्वादशैकादशाष्टौ च षडित्यादि तथैव च।
प्रायश्चित्तं त्वकुर्वीतायोमा जिघ्रयुग्रे व च॥ ७॥

---

१ तु फलं वदेत्।

अथ शालाप्रयोगात्तु होममाहवनीयके ।
आग्नीध्रीये तथैवास्या रूपाणि च जुहोति हि ॥ ८ ॥
लोहिताय तथा स्वाहाऽरुणायेति वा भवेत् ।
कर्णे जपित्वा विज्ञानं मा साऽभीत्यनुमन्त्रणम् ॥ ९ ॥
चतुर्भिर्मन्त्रैर्यद्वस्य प्रजयाद्यनुपठ्यते ।
तथा निर्मन्थिशलोऽप्यग्निर्मन्थिना तु मिश्रयेत् ॥ १० ॥
आग्नीध्रादस्तु दानं स्यादुपाहन्त्येति मन्त्रकात् ।
एकाऽसीति च मन्त्रेण ऋत्विजा च प्रतिग्रहः ॥ ११ ॥
शतमानेन निष्क्रीय गोष्ठे यथा समुत्सृजेत् ।
एका व्रतदुघा स्यात्तथा तु इडादश ॥ १२ ॥
अथ कापेयका भागाऽग्रहणात्सन्तत्यास्तथा ।
चतुरश्चतुरश्चैव स्वस्त्यामिताग्र्यपाकिया ॥ १३ ॥
यूपानामेव निर्माणमन्वाख्याना तथैव च ।
यस्मा एका तु सञ्चोक्ता न भाऽस्मीति केचन ॥ १४ ॥
अन्ये तु शतमानं सं मानामप्याकृतया ॥ १५ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने षष्ठः पटलः ।

अथ सप्तदशप्रश्ने सप्तमः पटलः ।

वैदत्रिरात्रेण यो राज्यमाशंसमानो (नो) न लभेत स एतेन यजेत ॥ १ ॥

वैदत्रिरात्रेण स्वराज्यकामः । वैदत्रिरात्रेण यजेत स्वराज्यार्थमिति । विधृदादि सर्वं गर्गत्रिरात्रवत् । शतकृष्णलहोमान्तः पशुः कृतः हीन एव वैदत्रिरात्रे ॥ १ ॥

तस्य त्रयस्त्रिवृतोऽतिरात्राः सर्वे षोडशिमन्तो रथंतरं वामदेव्यं बृहदिति पृष्ठानि गर्गत्रिरात्रेणोत्तरेषां त्रयाणामहानि व्याख्यातानि ॥ २ ॥

इयान्विशेषः—त्रयस्त्रिवृतोऽतिरात्राः षोडशिमन्तोऽतिरात्रसंस्थाः । शिष्टं गर्गत्रिरात्रवत् । अतिकाथितत्वात्सोऽप्याहिकानां गुणविकारः ॥ २ ॥

छन्दोमपवमानेन पशुकामः ॥ ३ ॥

यजेतेति शेषः । छन्दोमपवमानेनातिरात्रेण यक्ष्ये । पशुमानसानीति सङ्कल्पः । सर्वं गर्गत्रिरात्रवदहःक्लृप्तिश्च ॥ ३ ॥

अन्तर्वसुना पशुनाप्नोति ॥ ४ ॥

अन्तर्वसुना त्रिरात्रेण यक्ष्ये पशुमान्भूयासमिति सङ्कल्पः । प्रथमे ऽहनि एवान्तर्वसु । सर्वं गर्गत्रिरात्रवत् ॥ ४ ॥

पराकेण स्वर्गकामः ॥ ५ ॥

यजेतेति शेषः । पराकेण यक्ष्ये स्वर्गमाप्स्यामीति । सर्वं गर्गत्रिरात्रवत् । सर्वेषां सवनिहोमः निकायिना पशुक्लृप्तिश्च ॥ ५ ॥

अत्रैश्चतुर्विंशश्चतूरात्रश्चत्वारो ऽस्य वीरा आजायन्ते सुहोता सूद्गाता स्वध्वर्युः सुसभेयः ॥ ६ ॥

तथैव चत्वारस्त्रिरात्रा निकायिनः । अत्र प्रथमश्चतुरात्रस्तस्य कर्मात्रैश्चतुरात्रेण यक्ष्ये प्रजार्थमिति । विद्युदादि द्वादशाहवदारम्भकाल्पादिमासिमिश्चकारस्तेषां वा । तस्य कर्मसु होता ऋग्वेदकुशलः, उद्गाता सामवेदकुशलः, अध्वर्युर्यजुर्वेदकुशलः, सभेयशब्देन ब्रह्मा लक्ष्यते । सभेयो ब्रह्मा सर्ववेदकुशलः । एवं चत्वारो जायन्ते ॥ ६ ॥

अग्निष्टोमः प्रथममहः ॥ ७ ॥

द्वादशाहवद्दीक्षयमध्यान्तमत्रापि समन्वारम्भहोमः । रात्रौ वसतीवरीः परिहृत्य पर्याग्निविशसनान्तं कृत्वा परिस्तरणान्तम् । महारात्रे ऽयमग्निष्टोमः । अग्निं युनज्मि० ऐन्द्रवायवाग्रः पूर्वस्मिन्नृचयत्त्वपवमाने ऽग्रयोऽग्नेय एकः एवातिग्राह्यः आग्नेयं गृहीत्वाऽऽति (त्रि) वृद्भ्यां परिवीयाऽऽग्नेयमग्निष्टोमस्योत्तरे एकः । अथोपशयनिर्देशः । द्वादशशतं ददाति । यज्ञायज्ञीये तमस्तोत्रम्० पत्नीसंयाजान्तमहर्नितनय ॥ ७ ॥

उक्थ्यो मध्यमोऽतिरात्रश्चतुर्विंशाः पवमाना उद्यन्तस्तोमा एवमितरेषां त्रयाणामहानि व्याख्यातानि ॥ ८ ॥

श्वोभूत उक्थ्यः । ऐन्द्र एक एवातिग्राह्यः शुक्राग्रः । पशुकाले त्रिवृद्भ्यां परिवीयाग्निष्टस्य दक्षिणत ऐन्द्राग्न उत्तरतः (स्तृतीये) सावित्रः दक्षिणतस्तृतीये सारस्वतम् । अथोपशयनिर्देशः । द्वादशशतं ददाति । पत्नीसंयाजान्तमहर्निमननय ।

श्वोभूत उक्थ्यः सौर्य एवातिग्राह्य आग्रयणाग्रः । पशुकाले त्रिवृद्भ्यां परिवीयाग्नि-

प्रभृत्युत्तरतश्चतुर्थं सौम्यं दक्षिणतश्चतुर्थं वैश्वदेवमुत्तरतः पञ्चमे पौष्णम् । अथोपशय निर्देश । द्वादशशतं ददाति । पत्नीसंयाजान्तमर्हतिमन्ततः । रात्रौ पारिप्लवगणान्तम् ।

श्वोभूते महारात्रे बुद्ध्वा, अतिरात्रस्तस्मिन्षोडशिग्रहणं, सर्वे अतिग्राह्या उत्तरस्य-हविर्धानस्य पक्षे आग्नेय एक एव ऐन्द्रवायवाग्रः । पशुकालेऽग्निष्ठप्रभृति दक्षिणतः पञ्चमे मारुत-मुत्तरतः षष्ठे (अन्त्ये) बार्हस्पत्यं दक्षिणतः षष्ठे वारुणम् । अथोपशय । द्वादश-शतं ददाति । निरीक्षान्तमनूत्तरयाजयोः हुतायां पात्नीवतकर्म । अग्नेर्विमोकहो-ममुदवसानीयान्तम् । तत्र सौत्रामणी मैत्रावरुणी च । मैत्रावरुणी वा काठकपक्षे ॥८॥

जामदग्न्येन । पूर्वान्पोषान्पुष्यन्ति ॥ ९ ॥

एतान्लोकप्रसिद्धान्प्रजापशुधनपोषानपुष्यत्सम्पादितवान् । यस्मादेव जमदग्निः पुष्टि-हेतुमहाप्रवर्तकस्तस्माज्जामदग्न्यौ तद्वंशोत्पन्नौ द्वौ पितापुत्रौ पुष्टिमन्तरेण तथैव पलितौ दरिद्रौ न जानाते नोत्पद्येते । यद्वा द्वयेव पलितं स्वकीये देहे न जानाते । अयमर्थः—पुष्टिप्रदायस्य जमदग्निना प्रवर्तितत्वात्तद्वंशे कोऽपि दरिद्रो नास्ति । यदि कश्चित्प्रमा-दात्स्यात्तथाऽपि नैरन्तर्येण द्वौ पूरुषौ पुष्टिमन्तरेण द्वयो पलितौ न स्त एवेति भाष्य-कारः । अथ विधत्ते—'एतानेव पोषान्पुष्यति य एवं विद्वांश्चतूरात्रेण यजते' (तै० सं० ७-१-९) इति । जामदग्न्येन चतूरात्रेण यष्टव्ये, पुष्टिमवाप्नवानीति । सर्वं पूर्ववत् ॥ ९ ॥

अत्रोपसत्सु कश्चिद्विशेषं विवक्ते—

पुरोडाशिन्य उपसदो भवन्ति । आग्नेय एकक-पाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौम्यश्चतुष्कपालः । सावित्रः पञ्चकपालः । धात्रः षट्कपालः । मारुतः सप्तकपालः । बार्हस्पत्योऽ ष्टाकपालः । मैत्रो नवकपालः । वारुणो दशक-पालः । ऐन्द्र एकादशकपालः । वैश्वदेवो द्वादश-कपालः ॥ (ख० १६) ॥ दर्विहोमा भवन्ति । अग्ने वेर्होत्रं वेरध्वरमां पितरं वैश्वानरमवसेऽकरिन्द्राय देवेभ्यो जुषतां हविः स्वाहा । देवावश्विना मधु-कशयाश्वास्मि यज्ञ यजमानाय मिमिक्षतम् । देव विष्णवुर्वेक्षेमं यज्ञं यजमानायानुविक्रमस्व । देव सोम रेतोधा अस्यास्मिन्यज्ञे यजमानायैधि । देव

१ क. ख. ग 'माविन°' । २ क. ख. ग. जुहुता । ३ क. ख. ग. °याद्येमं यज्ञ य° । ४ क. ख. ग. °र्वस्यास्मिन्यज्ञे य° ।

सवितः सुषावित्रमद्याऽस्मिन्यज्ञे यजमानायानुसुवस्व । देव धातः सुधाताऽद्याऽस्मिन्यज्ञे यजमानायैधि । देवा ग्रावाणो मधुमतीमद्याऽस्मिन्यज्ञे यजमानाय वाचं वदत । देव्यदितेऽन्वद्येमं यज्ञं यजमानायैधि । देव्यदिते स्वादित्यमद्याऽस्मिन्यज्ञे यजमानाय सुनवस्व । देव्यनुमतेऽन्वद्येमं यज्ञं यजमानाय मन्यस्व । दिव्या आपोऽत्र नम्यध्वमद्याऽस्मिन्यज्ञे यजमानाय । सदः सदः प्रजा वां नृम्णुजुषाणः । देवेन्द्रेन्द्रियमद्याऽस्मिन्यज्ञे यजमानायैधि । देव त्वष्टः सुरेतोधा अद्याऽस्मिन्यज्ञे यजमानायैधि । इति प्रतिनिगद्य होमाः । इन्द्राय देवेभ्यो जुष्टं हविः स्वाहेति सर्वत्रानुषजति ॥ १० ॥

पुरोडाश आसुपसत्स्वग्नीति पुरोडाशिन्य । पुरोडाशिन्य उपसदो भवन्ति(७-१-९)इत्युक्तम् । उपसदस्त्रिविधा आग्नेय एककपाल इत्याद्या यत्र समाम्नाता. पुरोडाशास्तेषामौपासने श्रपण निर्वापाद्यमन्त्रणी दर्विहोमा आज्येन उपसदामाद्याज्यप्रत्याम्नायः, आज्येन प्रधानाहुतयः—अग्ने वेर्होत्रमिति यथालिङ्ग जुहोति । जुह्वामुपस्तरणाभिघारणं च । इन्द्राय देवेभ्य इति सर्वत्रानुषङ्गः । वैश्वदेवान्त कृत्वा व्याख्याता द्विरात्र तद्वदुपसदाहुतिमन्त्राणामुच्चारणमेवं पूर्वाह्णे अपराह्णे च । अहःक्लृप्तिश्च पूर्ववत्त्रिकायपशुक्लृप्तिश्च ॥ १० ॥

वासिष्ठस्य संसर्पः । यः पुण्योऽहीन इव स्यात् स एतेन यजेत ॥ ११ ॥

वसिष्ठस्य संसर्पेण चतूरात्रेण यक्ष्ये, पुण्योऽहीन इति व्याख्यानं द्विरात्रे तद्धुत्फलत्वाद्. । अत्र चतूरात्रवत्सर्वमहःक्लृप्तिश्च ॥ ११ ॥

विश्वामित्रस्य संजयो भ्रातृव्यवान्यजेत ॥ (ख० १७) ॥ १२ ॥

विश्वामित्रसंजयेन चतूरात्रेण यक्ष्ये भ्रातृव्यजयार्थं, सर्वमतिरात्रवदहःक्लृप्तिश्च ॥ १२ ॥

अथ पञ्चरात्रोऽभिधीयते—

१ क. वाचो व° । २ घ. °पोऽत्रं नम्यन्त्वद्या° । ३ क. ख. ग. °वानमुभिर्नु° । ४ क. ख. ग. °नाय धेहि । ५ क. ख. ग. °गभ्य ह्वो° । ६ क. ख. ग. जुहुता ।

संवत्सरस्य पञ्चाहेन सेव जायते ॥ १३ ॥

य एवं विद्वान्पञ्चरात्रेण यजते सेव जायते (७-१-९) इति ब्राह्मणम् ॥ १३ ॥

अथ पशुप्राप्त्यर्थं तमेव विधत्ते—

स सहस्रं पशूनाप्नोति ॥ १४ ॥

ब्राह्मणेऽपि व्याख्यातमिदम् ॥ १४ ॥

अथ सभायां वक्तृत्वविशेषं कामयमानस्य तमेव पञ्चरात्रं विधत्ते—

वाचः प्रवदिता भवति ॥ १५ ॥

य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवति । अथो एनं वाचस्पतिरित्याहुः (७-१-९) इति ब्राह्मणशेषात् । पञ्चरात्रेण यजेत प्रजामेवाप्नोतीति । पापवस्य फलम् । अथवा [illegible] इति वा फलनिर्देशः । सर्वं द्वादशाहवत् । शिशिरादिसहाशि [illegible] वसन्तविषं परिहृत्य परिस्तरणान्तम् ॥ १५ ॥

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः । सप्तदश उक्थ्यः ।
पञ्चविंशोऽग्निष्टोमो महाव्रतवान् ॥ १६ ॥

महारात्रे त्रिवृदाद्ये तस्मादि त्रिवृदग्निष्टोमः । षोडशिकस्य प्रथमविकारः । आग्नेय एवातिग्राह्य ऐन्द्रवायवाग्रं त्रिवृद्भ्यां परिवर्त्याऽऽग्नेयमुपाकरोति । तस्योत्तरतो यूपं नीत्वा, ऐन्द्रमुपाकरोति । अथोपशयं पूर्ववत् दक्षिणा पत्नीसंयाजान्तमहीनसंततयः ।

द्वितीयेऽहनि पञ्चदश उक्थ्यः । षोडशिकस्य द्वितीयविकारः । ऐन्द्र एवातिग्राह्यः । शुक्राग्रः पशुकालेऽग्निष्टस्य दक्षिणत ऐन्द्राग्नम् । [illegible] सारस्वतमुत्तरतश्चतुर्थं सौम्यम् । अथोपशयं पूर्ववद्दक्षिणा पत्नीसंयाजान्तमहीनसंततयः ।

[illegible] पञ्चविंशोऽग्निष्टोमो महाव्रतवान् । ऐन्द्राग्नोऽतिग्राह्यः । ननु महाव्रतप्रयुक्ता अतिग्राह्याः । ननु प्राजापत्ये पशौ षोडशिनश्चात्राग्निष्टोमेऽपि चतुर्थे चतूरात्र इति वचनादग्निष्टोमत्वेऽव क्रतुकरणमैन्द्रवायवाग्रम् । पशुकालेऽग्निष्टस्य दक्षिणतश्चतुर्थं वैश्वदेवमुत्तरतः पञ्चमं पौष्णम् । अथोपशयं पूर्ववद्दक्षिणा तृतीयमेव तत आग्रयणं गृहीत्वा षोडशिग्रहणमग्निष्टोमचमसे. [illegible] षोडशिहोमः । पत्नीसंयाजान्तम् । स्तोत्रप्रयुक्तं च सर्वं महाव्रतवदहीनसंततयः ॥ १६ ॥

विश्वजित्सर्वपृष्ठोऽतिरात्रः ॥ १७ ॥

[illegible] ज्योतिष्टोमविकारः कश्चिदेकाहः । सोऽत्रातिरात्रविकृतित्वमापादितः पञ्चममहर्भवति । स पुनः सर्वपृष्ठो रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यानि पृष्ठस्तोत्रगतानि सामानि सर्वाण्यपि यस्यासौ सर्वपृष्ठः ।

ननु द्विरात्रमारभ्य शतरात्रपर्यन्तेषु अहर्गणेषु गवामयने च पूर्ववदन्यतमलिङ्गेन सोमस्य धर्मा इति चेन्न । विशेषलिङ्गसद्भावात् । द्वादशाहपदान्तर्गतोऽहःशब्दः षष्टि-घटिकात्मकदिनपरः । द्विरात्रादिपदान्तर्गतो रात्रिशब्दश्च तादृशः । एतदेकं विशेषलिङ्गम् । अहःसंघो द्वितीयम् । द्वादश दीक्षास्तृतीयम् । तच्च गवामयने विद्यते । तत्र द्वाभ्यामेव दीक्षाभिरित्युक्त्वा दीक्षाग्रमाणि षडुपन्यस्तानि द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृग्द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रम् , इति । तस्मादहर्गणेषु द्वादशाहस्य धर्माः (८-१-१०) ।

ननु—त्रिवृद्बहिष्पवमानमिति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोके प्रसिद्धोऽर्थः । वाक्यशे-षात्त्र्यात्मकेषु त्रिषु सूक्तेष्ववस्थितानां बहिष्पवमानस्तोत्रनिष्पादनक्षमाणामुपास्मै गायता नर इत्यादीनामृचां नवकमर्थः । तत्र धर्मनिर्णये वेदस्य दृढत्वेऽपि पदपदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्पेन ग्रहीतव्याविति चेन्मैवम् । लौकिकार्थस्वी-कारपक्षे विधिवाक्येऽर्थस्त्रैगुण्यम् । अर्थवादवाक्ये स्तोत्रियाणामृचां नवकमित्येवं विध्य-र्थवादवाक्ययोर्वैयधिकरण्यादेकवाक्यत्वं न स्यादतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः (१-३-९) ।

नन्वेवं श्रूयते—'त्रिवृदग्निष्टुदग्निष्टोमः' इति । किं त्रिवृत्त्वमग्निष्टुति क्रतौ सर्वेषु साधनेषु संपद्यते, किंवा स्तोममात्रसंबन्धि । तत्र [illegible] त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वदर्शनादत्रापि क्रतुसाधनेषु या या संख्या श्रूयते सा सर्वा त्रित्वेन विक्रि-यत इति प्राप्ते ब्रूमः—यद्यपि त्रिवृच्छब्दोऽवयवप्रसिद्ध्या लोके त्रैगुण्यं ब्रूते तथाऽपि वेदे रूढ्या स्तोमवाची । त्रिवृद्बहिष्पवमानमित्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रम-णादत्र स्तोमविषयमेव त्रिवृत्त्वम् (१०-६-७) ।

ननु—'विश्वजित्सर्वपृष्ठो भवति' इति श्रूयते । तत्र सर्वपृष्ठशब्दोऽनुवादः । कुतः, प्राप्तत्वात् । तथाहि ज्योतिष्टोमे माध्यंदिनपवमानानन्तरभावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति । 'अभि त्वा शूर नोनुमः' 'कया नश्चित्र आ भुवत्' 'तं वो दस्ममृतीषहम्' 'तरोभिर्वो विदद्वसुम्' इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्त-दशस्तोमतामापाद्य गीयन्ते । एकस्मिन्सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधा-नेन सप्तदशधाऽभ्यासः सप्तदशस्तोमः । तादृशेषु स्तोत्रेषु पृष्ठशब्दः श्रूयते - सप्तद-शानि पृष्ठानि इति चत्वारि पृष्ठानि विश्वजिति चोदकप्राप्तत्वात्सर्वपृष्ठशब्देनानूद्यन्त इत्याद्यः पक्षः ।

रथंतरपृष्ठबृहत्पृष्ठयोर्ज्योतिष्टोमे [illegible] चोदकेन विकल्पप्राप्तौ सर्व-

शब्देन समुच्चयो विधीयते । तथा सत्यनुवादकृतं वैयर्थ्यं न भविष्यतीति द्वितीयः पक्षः ।

सर्वत्र बहुषु मुख्यं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट्संख्याकानि पृष्ठान्यतिदिश्यन्ते । षडहे प्रतिदिनमेकैकं पृष्ठं विहितम् । तानि च षट्पृष्ठानि रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामभिर्निष्पाद्यानि । यद्यपि विश्वजित ऐकाहिकत्वा-उज्योतिष्टोमविकृतित्वमेव न तु षडहविकृतित्वं तथाऽपि सर्वपृष्ठोक्तिबलात्तानि षट्पृष्ठा-न्यतिदिश्यन्ते (७ ३–३) ।

नन्विदमाम्नायते— ' विश्वजित्सर्वपृष्ठः ' इति । षडहे षट्स्वहःसु क्रमेण रथंतर-बृहद्वैरूपवैराजशाक्वररैवतैः षड्भिः सामभिः पृष्ठस्तोत्रं निष्पादितम् । तानि सर्वाणि पृष्ठसा-मानि यस्मिन्विश्वजिति सोऽयं सर्वपृष्ठः । तत्र माध्यंदिनपवमानमैत्रावरुणनाम्नोरन्तरा-लरूपे पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठसामानि कार्याणि, किंवा यथावचनं देशान्यवस्थेति संशयः । पृष्ठकार्यगमकेण पृष्ठशब्देन पृष्ठदेशे प्राप्ते वचनेन देशविशेषो व्यवस्थाप्यते । वचनं चैवमाम्नायते—' पवमाने रथंतरं करोत्यार्भवे बृहन्मध्ये । इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसाम ' इति । वचनं हि न्यायाद्बलीयः । तस्माद्देशविशेषा व्यवस्थिताः (१०–६–९) ।

श्रोमृते विश्वजित्सर्वपृष्ठोऽतिरात्र एकाहिकः । अतिग्राह्यास्त्रयः । शुक्राग्रः । पशुका-लेऽग्निष्ठप्रभृति दक्षिणतः पञ्चमे मारुतमुत्तरतः षष्ठे बार्हस्पत्यम् । पुनरपि दक्षिणतः षष्ठे वारुणम् । अथोपशयः । सर्वस्वदानम् । द्वादशशतमेव दक्षिणा छन्दोगवचनात् । सर्वं तिरोअह्न्यान्तमनूबन्ध्याया वपाया हुतायां पात्नीवतः कर्मशेषमग्निष्टोमवदुदवसा-नीयान्तं सौत्रामणी मैत्रावरुणी च ॥ १७ ॥

अभ्यासङ्ग्येन ॥ १८ ॥

यजेतेति शेषः । अभ्यासङ्ग्यो द्वितीयः । अभ्यासङ्ग्येन पञ्चरात्रेण वक्ष्ये, सर्वका-मार्थम् । आहारपृथक्त्वेन सर्वं पूर्ववत् । अनेका पशुकल्पसिश्चाहर्योगाविशेषः । प्रथमोऽग्नि-ष्टोमस्त्रय उक्थ्या अतिरात्रास्त्रिष्वहःसु आग्नेयाद्या अतिग्राह्या एकैकस्मिन्नेकैकम् । चतुर्थे षोडशी उक्थ्यवदेव क्रतुकरणम् । उक्थ्य इति वचनात् । अभ्यासङ्ग्य इति कोऽर्थः, स्तोत्रविषयमेतत् ॥ १८ ॥

यं कामं कामयते तमभ्यश्नुतेऽग्निष्टोमस्त्रय उक्थ्योऽ-तिरात्रः । त्रिवृता द्वे सवने पञ्चदशमेकं पञ्च-दशे द्वे सवने सप्तदशमेकꣳ सप्तदशे द्वे सवने एकविꣳशमेकमेकविꣳशे द्वे सवने त्रिणवमेकं त्रिणवे द्वे सवने त्रयस्त्रिꣳशमन्यम् ॥ १९ ॥

व्याख्यातम् ॥ १९ ॥

पञ्चशारदीयेन बहोर्भूयान्भवति ॥ २० ॥

पञ्चशारदीयस्तस्य कर्म— वैशाख्या पौर्णमास्यां प्रातरग्निहोत्रं हुत्वा पञ्चशारदीयेन पञ्चरात्रेण यक्ष्ये, बहोर्भूयासमिति संकल्पः । महाग्निगुक्तः सकाठके वा । सक्षेदान्तं प्रकृतिवत् ॥ २० ॥

अनुसंवत्सरं पशुबन्धेन यजेत ॥ २१ ॥

पशुबन्धेन यक्ष्ये, समारोपणादि मथित्वाऽऽयतने निधाय पश्विष्ट्यादि शाखाहरणादि, यूपाहुतिं हुत्वा यूपच्छेदनकाल उपशयेन सह पञ्चत्रिंशद्यूपानां छेदः । पात्नीवतस्य च वेदिकाले त्रयस्त्रिंशद्रथाक्षमात्रां चतुस्त्रिंशद्गुणरां रज्जुं मीत्वा तस्यास्तृतीयेन भागेन चतुर्भिः पश्चात्पद्भिः प्राचीं त्रिभिः पुरस्तादिति पाशुकी वेदिः । दशपदोत्तरवेदिः । शम्यामात्रेति केचित् । यूपैकादशिनीं विमाय पृश्नीर्वत्सतरीश्चाऽऽलभन्ते । युनज्मि तिस्र इति स्रुचः सन्नाभिमन्त्रणं केचिदिच्छन्ति । आज्यान्याभिमन्त्र्याग्निष्ठ प्रथमांश्चतुर्दश यूपान्मिन्वन्ति, उदगपवर्गान्व्यत्यासेन त्रयस्त्रिंशतं मीत्वोत्तरान्स्तनश्चतुस्त्रिंशतं व्यत्यासेन ॥ २१ ॥

सप्तदश पृश्नीरुक्ष्णः पञ्चवर्षानानयन्ति सप्तदश
पृश्नीर्वत्सतरीस्त्रिवत्सा अप्रवीताः ॥ २२ ॥

अथोपशयनीयानां पशूपाकरणकाले सप्तदश पृश्नीः पृश्निवर्णा उक्ष्णः पञ्चवर्षान्यूनः सप्तदश वत्सतरीस्त्रिवत्सास्त्रिवर्षा गर्भीवादिगुणयुक्ता आनयन्ति ततृक्ष्णः सप्तदश । अग्निष्ठप्रभृति व्यत्यासेनोपाकरोति दक्षिणापवर्गानिन्द्रामरुद्भ्यस्त्वा जुष्टमुपाकरोमीति । अथ वत्सतर्योऽग्निष्ठमारभ्योत्तरतो दशप्रभृति व्यत्यासेन मरुद्भ्यस्त्वा जुष्टमुपाकरोमीति दक्षिणापवर्गान् । अथोपशयनिर्देशः । सर्वमेकादशिनीवत् ॥ २२ ॥

तान्प्रोक्षितान्पर्यग्निकृतानेत(नि)तरानालभन्ते ॥ २३ ॥

प्रोक्षणादिपर्यग्निकरणान्तं तन्त्रेणोष्ट्रां(क्ष्णां) वत्सतरीणां च । तन्त्रेण संस्कारो वत्सतरीणां पर्यग्निकरणान्तं कृत्वा ॥ २३ ॥

इतरानुत्सृजन्ति ॥ २४ ॥

उष्ट्राणां(क्ष्णां) च पर्यग्निकरणं कृत्वेतरानुत्सृजन्तीत्यर्थः । वत्सतरीभिः कर्मसमाप्तिः । तन्त्रेण वपाप्रचारः । मरुद्भ्यो वपा गता मेदसामनुब्रूहि । एवं प्रेष्य, जातवेदो वपाभिरित्यूहः । अनूहो वाऽऽख्यातवादात् । वपामार्जनान्तं कृत्वा तेजसो मे पशुभ्यो मे श्रुतमसि तेजो मे श्रुतमसि पशून् मे इत्यादि । धाता रातिरिति समिष्टयजूंषि, इत्यादि संतिष्ठते पशुबन्धः ॥ २४ ॥

ततः संवत्सरे नवनीतपृश्नीररुणा आनयन्तीत-
रा५श्चैवोक्ष्णस्तान्प्रोक्षितान्पर्यग्निकृतानि(नि)तरा-
नालभन्ते । प्रेतरान्सृजन्ति ॥ २५ ॥

आगामिन्यां वैशाख्यामेवं पशुबन्धः । नवनीतपृश्निवर्णा वत्सतर्यः । अपूर्वा नैवोक्ष्णः ।
(पूर्ववदुक्षाणम ।) ॥ २५ ॥

ततः संवत्सरे पिशङ्गीः सारङ्गीरानयन्ति । ता५-
श्चैवोक्ष्णस्तान्प्रोक्षितान्पर्यग्निकृतानि(नि)तराना-
लभन्ते । प्रेतरान्सृजन्ति ॥ २६ ॥

पुनरागामिन्यां वैशाख्यां पशुबन्धः । तत्राप्यरुणवर्णा वत्सतर्यः । पूर्ववदुक्षणादि
(अपूर्वा एवोक्षाणः) ॥ २६ ॥

ततः संवत्सरे राजीवा आनयन्ति । ता५श्चैवो-
क्ष्णस्तान्प्रोक्षितान्पर्यग्निकृतानि(नि)तरानालभन्ते ।
प्रेतरान्सृजन्ति ॥ (ख० १८) ॥ २७ ॥

पुनरागामिन्यां वैशाख्यामेव पशुबन्धे उष्ट्रा(क्ष्णा) वयोवर्णादिविशेषादिषु वृत्तिः ।
तस्मादविरुद्धेऽस्मिन्पक्षे सवनीयाश्च तद्वर्णवयोविशिष्टा अन्या एव वा प्रथमसग्नि वा पशुब-
न्धेषु प्रथम उक्षाणः । तेषामेव पुनः पुनः संस्कारः । तत्रैव सवनीयाः । प्रथमप्रभृति उक्षणां
वायव्या(व्याख्यादिर्थ) दा तदा यद्युक्ष्णो रुद्र इत्यादि प्रायश्चित्तम् । तद्वर्णवयसमानीय
संस्कारः पर्यग्निकरणादयः ॥ २७ ॥

पञ्चमे वर्षे सोमा भवन्ति । त्रिवृदग्निष्टोमः ।
पञ्चदश उक्थ्यः । सप्तदश उक्थ्यः । पञ्चदशोऽग्नि
ष्टोमः । सप्तदशोऽतिरात्रः । पूर्वां पौर्णमासी-
मुत्थान५ संपादयेदेत उक्षाणः सवनीया भवन्ति ।
अजोऽग्नीषोमीयोऽन्वह५ स्त्री५स्त्रीनालभते एवमे-
वोत्तरेणेन्द्रमारुता उक्षाणो मारुत्यो वत्सतर्यः
॥ २८ ॥

यदा पञ्चसंवत्सरादूर्ध्वं सवनीयत्वाभावात् पूर्वमुक्षाणां संस्कृतानां नाशः, असंस्कृत-
मपि तद्वर्णवयसमालभेत (इति)च्छन्दोगवचनात् ।

एकाष्टकाया बृहस्पतिः पुरोहित इत्यादि । अथवा सूत्रकारेण पञ्चशारदीयारम्भकाल-
स्यानुक्तत्वात्सूत्रान्तरोक्तकाल एवाऽऽरम्भः । छन्दोगमताद्यश्विन्याः पौर्णमास्याः पूर्वस्यां
सप्तम्यामष्टम्यां वा पञ्चशारदीयस्य संकल्पादिः सन्दानं पशुबन्धैर्यक्ष्ये । इत्याद्येवं पशुबन्धं

कृत्वा पञ्चसंवत्सरमागामिन्यामेकाष्टकायां वा बृहस्पतिः पुरोहितेत्यादि द्वादशाहवच्छिशिरे दीक्षन्ते, वसन्त उत्तिष्ठन्तीत्यादि, महाग्निः काठको वा द्वादशाहवदौपवसथ्यान्तं कृत्वा महारात्रे बुद्ध्वा त्रिवृदग्निष्टोमः । ऐन्द्रवायवाग्रः । अग्रेक एवाऽऽग्नेयः । पशुहस्य पूर्वेद्युरहवदत्र ग्राह्या इत्येके । पशुकाल एव उक्षाण सवर्णीया पञ्चसीपा (ग्रामीणा) पर्यग्निकरणम् । मीमांसकमते तद्रूपाद्या इति । इन्द्राय मरुद्भ्यस्त्वा जुष्टं इति । त्रीन्सर्वांस्तन्त्रेण पशुयागः । द्वादशाहवद्दक्षिणा, पत्नीसंयाजान्तमहीनसंततय ॥

श्वोभूते पञ्चदश उक्थ्य शुक्राग्रः । त्रीनालभन्ते । उपशयः । पूर्ववत्पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते सप्तदश उक्थ्य आग्रयणाग्र । उक्षणस्त्रीनालभन्ते । पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते पञ्चदश उक्थ्य ऐन्द्रवायवाग्रः षोडशी । न त्वतिग्राह्याः । उक्थ्यवदेव क्रतुकरणमुक्षणस्त्रीनालभन्ते पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते सप्तदशोऽतिरात्र शुक्राग्र । अतिग्राह्यत्रय पशुकाल उक्ष्णामवशिष्टात्पञ्चाऽऽलभन्ते । सर्वत्रोपशयानिधानानिर्देशश्च । इन्द्राय मरुद्भ्यो जुष्टमुपाकरोमीत्येवं निगमाः । सर्वत्र तन्त्रेण वपायागः । इन्द्राय मरुद्भ्यो गवां वपानां मेदसामनुब्रूहीत्येव निगमाः । इन्द्रस्य मरुतां समानमिति । अन्वहं सर्वत्र द्वादशशतं ददाति । पाक्षिकस्य पञ्चानामह्ना विकारोऽतिरात्र तिरोअह्न्यन्त कृत्वा यज्ञपुच्छमिति सर्वं पूर्ववत् । तत उदवसानीयान्तं कृत्वाऽथ सौत्रामणीं मैत्रावरुणीं च ॥ २८ ॥

यद्युक्षणो रुद्रोऽभिमन्येताग्नये रुद्रवते पुरोडाशमष्टाकपालं निरुप्याथान्यमुपाकुर्यात् । यद्यपमु म्रियेतापोनप्त्रीयं चरुम् । यद्यवसादे भक्षितं चरुम् । यदि स शीर्येत भौममेककपालम् । यदि श्वभ्रे पतेद्वारुणं त्रिकपालम् । यदि श्रोणः कूटो वा बार्हस्पत्यं चरुम् । यद्यन्धः काणो वा सौर्यमेककपालम् । यदि प्रसह्याऽऽनयेयुरिन्द्राय प्रसह्वत (न) एकादशकपालम् । यदि सेनाया अभीत्वर्या विन्देच्छार्दूलो वा हन्यादिन्द्राय यजत एकादशकपालम् । यदि नश्येद्वायव्यं चरुम् । यद्यन्येन मृत्युना प्राजापत्यं द्वादशकपालम् ॥ २९ ॥

सर्वत्र निरुप्याथान्यमुपाकुर्यादित्यन्वयः । अन्यत्स्पष्टम् ॥ २९ ॥

महाव्रते स्पर्धमानस्त्रिवृदग्निष्टोमः । गौरुक्थ्यो महाव्रतं गौरुक्थ्य आयुरतिरात्रः ॥ (ख०१९) ॥ ३०॥

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्ने सप्तमः पटलः ।

चतुर्थोऽन्तं महाव्रतम् । अन्तर्महाव्रतेन पञ्चाहेन यक्ष्ये भ्रातृव्यजयार्थं परमरणार्थं वा । यदा भ्रातृव्यवतस्तदा नैमित्तिकोऽयं विधिरिति च्छन्दोगसूत्रकारमतिः । औपवसथ्यान्तं प्रथमपञ्चरात्रवत् । महारात्रे बुद्ध्वा त्रिवृदग्निष्टोमः, ऐन्द्रवायवाग्रः पशुक्लृप्तिरन्तीका च प्रथमपञ्चरात्रवत् । आग्नेयोऽतिग्राह्यः । दक्षिणा अन्वहं द्वादशशतं, पत्नीसंयाजान्तम् ।

श्वोभूते पञ्चदश उक्थ्यः, ऐन्द्रवायवाग्रः, ऐन्द्रोऽतिग्राह्यः षोडशिकस्य द्वितीयः । पत्नीसंयाजान्तम् ।

श्वोभूते महाव्रतं गवामयनवत् । प्राजापत्यः पशुः कापेयानां प्राप्त एव । सोमाग्नीनादि सर्वजितिवत् । अतिग्राह्याः सांवत्सरिकवत्सर्वस्वदक्षिणा । केचिद्द्वादशशतमेवाऽऽह्निकमिति । पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते सप्तदश उक्थ्य ऐन्द्रवायवाग्रं नातिग्राह्यः । उत्तरस्यग्रहपक्ष आग्नेय एकः । अत्र षोडशी उक्थ्यश्चेत्तदेव क्रतुकरणं पत्नीसंयाजान्तम् ।

श्वोभूत एकविंशोऽतिरात्रः षोडशिमानुत्तरस्यग्रहपक्ष ऐन्द्र एक एवातिग्राह्यः । इतरथा त्रिरात्रवत् यज्ञपुच्छप्रभृति अनूबन्ध्यावपाया पात्नीवतं कर्मोदवसानीयान्तम् । सौत्रामणी मैत्रावरुणी च ।

अत्र पुरुषमेधः पञ्चम इत्यापस्तम्बः । व्याख्यातः पूर्वमेव । अह तल्पसौ विशेषः । अग्निष्टोमो वोपोत्तममयुतं प्रथमेऽहनीत्यादि दक्षिणतो विकल्प आम्नातस्ताण्डके पाठाच्च* ॥ ३० ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने सप्तमः पटलः ॥

---

*अथ द्वादशाहप्रस्तावे सर्वतोमुखं प्रतिजानीते—

सर्वतोमुखेन यः कामयेत सर्वमिदं भवेयमिति । मध्ये गार्हपत्यः । प्रतिदिशं सौमिका विहाराः । त्रिवृत्प्राच्यां दिशि । पञ्चदशो दक्षिणतः । सप्तदशः पश्चात् । एकविंश उत्तरतः ॥

अहमेव सर्वस्येश्वरो भूयासमिति यः कामयेत स सर्वतोमुखेन यजेत । यथाऽऽह भगवान्बौधायनोऽपि पैङ्ग्यशाखाब्राह्मणवाक्यान्युदाहृतवान् 'देवासुरा ह यत्र महासंग्रामं संयेतिरे तद्ध शिबिरौशीनरो देवानां वर्गादसुराञ्जिगाय । तस्यो हेन्द्रो जितवरं ददौ । स होवाच शिबिर्नैष्ठच भय न गच्छेदिति । त वर्षिष्ठीयप्रस्थे सर्वतोमुखेन याजयांचकार । ततो ह वा एतच्छिबिं नैष्ठच भय न गच्छति । य कामयेतानपजय्यं जयेदिति तं वर्षिष्ठीयप्रस्थे सर्वतोमुखेन याजयेत् । अनपजय्यमेव जयति ' (बौ० श्रौ० १८ । ४०) इत्यादि । सोऽसार्थमेतत्कर्मेति भाष्यकृत । मध्ये गार्हपत्य इति वचनात्तद्देताश्चतस्रः शाला अनुदिशं मापयन्ति । प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति । तस्मान्मध्ये गार्हपत्यो भवति । प्रतिदिशं सौमिका विहाराः सदक्षिणा [illegible] । [illegible] दक्षिणाग्निकल्पनम् । सर्वत्र देशभेदादृत्विग्भेदः । स्तोत्रभेदाच्छस्त्रभेदः । त्रिवृतादि प्रतिदिश दिग्भेदाच्च । षडा हि(त्रि)कान्येतान्यहानि द्वादशाहे दशरात्रकाणि । तस्माद्द्वादशाहधर्मा अहीनधर्माश्च प्रवर्तन्ते । तत्कर्म द्वादशाहवद्दीक्षाकालः शिशिरे दीक्षेत इत्यादिर्व्याख्यातः ।

अत्र बौधायनीये द्वैधसूत्रे विशेषः—'चिन्वीत सर्वतोमुखेऽग्निमिति बौधायनः । न चिन्वीतेति शालीकिः । अत्रो ह स्माऽऽह मौद्गल्यः पूर्वस्मिन्नेवाग्निचय इतरेषु सावित्राः स्युरिति । इत्येतदपि न कुर्यादित्याश्मरथ्यः ।' (बौ० श्रौ० २३ । १०) इति ।

अत्रेयं पद्धतिः—उक्तकाले प्रातरग्निहोत्रं हुत्वा सर्वतोमुखेन काठकाग्नियुक्तेन * द्वादशशतदक्षिणेन यक्ष्ये । अहमेव सर्वस्येश्वरो भूयासमिति संकल्पः । विस्तृतमि । ततः सोमप्रवाकवरणम् । एक एव सोमप्रवाकः । स प्राह महादेवयज्वनः सोमो भविष्यति तत्र भवताऽऽध्वर्यवं कर्तव्यम् । अथ प्रश्नः—क ऋत्विज इत्यादिनाऽहीनः सर्वतोमुखस्त्रिवृत् । पितृउपस्थानान्तम् । एव ब्रह्मणस्तृ(स्त्रि)वृति ब्रह्मत्व कर्तव्यमिति । एवं हौत्रं कर्तव्यमिति । क इत्युक्ते सर्वतोमुखस्तृ(स्त्रि)वृत्क ऋत्विज इत्युक्ते नारायणशर्मादयः । का दक्षिणा इत्युक्ते [illegible] इति । तृ(त्रि)वृति हौत्रं गायत्र कर्तव्यमिति स्वे(स्थे)न विधिना प्रवृत्तिः । चतुर्णां वरणमाश्रित्य प्रयोगः—पुनश्च यज्ञशर्मण इत्यादि पञ्चदश इति च विशेषः । उद्गातृवरणान्तं पुनश्च यज्ञशर्मण इत्यादि पुनश्च यज्ञशर्मण इत्यादि । सप्तदश आध्वर्यवमित्यादि पुनश्च यज्ञशर्मण इत्यादि एकविंश इति विशेषः । एवं प्रतिदिशि सोमप्रवाकवरणं कृत्वा समन्त्रकं वरण कृत्वा मधुपर्कः । इतरेषामेवम् ।

* अथ केचिदग्निरेधानवीयामिच्छन्ति, सहस्रदक्षिणामित्यानान ।

१ समर्थिते । २ सर्वतोत पाठ । ३ पितृपु ।

सर्वेषामृत्विजां वरणमिति भाष्यकृत् । तस्मिन्पक्षे प्रागादिक्रमेण मधुपर्कस्तन्त्रेण देवतो-पस्थानं तन्त्रेण ततो नान्दीश्राद्धम् । सावित्रमग्निं चेष्ये स्वर्गं लोकमवाप्नवानीति संकल्पः । [illegible] विहारकल्पनम्. शम्यामात्रेण (भ्रमणं) गार्हपत्यं परि-लिख्य द्वादश (प्र)क्रमेण चतुर्विंशतिप्रक्रमेण वा दार्शिकीं वेदिं । प्रतिदिशं सौमि-कविहाराः सह [illegible] र्वानाग्नीध्रीयाभि. सर्वासु दिक्षु पुरुषस्य दक्षिणहस्तभागे दक्षिणाग्निं मार्जालीयं च सव्यहस्तभागे प्रवर्ग्यादिशाग्नीध्रशामित्रोत्करचा-त्वाला. । गृहे दीक्षापक्षमाश्रित्य प्रयोग.—पक्षे एव दार्शिकवेदिचतुष्टयं कृत्वा समारण्यजुरादिसर्वाहारप्रस्थापनान्त कृत्वाऽप्रवृत्ते दीक्षापरिमाणे द्वादशेऽहनि पृथक् पृथग-रण्यो. समारोप्य य इहा यतस्यादिति विविना गमन यदि बहिर्दीक्षणीया तदा शर्कराणा-मुपकल्पने कृते—अरण्योः समारोपणं देवयजना-यवमानमग्निं मथित्वोपावरोह्य गार्हपत्ये निदधाति ।

प्रतिविहारं षोडशर्त्विजो भवन्ति । प्रतिविहारं पात्रभेद ऐष्टिकानां पाशुकानां सौमि-कानां च । प्रतिविहरणादि सर्वं सौमिकं क्रियते औदवसानीयायाः प्रतिविहारं द्रव्यनि-र्देश. । केचित्तन्त्रेणेति । प्रतिविहारं समारण्यजुःष्वपि स्वे स्वे स्थाने सोमपरिवे(पे)षणम् । समहोता पूर्वस्मिन विहारे प्रतिविहारं वा स्वे दक्षे सर्वत्राऽऽवर्तते सर्वविहारेषु संभवता युगपदनुष्ठानं दीक्षणीयायामस्याग्नेरनया [illegible] इत्यापस्तम्बमति । केचिदूह कुर्वन्ति । अग्निं गृह्णामि सुरथान्य सयो भुवो य उद्यन्तमारोहन्ति सूर्यमह्ने । आदित्यमित्यादि स्वैष्वायतनेषु सर्वापया । इमा ओजमित्यादि । अग्नयो हव्यवाह इह तानावहत, ऊहपक्षे अनूहपक्षे च । दीक्षणीयः हविरिदमेषां सर्याति । अन्तराऽग्नी सर्व-विहारेषु भेऽन इह प्रजा० सकृदेवानूहन । इमे पितृणामसुरा वाड्ढव्या पितृभ्य आ । तान्पूर्व इत्यादिवदनूहो वा । इदमहमग्निम्तन्त्रेण अनूहन पयस्वती चाग्ने व्रतपते० पूर्व-स्मिन्विहारे । सर्वानग्नीनभिसधाय सकृदनूहन प्रणीताप्रणयनमविकारेण । औ निर्वपन । अग्निर्होतारमित्यनूहन । अत्रानूहो वा चतुःशिखण्डा० सुमयो भूत्वा महिमानं पुषोषु ततो देवस्यो वर्धन्ते पयांसि । यज्ञिया यज्ञान्० ईडेऽन्य.० इत्यनूहः । और्णम्रदूनि प्रथमानि स्योन देवेभ्यो जुष्टानि सदन(सदनेभ्य.)बर्हींषि । आज्यमसि भेदेन तत्र तत्र गत्वाऽवेक्षणमाज्य मन्त्रेण शक्यत्वात् । अद्भिराज्यमाज्येनाप:० शार्करेरिमान्य-ज्ञान्० शुक्राणि व शुक्रासु ज्योतींषि वो ज्योतिःषु आ द्विषु ये तृणपञ्चाना वो वातानां उत्तरप्रवीत्यशब्दस्य व.शब्दः हवि.शब्दस्यानूहो वा सर्वे नृदेवाना को देवता(ना)मस्य: अशिश्रेम बर्हिष्यन्त. पृथिव्या चतु.शिखण्डा युवतिः सुपेशासो युव(वसु)नानि वस्ते० कामे धुक्ष्व यजमानाय कामान् । शिवाश्च मे शग्माश्चैधि स्योनाश्च मे सुषदाश्च मे स्वोर्जे-

स्वस्त्यश्च मे पयस्वस्यश्च स्तोषमूर्जं मे पिन्वध्वं० उग्राभ्यो ग्राहं० समभिभुवस्य० अभिभूय० यज्ञशब्देषु सर्वत्रानूह. । एषु यज्ञेषु० केचित्तु—भाष्यविरुद्धमिति व्याचक्षते । अविलोपायेत्यनूहः । तेजिष्ठेत्यस्याभिधानादूहपक्षे—अवभृथवद्युनज्मि वः जातवेदसः । इन्धाना वः वयं व. ये मे अग्नय एषा यज्ञाना ऋध्यात् अनूहो वा । तेजिष्ठा वः या वो अग्नय० व्यय-वं मा वो दभन् । विभूतीभिर्विशो यन्त्राभिः विशो यन्त्रानुदमाना अरातीन् सीदन्त्यो देवी. सुकृतस्य विभूतयः स्वभूतयः० मयि धारयत इमे व्रतम्तरा उभयस्य धर्ता विधर्ता प्रयाजानामनानुयाजा० आरोहत पयो जुहव० जुहूस्थ घृताच्य गायत्र्यास्य कविभिर्जुषाणाः । अन्यभमाना यज्ञाननुच्छ-वं समीत्यो यज्ञं नया स्थोपदेवानाग्नेयेन० उपभृद्भि० सपत्नान्० दोहैर्यज्ञान० सुभृदस्थोपभृतो घृताच्य त्रैष्टुभेन छन्दसा विश्ववेदस । उत्तरं पूर्ववत् । अधरं ध्रुवाभ्य ध्रुवा स्थ धरुण० इत्यादि स्योना मे सीदत सुषदा पृथिव्या दिवि सीदत इमे स्रुवा अभिजिघ्रति होमाच्छतक्षरा० सर्वा यज्ञाना समञ्जन्ति विष्ठा० इमा स्थाल्यो घृताना पूर्णा अच्छिन्नपयसा शतधारा उत्सा शेषं सवर्णीयवत् । आमन्त्राभिमन्त्रणं क्रमेण । चित्तिः स्रुगित्यविकारेण सकृदग्निरसो० एषां यज्ञाना० उच्छिष्टम० इत्यनूहेन । अग्न्यन्त्याभिधानादि ऊहपक्षे—ऊच्छिष्टा अग्नयो यजमानायादिष्ट निशुष्मा अभिदासते । अग्नयो देवेद्धा मन्विद्धा मन्द्रजिह्वा मर्त्यासां ते होतारो ऊर्ध्वं० सीमद्धा अग्नय आहुता स्वाहाकृता० मनास्थ प्राजापत्यादिमसोभिर्माहुतेराविशत० वागस्यैन्द्री० सेन्द्रानन्वारम्भः । केचिन्मुख्यस्यान्वारम्भमिच्छन्ति । विप्रतिषेधादत ओहेन वा– वाच स्थैन्द्र सपत्नक्षयण्यो वाचामिन्द्रियेणाविशत । देवाः पितर० इत्यविकारेण । अग्नय इडमि यत्राग्निभ्य इदं० वसन्तानृतूनां प्रीणामि ते मा प्रीताः प्रीणातु ग्रीष्मानृतूना प्रीणामि ते मा: प्रीता: प्रीणातु वर्षानृतूना प्रीणामीत्यविकारेण शरद ऋतूना प्रीणामि प्रीण(णातु)न्तु हेमन्तशिशिराविन्त्य-विकारेण । एको ममैकेत्यविकारेण । आज्यभागानुमन्त्रणे विशेष —अग्नीषोमयोरहं देवयज्ययाभिः । केचिद्देवयज्यया(इति) । केचिदग्नीषोमीयानामहं देवयज्ययाभिरिति । तथैव प्रधानानुमन्त्रणम् । अग्नयो मा दुरिष्टात्पातु सवितारश्च ...ं० सुरूपाग्निस्पुरोडाशस्वर्णे इडादेवता परा ' सुरूपवर्षवर्ण० इत्यविकारेण । देवताभिधानात् । इडे भागं जुषध्वं जिन्वगा जिन्वावत: । तासां वो भक्ष्यमाणस्य० मार्जनं पूर्वस्मिन्विहारे यत्र चतुर्धाकरणं त्रेधाकरणं वा तत्राऽऽवर्तेत आग्नीध्रभागान्तसमता वो अग्नयः समिधस्ताभिर्वर्धध्वं० इति प्रकृत्या वाऽयं ते अग्न इत्यनूहः । अग्न्यभिधानादथवा यं वो अग्नय अग्नयो न. जातवेदस अग्नयः संदहत० समहोता तन्त्रेण । वेदिर्बर्हिरित्यनूहः । केचिद्वेद्यो बर्हींषि श्रितानि हवींष्यसि स्मा० आज्यानि० याज्या० बर्हि-

पामहं देव यज्ययामि० वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीषु० निग्राभेणाधरान्० सम- स्तन्ना बर्हा-षि हविर्भिर्घृते० दिव्यमित्यादि उज्जितयो(र)विकारेण—एमा अग्मन्० मा मे सत्याऽसीत्यविकारेण रोहितेन वोऽग्नि० गमयन्तु हरिभ्यां वः इन्द्रमगमयत्तु एतशेन वः दिवं ग्मीत्स अवतता० आद्धयुस्थिताः । तैः स्रुक्संकाण्डैरोषधयो मो० वि ते मुञ्चामीत्यविकारेणाग्नेर्विमोकत्वात् । वि युष्माकं मुञ्चामि० इति वा वर्तादस्मासु० विष्णुना शग्नुनामहं देवयज्ययाभिर्यज्ञेन० यज्ञा नमो वो यज्ञा नमो नमश्च वो यज्ञाः सन्तिष्ठध्व० (सर्वत्र) उप वो नम० इष्टा यज्ञा अहेन वा । भेदेन वा इष्टा यज्ञा द्रविणोदस आशीर्वन्तस्तेषा सइष्टानां० सोमानामहं देवयज्ययाभिः । इडाऽस्मानित्य- विकारेण । तेषामुपस्थानपक्षे भेदेनाऽनुमन्त्रण (पक्ष) यदि तन्त्रेण शक्यते (पठितुं) तदाऽप्येवमूह । यदि न शक्यते भेदेन द्वयोः संभवत्तदा द्विवचनेनोहः । इडा- अस्माननुवस्ता घृतेर्यामा पदेषु वैश्वानर्य शाकर्यो यज्ञानस्थिता वैश्वदेव्य. । द्विवचनेन इडे (अ)ऽस्मान्ययो पदयोर्वैश्वानर्यौ शाकर्यो वावृधानोपयज्ञमास्थितौ वैश्वदेव्यौ । एव याजमानविधिः ॥

एवं दीक्षणीयादि सर्वत्र । एवं सस्थिता ध्रौवाज्यधारणं प्रकृतिवत् । उत्तरेण बर्हिः प्राग्वंशमित्यादि । त्वमग्न० अयासि च० इत्यन्तं पूर्वस्मिन्विहारे । आ वो देवास इत्यादि पूर्णाहुत्यन्त प्रतिविहारमावर्तते । यज्ञस्योद्यमनार्थत्वात् । दीक्षा आहुतयो यजमानसंस्कारार्थत्वात्कृष्णाजिनादिसर्नीहारप्रस्थापनान्तं पूर्वस्मिन्विहारे सर्नीहारप्रस्था- पनात्पूर्वं समन्वारम्भहोमः । अपतमित्यादि द्वादशाहप्रकृतित्वात् । व्रतश्रपणादि पूर्वस्मि- न्विहारे ।

श्वोभूते सोमपरिषेपणादि सर्वत्र प्रायणीयाकर्म । तत्र पूर्ववद्याजमानकृत्यम् । स्थाली- निधाने कृते सोमक्रयः सर्वत्र शुण्ठ्या क्रयः । एकामिष इत्यादि सखायः सप्त पदा० इत्यन्त प्रतिविहारमावर्तते । तो ते राय इति सा हन० सं देवी चाऽऽवर्तते । त्विषी- मन्तस्त्वेत्यावर्तते । तत्र तत्र पदनिधान भेदेन पूर्वस्योत्तरतः दक्षिणस्य पुरस्तात् पश्चि- मस्य दक्षिणत उत्तरस्य पश्चादेवं गार्हपत्याहवनीययोः शीते भस्मनि—अपि पन्था० आवर्तते । गायत्र इति च सर्वत्र दिशाक्रमा एवं मुष्णीषं विसृज्य मैत्रावरुणाय प्रयच्छति, इतरेभ्यः प्रयच्छति । मित्रो न एहि० इन्द्रस्योरु० उदायुषा० उर्वन्तरिक्षं० एकैकस्य कृत्वेतरेषामावर्तते । प्रच्यवस्व० इत्यादि प्रतिविहारमावर्तते । आतिथ्यायां पूर्ववद्या- जमानकर्मैकरत्वात्पत्न्याः प्रतिविहारमन्वारम्भः । आतिथ्यायाः पूर्वस्यां शालायां व्रतदान, तानूनप्त्रग्रहणाभिमर्शनावघ्राणं प्रतिविहारमावर्तते । व्रतेष्वपि नयनपक्षे सर्वे संसृज्य पिबति, आप्यायननिह्नव (योः) प्रतिविहारमावर्तते । कृतेष्वव्यवान्तरादि-

द्रोपायनं मदन्तीभिमार्जनं च पूर्वस्यामेव । प्रवर्ग्यसंभरणं पूर्वस्योत्तरस्य च द्वितीयतृतीययोरूक्थ्यत्वान्न प्रवर्ग्यः । प्रवर्ग्यपात्राणामपि भेदः । नमो वाचे० तन्त्रेण । तन्त्रसंभव इतरथा भेदेन मेथीनिधानकाले पूर्वस्या निधायोत्तरस्य अनाधृष्या० इत्यावर्तते । अपश्यं गोपा० नेत्यूहः । तन्त्रेण । केचिद्वीक्षणस्याशक्यत्वाद्भेदेनेति भाष्यकृत् । तस्मिन्पक्षे—अपश्यं गोपावनिपद्यमानाविति । अस्मिन्सर्वतोमुखे तन्त्रेण भेदेन पर्यायेणेति यदुक्तं तद्याजमानस्य । घर्मशेषभक्षणकाले संमृज्य पूर्वस्मिन्नेव भक्षणं—हुतः हवि० यदि हुतानि हवींषि पितरो न स्थो मा मा हिंसिष्ट । केचिदूहेन—हवींषि पितरौ न स्थो मा मा हिंसिष्टं० । अस्याम वो देवौ घर्मौ मधुमतः० इत्यविकारेण कर्तृवाद्त्वात् । अशीमहि त्वा मा मा हिंसीः । आपो हि ष्ठा० मार्जनं पूर्वस्मिन्विहारे मदन्तीभिमार्जनं च उत्तरशान्तिस्तन्त्रेण, तन्त्रसंभव उत्तरत भेदेनोपसदि याजमानं कल्पः पूर्ववज्जपो पौर्वाह्णिकस्य प्रचर्ये वेदिकरणाद्यभिमन्त्रणं चतुःशिखण्डा० उत्तरवेदिदेशस्य मध्ये शङ्कुमित्यादि शर्कराभिरिति वाक्यलेखापूरणान्तमापराह्णिक्यौ प्रचर्योपसदौ ।

श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य प्रजापतिस्त्वेत्यादिकाठकविषय. । संचितोक्थ्येन होताऽनुशंसति इत्यन्तं कृत्वाऽऽपराह्णिक्यौ प्रवर्ग्योपसदौ उपसीद सर्वत्र द्वादशाहवत् । संभारयजूंषि व्याचष्टे ।

यूपच्छेदनकाले— अग्निषु प्रथमं चतुरो यूपान्मन्त्रेण[1] छिनत्ति, प्रतिविहारमेकैकं प्रतिविहारमुपशयपात्नीवतयोर्भेदः । ततो द्वादशाह औपवसथ्येऽहनि पौर्वाह्णिकीभ्यां प्रचर्य तदानीमेवाऽऽपराह्णिकीभ्यामित्यादिप्रवर्ग्योद्वासनकाले - उच्छिष्टखर इत्यादि—अजामग्नीध इत्यादि इमम् षु० इत्यन्तं पूर्वस्य कृत्वोत्तरस्य कृत्वा नात्रोच्छिष्टखरं, मार्जनं यजमानपत्न्योः । उदु त्यं० चित्रं० इत्यादि ।

केचित्प्रतिविहारं प्रवर्ग्योद्वासनं च कुर्वन्ति । [illegible] कृत्वा काले इतरः सर्वत्र विधिः । केचिदुत्तरस्य काठकपक्षे सावित्रो नेष्यते पक्षे षोडशीति प्रतिषेधादिति ।

अथे [illegible] इत्यन्तम् । तत आग्निष्टोमिकमग्निवत्युत्तरमित्यादि (प्रतिपक्षाञ्जनमावर्तते) । यस्योभयविति च यजमानस्य । केचित्पूर्वस्मिन्नेवेति, संस्कारत्वात् । उपरवं प्रतिविहारमावर्तते । अथाग्नीषोमीयपशौ याजमानान्यावर्तन्ते । त्रिवृत्पलाशे० औहेन वा । ऊहपक्षे इतरथा भेदेन इतराण्यैष्टिकानि पूर्ववत् । प्रैतु ब्रह्मणस्पत्नी० इत्यादि वैश्वानरं ज्योतिः० इत्यन्त पूर्वस्य कृत्वा, एवमितरेषामावृत्तिः । अवान्तरदी-

---

1 यूपास्तन्त्रेण ।

क्षाविसर्ग उत्तरस्मिन् विहारे सृष्टिविसर्गश्च । आपो देवी० इत्याद्यैष्टिकं यूपसंमार्जनकाले अग्निष्ठं पूर्वस्य तस्योत्तरदक्षिणस्योत्तर पश्चिमस्य तस्योत्तरं दक्षिणस्योत्तर पश्चिमस्य तस्योत्तरस्येति प्रायानुवादः । दैयासेन सर्वत्रोपशयनीयादि परिश्रयणान्तं पूर्वस्य कृत्वा क्रमेणेतरेषाम् । केचिद्यूपसंमार्जनकाले एकादश यूपान्विभज्य च त्रिरात्रवत्प्रतिविहारमित्यवन्ति, (ऋत्विग्व- रणकाले पूर्वस्मिन्नेव याजमानवरणम ।) जुष्टो वाचो भूयासं० ऋचा स्तोम१० प्रति विहारमावर्तते याजमानम् । रेवतीर्यज्ञपतिं० इत्यादि परादावर्तते । यजमान इत्येकस्य कृत्वा क्रमेणेतरेषाम । यास्ते मूल० इत्यावर्तते । मित्ररूपेतरेति भेदेन यजमानः— नमस्त आतान० मकृदनर्वा प्रेहि० । इत्यादि पत्नीकार्यमेकस्य कृत्वा, इतरेषां यजमा- नस्य वपाश्रपणपर्यन्तारम्भ आवर्तते । आपो देवी शुद्धायुव० आपो हि ष्ठा० इत्यादि- भिर्मार्जनं च यजमानपत्न्योः पूर्वस्यैव सुब्रह्मण्य पितापुत्रीयादीनि क्रमेण सुब्रह्मण्याह्वानं यजमानपत्न्योरन्वारम्भस्य विद्यमानत्वात् । पूर्ववत्सुब्रह्मण्यन्वारम्भादि । पशुपुरोडाशा- ङ्गयागेष्वैष्टिकत्वे याजमानं (पूर्ववत) । वसतीवरीपरिहरणकाले क्रमेण वेद्यामासादनं यजमानपत्न्यो । रात्रौ दोह विशेष -त्र्यम्बि -शाः स्य तन्तूनां पवित्रे महाऽऽगच्छत । शिवा इमा रुजवोऽभिधान्यग्निर्योप सेवताम । अयक्ष्मा व प्रजाभिः संसृजामि० ध्रौश्रमास्यज्ञान० कलशाद्यनतिर्विलान० दोहयाजमानानि तन्त्रसंभव इतरथा भेदेन । सर्वत्र परिस्तरणान्तम ।

महारात्रे बुद्ध्वेत्यादित्रिवृदग्निष्टोम --आग्नेयमेकं वा । अतिग्राह्यपात्रं प्रयुनक्ति । पञ्चदशेन्द्रमेकम । सप्तदशसौर्यमेकम । त्रीणि षोडशिपक्षे । उक्थ्यपक्षे न त्वतिग्राह्याः । सवनीयपशूना पात्रसादनकाले पञ्चदशादिषु मैत्रावरुणदण्डभेदोऽग्नीषोमीये च अग्नी- षोमीयकालेऽन्यतद्विहृत्वा प्रयोग । पत्नीजनीग्रहणं पूर्वस्मिन्नेव । नमनीवर्गेनुप्रवेशनं क्रमेणैव । निग्राभ्यास्थ० वाचनं क्रमेण । पवित्र स यजमान० इत्यादिर्विरमति धारयन्तं क्रमेण । त्रिवृदैन्द्रवायवाग्र । पञ्चदश शुक्राग्र । सप्तदश आग्रयणाग्र । एकविंश ऐन्द्रवायवाग्र । प्रष्टवेशनग्रहाग्रता पञ्चहोताभिमर्शनमावर्तते प्र(ष्टा)होमाभिष्ण(ष्प)वमा- नस्य स्तुतस्येत्यन्तमेकस्य कृत्वेतरेषा विरागे ह। त० इत्याद्यावर्तन्ते अत्र पशुकाले (त्रिवृत) मारस्वतीमेषी । तस्यातिरात्रवत्कल्प । उपशयनिर्देश. । एवं पशोर्वेपा- मार्जनान्तम् ।

केचिदेकादशिनान्सर्वान्वा एकविंशत्यश्वतर वा द्विभज्योपाकुर्वन्ति । एष विधिः पूर्वस्य । द्वावितरेषाम् । त्रयस्त्रय. । केचित्कापेयानेवोपाकुर्वन्ति । अथवा क्रतुपशून्वा

१ स्यतामि० । २ उपोद्गातादिऋत्विग्वरणकाल । ३ द्वौ द्वावितरेषामिति पाठः।

यथा सत्स्थमाश्वलायनमतात् । अथवा बौधायनमतादाग्नेयं वा । सर्वत्र प्रतिविहारं द्वादशाहे तथोक्तत्वाद्बौधायनमतेन । मार्जनान्ते प्रातःसवनाय सप्रसर्पन्तीत्यादि आगन्त्रा० वितारं० इत्यन्तमेकस्य कृत्वा, इतरेषाम्—उपमा द्यावापृथिवी० दृंहे स्थः० इत्यादि । सूर्यं वायुमग्निं यमं सरस्वतीं च सक्रदितरवत्सर्वेषु कुर्वन्ति । आसन्नाभिमर्शनं, क्रमेण द्विदेवत्यकाले सक्रेदाऽदित्योपस्थानम् । केचित्सर्वत्र शुक्रान्वारम्भ आवर्तते, इन्द्रेण मन्युना० इत्यादि । इडान्वारम्भ आवर्तते । इडाभक्षण पूर्ववत् । तत्र गच्छति सत्य आसीनाय भक्षानाहरन्ति । सह शालायामेवेति बौधायनवचनात् । एवं भक्षणं सर्वत्र यजमानचमसाभ्यवये पूर्वस्मिन्प्रतिहारे स्थिताय यजमानाय भक्षान्वाऽऽहरन्ति । सर्वानेकस्मिन्पात्रे आनीय तन्त्रेण भक्षणम् । तन्त्रसंभवे, इतरथा भेदेन । तन्त्रेणाध्यक्ष एव भक्षयति यजमानः । पत्नीजनी सादयति । पूर्वस्मिन्नेव स्तोत्रोपाकरणप्रभृति–स्तुतस्य० इत्यन्तं प्रतिविहारमावर्तते । उपगानार्थमिति तत्राऽऽसीनस्य विहितत्वात् । तस्मादिडायै हिंकुर्वित्यादि नाऽऽवृत्ति । स्तुतस्य स्तुतमसि० इत्यावृत्तिः शस्त्रमिति च । आज्यमरुत्वतीयवैश्वदेवानां तन्त्रेणाहतं शस्त्राणां शस्त्राणि अस्योर्जं सहः शस्त्राणि दुहा मा मा शस्त्राणां शस्त्राणि गम्याऽऽदिन्द्रियावन्त० इति विकारेण मा मे सन्त्याशी० इति च यज्ञा बभूवुस्ते जज्ञिरे त वावृधिरे ते देवानामधिपतयो बभूवु । ते अस्मान् अधिपतीन्कुर्वन्तु० इत्यादि । केचिदविकारेणैवमितरेषु शस्त्रेषु । एकवचनेन बहुवचनेन वा तन्त्रसंभवे इतरथा भेदेन—स्तुतस्य स्तुतमसि० उहासे पूर्ववद्द्रष्टव्यम् । एवं सर्वत्र स्तोत्रेषु शस्त्रेषु च ।

माध्यंदिनस्याभिषवादि विष्णो त्वं न० इत्यन्तं पूर्ववत् । दधिघर्मभक्षणं तन्त्रेण तन्त्रसंभवे इतरथा भेदेन । तन्त्राऽसंभव्यनेहः, भक्षाभिनायकस्यानन्तरस्य सवनीयासादनात्पूर्वं प्रचरण्या (त्र) विगृहीतमित्यादि । यजमानस्य नीतानुमन्त्रणान्तं पूर्वस्य हुत्वा पश्चादितरेषाम् । सर्वत्र द्वादशाहे ऋत्विग्भ्यः अत्र पूजनं च पृथक्पृथक् । न पृथगिति भाष्यकृत् । विषाणाविसर्गेन स्नानमुत्करे चात्वाले वा । मरुत्वतीयाभ्यामित्यादि । अतिग्राह्यकाले गृहीतानामेव होमः । शेषं पूर्ववत् ।

अथ तृतीयसवनयजमानानि । आदित्याारम्भ आवर्तते । सर्वत्रातिग्राह्यवर्जनं क्रमेणाशिरावनयनं क्रमेण सत्यनप्रभृतिहोत्रचमसान्वारम्भं क्रमेण, पञ्चहोत्रप्रहावकाशश्रुतस्त्वमित्यन्तं प्रतिविहारं, • ‹ ‹ • ‹ । विष्णो त्व न० इत्युपस्थानान्तं प्रातःसवनवत् शृतः हवीः ३ शमित० इति । अ नाराशंससादनात्पूर्ववत् । तत्र शुक्रान्वारम्भः । पिण्डप्रदानमावर्तते । षड्ढोता प्रजापते न त्वदेतानि० च तन्त्रेण भेदेन वा ।

१ हुता । २ प्रासादना आऽग्रामन्तानं गाना दक्षिणा ।

वाममद्य० इत्यादि । पत्नीजननीनयन, पूर्वस्मिन्विहारे त्रिवृदग्निष्टोमसंस्थात्वं, पञ्चदश उक्थ्यः संस्थात्वं, एकविंश. षोडशी संस्थात्व, उक्थ्या वा द्वादशाहे—येऽन्तरेष्टा-वुक्थ्या इति । (यथा संमूर्याः मूर्यामीति) तन्त्रेणाऽऽयुरिन्द्रियमावर्तते । केचित्त-न्त्रेण । केचित्—यज्ञा आगच्छन्त्विति षोडशीग्रहोमान्त, अग्नीदोपयजानित्यादि यज्ञपुच्छं सर्वत्र ।

तत्र याजमानानि—बर्हिषामह देवयज्याभिरित्यादि हारियोजनभक्षणमावर्तते । तन्त्रेण वा अप्सु सौतस्य पूर्वस्मिन्विहारे । केचिदावर्तते । दधिद्रप्सभक्षणम् । भेदेन शूलोद्वासनादि, समिदाधानमावर्तते । उत्कर्षपक्षेऽनुत्कर्षपक्षे च विष्णुविक्रमणादि । ममहं प्रजया० इत्यन्तं पूर्वस्मिन्नेव समिद्धो अग्न० वसुमान्० यो न: सपत्न० इत्या-वर्तते । अग्ने गृहपत० इति सकृत् । अग्ने वह्नि० इत्यावर्तते । ज्योतिषे तन्तव० इत्यादि सोमजपान्त पूर्वस्मिन्नेव यूपोपस्थान भेदेन ।

अग्निना देवेनेत्यादि जागतविष्णुक्रम पूर्वस्मिन्नेव । केचित्प्रतिविहारमिच्छन्ति । इन्द्रेण मयुजो वय८० इत्यावर्तते ।

अवभृथादिसर्वत्राप्सुप्रचारस्तन्त्रेणैकस्मिन् । अपाम सोममित्यादि तन्त्रेणाऽऽसमि-दाधानान्तमुपस्थान च । सदनोदयनीयादि सर्वत्रानूबन्ध्यावपाहोमे कृते प्रतिविहारं पात्नीवतकर्म । अनूबन्ध्या समाप्य पयस्या वा सदसो हविर्धानस्य, इत्यादि यत्कु-र्वीत तद्धमानुमन्त्रण तमावर्तते । अय नो नभसा० स त्व न:० इत्युत्तरविहारा-र्थस्यैव ।

केचित् अयं त० इत्येकं प्रतिविहारं ये देवा० वेदमुपस्थ आधायेत्यादिब्राह्मणतर्पणान्तमुत्तरस्मिन् । केचित्—पूर्वस्मिन्नेवेति । सोमजपादिवृष्टयन्त सर्वत्र (स्व) सिद्धान्त. ।

अथ प्राजहितं समारोप्य, उदमून० इत्यध्यवसाय मध्ये गार्हपत्य इत्यादिदार्शिक-षादिचतुष्टयं विहृत्यान्वाधानादि—उदवसानीया । तत्स्थाने पूर्णाहुतिर्वा । केचिदेकमेव विहारं कुर्वन्ति । तस्मिन्पक्षे उदवसानीया पूर्णाहुतिः प्रतिदिश सौमिकविहारा इति वचनात् । समाप्त. सर्वतोमुखः ।

ततः परेद्युरागामिपर्वणि वा सौत्रामणी मैत्रावरुणी वा । दिङ्मात्रमस्माभिरुक्तमन्य-थोक्तं प्रमादाद्वा तत्र प्रयोगविशारदैः शान्तमनस्कैस्तत्परीक्ष्य समाधेयम् । वैकृतेषु कर्मसु यावत्संभवेत्तावद्याजमानं तथाऽन्यानि कर्माणि भवन्ति (भ० श्रौ० २२।७।२१) इति भरद्वाजवचनादेव सिद्ध भवति ॥

अथ सप्तदशप्रश्नेऽष्टम पटल ।

अथ षडहमाह—

साध्यानां षडहेन सुवर्गकामः ॥ १ ॥

साध्यशब्दो देवगणविशेषवाची । अत्र सर्वत्र दर्शन शास्त्रीयनिश्चय. । यद्यप्ययं द्वात्रोऽहीनत्वाद्यजतिचोदनाविषयस्तथाऽप्यत्र केषाचित्सारस्वतसत्रधर्माणा सद्भावमभि· त्य विद्वांस आसत (तै० स० ७–२–१) इत्यादिचोदनया विहित· । ते च धर्मा ाश्वत्थी हविर्धानम् (स० श्रौ० १७–८–४) इत्यादिना वक्ष्यन्ते ॥ १ ॥

एतमेव सत्रत्वोपचारमभिप्रेत्य प्रशसति—

पृष्ठ्यः षडहः ॥ २ ॥

भवतीति शेषः । सत्ररूपे द्वादशाहे य पृष्ठ्य षडहस्तस्मिन षट्सु दिनेषु यानि स्तोत्राणि रथंतरबृहद्वैरूपवैराजशाक्वररैवताख्ये . . . . एतान्यत्रापि टसु दिनेषु क्रमेण भवन्तीत्यर्थ. ॥ २ ॥

एतेषु षट्सु पृष्ठस्तोत्रेषु प्रथमद्वितीययोरह्नोरनुष्ठेये रथतरबृहत्पृष्ठे ये स्तोत्रे ते विशे· गाऽऽह—

बृहद्रथंतराभ्यां यन्ति ॥ ३ ॥

शब्दशास्त्रप्रोक्त एवात्र बृहच्छब्दस्य पूर्वनिपात । अनुष्ठान तु रथंतरस्यैव प्रथमम् । न्ति स्तोत्रमनुतिष्ठेयुरित्यर्थ. ॥ ३ ॥

आश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतः ॥ ४ ॥

ये यजमानाः सदोहविर्धानाभ्या मण्डपाभ्या युक्ता षडहे प्रवर्तन्ते तेषां हविर्धा- माग्नीध्रं चेति . . . . . . भवतोऽश्वत्थकाष्ठनिर्मिते उभे कार्ये । तत्रा . . . . र्गमासनमिति भाव ॥ ४ ॥

धर्मान्तरमाह—

चक्रीवती भवतः ॥ ५ ॥

यथा रथस्य शकटस्य वा चक्र तथा चक्र ययोराग्नीध्रहविर्धानमण्डपयोस्ते चक्री- ती । अयमर्थः—चक्रयोरक्षं प्रक्षिप्य शकटाकार कृत्वा तस्योपरि फलकान्यास्तीर्य षामुपरि भूमाविव मण्डपं निर्मातव्यमिति ॥ ५ ॥

धर्मान्तरमाह—

उलूखलबुध्नो यूपो भवति ॥ ६ ॥

यथा काष्ठमयस्योलूखलस्य मूलमतिस्थूल भवति तथा यूपमूल कर्तव्यम् ॥ ६ ॥

धर्मान्तरमाह—

प्राञ्चो यान्ति ॥ ७ ॥

चक्रयुक्ताग्नीध्रादिभिः सह प्राङ्मुखा गच्छेयुः । स्वर्गलोकस्य प्राग्वर्तित्वेन प्रतिभानात् (७।२।१) । एतच्चोक्तमापस्तम्बेन-तस्मिन्संस्थितेऽध्वर्युः शम्यां प्राचः प्रास्यति स यत्र निपतति तद्गार्हपत्यं तस्मिन्षट्त्रिंशतं प्राचः प्रक्रमान्प्रक्रामति तदाहवनीयं । चर्कीवन्ति सदोहविर्धानान्याग्नीध्रं चाऽऽश्वत्थी हविर्धानमाग्नीध्रं चोलूखलबुध्नो यूप ... एव तोपरवान्खनन्ति (आप० श्रौ० २२।१२।४) इति । एकस्मिन्नह्नि समाप्ते सति परेद्युः प्रातः शम्याक्षेपमात्रं गत्वा तत्राहरन्तरमनुष्ठाय तस्मिन्नपि समाप्ते ततः परेद्युरपि तथेत्यर्थः ॥ ७ ॥

सरस्वत्या यान्ति । आक्रोशन्तो यान्ति ॥ ८ ॥

या सरस्वत्याख्या नदी तया सह तत्तीरे प्रतिदिनं गच्छेयुः । उत्साहातिशयेन क्रियमाण उच्चतमो ध्वनिराक्रोशस्तं कुर्वन्तो गच्छेयुः ॥ ८ ॥

एवमनुष्ठिते कालावधिरूपं धर्मान्तरं विवक्ते—

यदा दशशतं कुर्वन्त्यथैकमुत्थानम् ॥ ९ ॥

एकेन वृषभेण महिता दश गावो यावति कालेऽपत्यप्रसवेन गवां शतं संपादयन्ति तावन्तं कालं पूर्वोक्तप्रकारेणानुष्ठाय तदनुष्ठानादुत्थानं कर्तव्यमनुष्ठानं संपादयेदित्यर्थः । सोऽयमेकः समाप्तिकालः ॥ ९ ॥

कालावधौ पक्षान्तरमाह—

यदा शतं सहस्रं कुर्वन्त्यथैकमुत्थानम् ॥ १० ॥

शतं गावो यदा पूर्ववत्सहस्रं संपादयन्ति सोऽयमेक उत्थानकालः । न चातीतपक्षेण साकर्यं शङ्कनीयम् । प्रसववैचित्र्येण न्यूनाधिककालसंभवात् ॥ १० ॥

कालावधावेवापरं पक्षद्वयमाह—

यदैषां प्रमीयेत । यदा वा जीयेरन् । अथैकमुत्थानम् ॥ ११ ॥

एषां यजमानानां मध्ये कश्चिद्यदा प्रमीयेत सोऽयमेक उत्थानकालः । यदा वा राष्ट्रक्षोभादिना शत्रुभिरेते यजमाना जिता अपहृतसर्वस्वा भवन्ति सोऽयमेक उत्थानकालः । तस्मात्तत्पर्यन्तं षड्रात्रं आवर्तनीय इत्यर्थः ।

केचिच्चत्वारः षड्हा निकायिनस्तैत्तिरीयके आम्नाताः । ताण्डिना विस्तारेणाऽऽम्नाताः । आपस्तम्बेनापि त्रिषु सारस्वतेषु वैश्वसृजोऽग्निं चिनुत इत्यत्र भाष्यकारेण साध्याना षड्हे वैश्वसृजस्य निवृत्तिरित्युक्तम् ।

तस्मात्सारस्वत इति गम्यते । सारस्वते ये धर्मा इहानुक्ता अप्यस्मिन्नुपसंहर्तव्याः । तस्य प्रयोग उच्यते—अस्मिन्कर्मणि बहुयजमाना द्वादशाहवदारम्भकाले सरस्वतीजघनोदके समुद्रसंगमे गोष्ठे वा षडहेन यक्ष्यामहे स्वर्गं लोकमाप्नवाम । विद्युदादि नाग्निचयनं न काठकः सक्षेदान्नं कृत्वा दश दश भागर्ष(गाव ऋष)भ एकश्चोपकल्पन्ते । द्वादश दीक्षा द्वादशोपसदश्च कृत्वा यूपकाल एक एव नैकादशिनाः । उलूखलबुध्नो यूपो भवति, इति श्रुतेश्च । आश्वत्थी हविर्धाने चाऽऽग्नीध्रं चेति । अश्वत्थकाष्ठेन रथाकृतिवद्धविर्धानकरणं तथैवाऽऽग्नीध्रमण्डपमिति च्छन्दोगवचनाच्च । सदश्च पत्नीशाला च येन केनचित्काष्ठेनाऽऽश्वत्थेन वा कृते भवत । सदोहविर्धानादीनामुक्ताना चक्रवत्त्वं प्राग्वंशकरणकाल एव करोति । अथस्तात्फलका[न्या]स्तीर्णा [नि] भवन्ति, तस्योपरि विहारकल्पनं, बहुमृत्तिका प्रमार्ये । एवमुत्तरवेद्यामाग्नीध्रीयमार्जालीयधिष्णियादिषु शामित्रदेशेऽपि मण्डलाकार इति च्छन्दोगवचनात् ।

केचिदेवं वर्णयन्ति—एवं हविर्धानादीन् ...... न फलकास्तरणं भूम्यामेव विहारकल्पनम् । तस्य च लिङ्गं पांसून्हरेयुः । तथोत्तरवेदिधिष्णियेभ्यश्चक्रवता निवेद्य (श्य) यथायतनं निर्वपेयुरिति । उलूखलबुध्नो यूप इति वचनादैकादशिनाना निवृत्तिः । हविर्धानकाल उक्तप्रकारं करोतीति । शामित्रं च तथैवात्रापि नोपरवान्खनन्ति आलेखमात्रमेव परिलिखितमिति च्छन्दोगवचनात् । यूपोच्छ्रयणकाले धत्ते शिल्प इति । पृथिव्यै त्वेति प्रोक्षणम् । अपां सर्वासां समाप्ति, न शुन्धनाम् । न यवोऽसि, नावस्तरणं यूपाञ्जनं कर्तव्यम् । उदिविमिन्युन्नयनं । अग्नीषोमीय विधाय वसतीवरी परिहृत्य पयसा विशसनं कृत्वा महारात्र इत्यादित्रिवृदग्निष्टोममुपागानि । पाशि(र्शि)कस्य प्रथम तथैवाविग्राह्याः । पशुकाल आग्नेयमुपाकरोति । नोपशय उन्नामनं दक्षिणा च । पत्नीसंयाजान्तम् ।

अध्वर्युः शम्यां प्राचः प्रास्यति शालामुखीयस्यान्ते ललाटिकप्रदेशे सा यत्र निपतति तद्गार्हपत्यः । अग्निष्ठेऽनसि व्रीह्यादीन्यज्ञायुधानारोप्य प्रकर्षयति । पत्नीशाला च हविर्धानं चाऽऽग्नीध्रं च सदश्च मार्जालीयं च शामित्रं च प्रकर्षयति । रथचक्रमपि प्रकर्षयति । यत्र शम्या निपतति स शालामुखीयदेशः तस्मिन् प्राग्वंशं स्थापयति यथा शालामुखीयदेशे शालामुखीय संभवति । अत. षट्त्रिंशत्प्रक्रम उत्तरवेदिस्थानं तस्मिन्नुत्तरवेदिर्भवति तथा हविर्धानं प्रकर्षयति । उत्तरवेदिधिष्णियादीनां पांसूनाहृत्य यथायतनं निवपेयुः । आसन्द्यादीन् विसृ(त्र)स्य तान्यथास्थानं पर्यायेण तनोति । अग्नीनामग्निवत्प्रत्यसनयनं सर्वेषां (सर्वान्)केचित्समारोप्येति । चात्वालान्मृत्तिकामानीय चात्वालदेश उपरवदेशे च मन्त्रैर्लेखामात्रं करोति ।

अग्नीन्यथायतनं विहृत्य पयसा विशसनं कृत्वा श्वोभूते पञ्चदश उक्थ्य. ।

शुक्राग्रः पशुकाले यूपस्योत्तरभाग ऐन्द्रमुपाकरोति । अथ सारस्वतमेकयूपे । कापेयानामुपाकरणं प्राप्त यथापाठमेवोपाकरोति । पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते सप्तदश उक्थ्यः । पाष्ठि(ष्ठि)कस्य तृतीयः । तथैवातिग्राह्यः । आग्रयणाग्रः । पशुकाल उत्तरत एव सौम्यं पौष्णं च पूर्ववद्दक्षिणा पत्नीसंयाजान्तमहीनसंतत्यन्तं पूर्ववत् ।

श्वोभूत एकविंश षोडशी । षोडशिवर्जेत ऋतुकरणम् । ऐन्द्रवायवाग्रश्चयोऽतिग्राह्याः । पशुकाल उत्तरतो बार्हस्पत्य पूर्ववत्पत्नीसंयाजान्तम् ।

श्वोभूते त्रिणव उक्थ्य. शुक्राग्र । पशुकाले दक्षिणत. सावित्रं वैश्वदेवं च दक्षिणाग्निकं पूर्ववत् ।

श्वोभूते त्रयस्त्रिंश उक्थ्य. । न त्वतिग्राह्या. । दक्षिणादि ब्रूयुः । अथ वा यजमानामन्यमरणे च . . . . . प्रस्रवण(तमादाय)गच्छन्ति (एवं षडहमावर्तमाना यजमाना न गच्छन्ति प्रतिस्रोत) । शम्याप्रासनं तदुपोत्थानमित्यादि । ततः सौत्रामणी मैत्रावरुणी वा ॥ ११ ॥

ऋतूनां षडहेन सुवर्गकामः ॥ १२ ॥

यजेतेति शेष । ऋतूना द्वितीयेन प्रजाकाम (२२–२२–४) इत्यापस्तम्बः । अयतूंना षडह सर्व पूर्ववत् । सारस्वतीसंवत्सवर्जमुत्तरेषु त्रिषु केचिदिच्छन्ति । द्वादशाहवदौपवसथ्यान्तम् । पशुकाले कापेयाना प्रथम. ॥ १२ ॥

पृष्ठ्यः षडहेन ॥ १३ ॥

सुवर्गकाम प्रजाकामो वा यजेत । सङ्कल्पाद्योपवसथ्यान्त पूर्ववत् । द्वौ द्वावुत्तरेषु पञ्चसु स्यन्त्यासेन यूपैकादशिनी चेतरथा पूर्ववत् ॥ १३ ॥

देवानामुपरिष्टात्त्रिकद्रुकेण सर्वमायुरेति वसीयान भवति ॥ १४ ॥

सारस्वतपक्षे तृतीय उपरिष्टात्त्रिकद्रुकेण षड्रात्रेण यक्ष्ये सर्वकामार्थमायुष्कामार्थं वा । पूर्ववदहर्योगाविशेष: ॥ १४ ॥

त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य आयुर्गौर्ज्योतिरतिरात्रः सत्रसंमितेनाद्यं प्रजां पशूनोजो वीर्यमाप्नोति । अभ्यासङ्ग्यः पञ्चाहो विश्वजिदतिरात्रः ॥ १५ ॥

त्रिवृदग्निष्टोम प्रथमः । पञ्चदश उक्थ्यो द्वितीयः । सप्तदश उक्थ्यस्तृतीयः । ज्योतिश्चतुर्थ. । अग्नीषोमीय उक्थ्यो वा । तत्रापि षोडशि(शी) । अथ गौरथाऽऽयुरति-

रात्रः । शिष्टं सर्वं पूर्ववत् । ज्योतिरादीनामपि पत्नीसंयाजान्तं, नातिदेशोऽपि अभ्यासङ्ख्य. पञ्चाहो विश्वजिदतिरात्रः । गतः । शेष सर्वं पूर्ववत् । ततः सौत्रामणी मैत्रावरुणी वा ॥ १९ ॥

अथ सप्तरात्रोऽभिधीयते—

कौसुरुविन्देन सप्तरात्रेण पशवस्तानेवावरुन्धे । पञ्च पृष्ठ्यान्यहानि । पञ्चविंशोऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठोऽतिरात्रः ॥ १६ ॥

कौसुरुविन्देन सप्तरात्रेण यक्ष्ये पशुमान्स्यामिति । सर्वं द्वादशाहवत् । औपवसथ्यान्तं कृत्वा वसतीवरीः परिहृत्य परमा विशसनं कृत्वा महारात्रे बुद्ध्वा त्रिवृदग्निष्टोमः पाक्षि(ष्ठि)कस्य प्रथम । ऐन्द्रवायवाग्र. । अग्निष्ठ आग्नेय. पशु । पत्नीसंयाजान्तम् ।

श्वोभूते पञ्चदश· पाक्षि(ष्ठि)कस्य द्वितीयः । शुक्राग्रः । अग्निष्ठस्योत्तरत ऐन्द्रम् । अथोपशयः । पत्नीसंयाजान्तम् ।

श्वोभूते सप्तदश उक्थ्यः पाक्षि(ष्ठि)कस्य तृतीयः । आग्रयणाग्रः । अग्निष्ठस्य दक्षिणत ऐन्द्राग्नः । अथोपशयः । पत्नीसयाजान्तमहीनसततयः ।

श्वोभूत एकविंश उक्थ्य. । पाक्षि(ष्ठि)कस्य चतुर्थः । अत्र षोडशी । ऐन्द्रवायवाग्रः । अग्निष्ठस्योत्तरतस्तृतीये सारस्वतं दक्षिणतस्तृतीये सावित्रमथोपशयः । पत्नीसंयाजान्तमहीनसंततय· ।

श्वोभूते त्रिणव उक्थ्य. शुक्राग्र. । पशुकालेऽग्निष्ठप्रभृति उत्तरतश्चतुर्थे सौम्यं दक्षिणतश्चतुर्थे वैश्वदेवमथोपशयः पत्नीसंयाजान्तम् ।

श्वोभूते पञ्चविंशोऽग्निष्टोमो महाव्रतवान् महाव्रतस्तोत्रशस्त्रवान् स्तोत्रधर्माश्च पूर्ववत् । प्रथमश्चतुरात्रवत । आग्रयणाग्रः । पशुकालेऽग्निष्ठप्रभृत्युत्तरत· पञ्चमे पौष्णं तथैव दक्षिणतः पञ्चमे मारुतम् । अथोपशयनिर्देश· । पत्नीसयाजान्तं पाक्षि(ष्ठि)कस्य षष्ठाहर्विकारः पत्नीसंयाजान्तं कृत्वा सवशनादयोऽहीनसंततयः ।

श्वोभूते विश्वजित्सर्वपृष्ठोऽतिरात्रः । ऐन्द्रवायवाग्र· । पशुकालेऽग्निष्ठप्रभृत्युत्तरतो बार्हस्पत्यं तथैव दक्षिणतो वारुणमुपशयनिर्देश·, तिरोअह्न्यान्तं यज्ञपुच्छादिसर्वं द्वाद[illegible] । सौत्रामणी मैत्रावरुणी वा ॥ १६ ॥

सप्तर्षीणामृद्धिकामः ॥ १७ ॥

द्वितीयः सप्तर्षीणां सप्तरात्रः । सप्तर्षिणा सप्तरात्रेण यक्ष्ये स्वर्गार्थमिति संकल्पः । सर्वं पूर्ववत् । (अहर्योगाविशेषः ।) ॥ १७ ॥

पृष्ठ्यः षडहस्त्रयस्त्रिंशं महाव्रतमतिरात्रे ॥ १८ ॥

पृष्ठ्यः षडहः समूढः । महाव्रतवानतिरात्रः महाव्रतस्तोत्रशस्त्रवान्, अतिरात्र इति । पूर्ववदनीका पशुकल्पश्च ॥ १८ ॥

प्राजापत्यस्तृतीयः प्रजाकामः ॥ १९ ॥

प्राजापत्येन सत्रगात्रेण यक्ष्ये प्रजार्थमिति संकल्प । सर्वं पूर्ववत् ॥ १९ ॥

पृष्ठ्यः षडहः प्राजापत्यस्त्रयस्त्रिंशं महाव्रतम-तिरात्रे ॥ २० ॥

पृष्ठ्यः षडह प्राजापत्य महाव्रतमतिरात्रे, प्रजापतिना दृष्टमित्यर्थः । एवमहर्योगोऽस्मिन्महाव्रते तद्धर्माश्च सर्वेऽतिग्राह्या । प्राजापत्य पशु । अनीका पशुकल्पश्च पूर्ववत् । ततः सौत्रामणी मैत्रावरुणी वा ॥ २० ॥

पृष्ठ्यावलम्बेन प्रतिष्ठाकामः । पृष्ठ्यः षडहः पृष्ठ्यावलम्ब्यस्त्रयस्त्रिंशं महाव्रतमतिरात्रे ॥ २१ ॥

पृष्ठ्यावलम्ब पञ्चम । पृष्ठ्यावलम्बेन सत्रगात्रेण यक्ष्ये, प्रतिष्ठार्थमन्नार्थं वेति । सत्रर्षीणा सत्रगात्रवत्सर्वम । अहर्योगविशेष— पृष्ठ्यस्तोमा षडहं षाडाहिकाः स्तोमा भवन्ति न साक्षाद्रूपादयो भवन्ति । रथंतरपृष्ठ पृष्ठ्य षडहो महाव्रतवानतिरात्रो व्याख्यातः ॥ २१ ॥

छन्दोमपवमानेन पशुकामः । पृष्ठ्यः षडहश्छ-न्दोमपवमानं महाव्रतमतिरात्रे ॥ (ख०२०) ॥ २२ ॥

छन्दोमपवमानमिति कर्मनामधेयम । छन्दोमपवमानेन सत्रगात्रेण यक्ष्ये पश्वर्थमिति । सर्वं पूर्ववत् । अहर्योगविशेष —पृष्ठ्य षडहश्छन्दोपवमान महाव्रतमतिरात्रेऽतिरात्रे छन्दोमपवमानानि चतुर्विंशादियुक्त महाव्रतमतिरात्रसंस्था भवति । पूर्ववदनीका पशुकल्पश्च । केचित्केवलातिरात्रे छन्दोमपवमानं महाव्रतमाम भवति, इति ॥ २२ ॥

जनकः सप्तरात्रेण पुरुषकामः ॥ २३ ॥

अष्टमो जनकसप्तरात्र इति भाष्यकृत । सप्तरात्रेण यक्ष्ये स्वर्गं लोकमवाप्नवानीति प्राग्वत्सप्तरात्रवत् ॥ २३ ॥

तस्य चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि । विश्वजिन्महाव्रतमतिरात्रे । ऐन्द्रेण सप्तरात्रेणा त्यन्या प्रजा भवति । ओजिष्ठो भवति । त्रिवृद-ग्निष्टोमः पञ्चदश उक्थ्यः । सप्तदश उक्थ्योऽभिजि-दग्निष्टोमः । सर्वस्तोमोऽतिरात्रः ॥ २४ ॥

तस्य जनकसप्तरात्रस्य । अत्रायं विशेष — चत्वारि त्रिवृन्त्यहान्यग्निष्टोमः प्रथमो न नियतः । इतर उक्थ्याश्चतु षोडश्यन्तास्त्रिवृत्स्तोमाः । पाष्ठिकाणां चतुर्णां महास्तोमानां विधिः । पृष्ठ्यवदतिग्राह्या । पञ्चमे विश्वजित्स्तोमोऽपि पत्नीसंयाजान्तम् । महाव्रत-स्तोत्रमतिग्राह्या भवन्ति । न प्राजापत्य पशु । ज्योतिष्टोमो वैश्वानरोऽतिरात्रः । आग्निकी पशुकल्पमिश्च पूर्ववत् । तत सौत्रामणी मैत्रावरुणी वा ॥ २४ ॥

अथाष्टरात्रोऽभिधीयते—

अष्टरात्रेण ब्रह्मवर्चसकामः । पृष्ठ्यः षडहः पञ्च-
विंशोऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठोऽति-
रात्रः ॥ २५ ॥

उत्पत्तिविधिरप्ययम् । ' य एव विद्वानष्टरात्रेण यजेत ब्रह्मवर्चस्येव भवति ' (तै० सं० ७–२–३) इत्याम्नात । अष्टरात्रेण यक्ष्ये ब्रह्मवर्चस्वी भूयासमिति । सर्वं द्वादशाहवत् । औपवसथ्यान्त वसतीवरी. परिहृत्य प्रथमा विशसनं कृत्वा श्वोभूते त्रिवृदग्निष्टोमः । ऐन्द्रवायवाग्रः । अग्निष्ठस्य दक्षिणत ऐन्द्र । पत्नीसंयाजान्तम् । श्वोभूते पञ्चदश उक्थ्यः । श्वोभूते सप्तदश उक्थ्य । श्वोभूत एकविंशः । अत्र षोडशी ऐन्द्रवायवाग्र । पशुकालेऽग्निष्ठप्रभृत्युत्तरतस्तृतीये सारस्वत । पत्नीसंयाजान्तम् । श्वोभूते त्रिणव उक्थ्यः शुक्राग्रः पाष्ठिकस्य पञ्चमः । पशुकालेऽग्निष्ठप्रभृति दक्षिणत-स्तृतीये सावित्र पत्नीसंयाजान्तम । श्वोभूत त्रयस्त्रिंश उक्थ्य आग्रयणाग्रः । अग्निष्ठ-प्रभृत्युत्तरतश्चतुर्थे सौम्यं तथैव दक्षिणतश्चतुर्थे वैश्वदेवम् । पत्नीसंयाजान्तम् ।

श्वोभूते पञ्चविंशोऽग्निष्टोमो महाव्रतवान पूर्वमेव व्याख्यात । पशुकालेऽग्निष्ठप्रभृत्यु-त्तरतः पञ्चमे पौष्णं दक्षिणतो वा पञ्चमे मारुत पत्नीसंयाजान्तम ।

श्वोभूते विश्वजित्सर्वपृष्ठोऽतिरात्र । पशुकाल उत्तरत षष्ठ बार्हस्पत्यं दक्षिणत. षष्ठे वारुणम् । षोडशी । चतुर्थो महारात्र इति वचनात्तत्र निरोऽहनान्तं. गुञ्जपुञ्छादि पयस्यान्तमुत्तमाय रोहिणी वत्सतरीमित्यादि सर्वमेतदान भवति । अहर्गणेषु चैतादृश-मेतद्भवतीति छन्दोगकात्यायनयोर्वचनात् ॥ २५ ॥

अथ नवरात्रोऽभिधीयते—

त्रयो नवरात्रा आयुष्कामो यजेत ॥ २६ ॥

नवरात्रेण यजेत (७–२–४) इति ब्राह्मणार्थोऽनुसंधेय. ॥ २६ ॥

पृष्ठ्यः षडहो गौश्चाऽऽयुश्च द्वे अहनी विश्व-
जिदतिरात्रः ॥ २७ ॥

त्रिवृदग्निष्टोमः पृष्ठ्यः षडहस्य प्रथमः । ऐन्द्रवायवाग्रः । पशुकालेऽग्निष्ठ आग्नेयः । पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूते पञ्चदश उक्थ्यः शुक्राग्रः । उत्तरतो द्वितीय ऐन्द्रः पत्नीसंयाजान्तम् । श्वोभूते सप्तदश उक्थ्यः । आग्रयणाग्रः । पशुकाले दक्षिणतो द्वितीय ऐन्द्रः पत्नीसंयाजान्तमहीनसंततयः ।

श्वोभूत एकविंशः । अत्र षोडशी । ऐन्द्रवायवाग्रः उत्तरतस्तृतीये सारस्वतं पत्नीसंयाजान्तम् ।

श्वोभूते त्रिणव उक्थ्यः । दक्षिणतस्तृतीये सावित्रं पत्नीसंयाजान्तम् । श्वोभूते त्रयस्त्रिंश उक्थ्यः । आग्रयणाग्रः । उत्तरतश्चतुर्थे सौम्यम् । पत्नीसंयाजान्तमवशनादिनियमा भवन्ति ।

श्वोभूत आयुरतिरात्र आग्रयणाग्र उत्तरतः षष्ठे बार्हस्पत्यम् । दक्षिणतः षष्ठे वारुणम् । सर्वत्रापशव्यनिर्देशः । अहन्यहनि द्वादशशतं दक्षिणा । तिरोअह्न्यं यज्ञपुच्छादि सौत्रामणी मैत्रावरुणी वा ॥ २७ ॥

द्वितीयेन ब्रह्मवर्चसकामो ज्योतिर्गौरायुरुक्थ्यहोऽ-
भ्यासङ्ग्यः पञ्चाहो विश्वजिदतिरात्रः ॥ २८ ॥

अथ द्वितीयेन नवरात्रेण यक्ष्ये ब्रह्मवर्चसमवाप्नवानीति संकल्पः । सर्वं पूर्ववत् । अहर्योगविशेषः —त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य पाक्षि(र्क्षि)कोऽभ्यासङ्ग्यः पञ्चाहः प्रसिद्धः त्रिवृती द्वे सवने इत्यादिपञ्चाहे प्रथमेऽहनि षोडशी । अत्र पञ्चाहस्योऽन्त्यो नातिरात्रः । अस्मिन्नपि षोडशी । चतुर्थे चतुर्थ इति वचनाद्विश्वजिदतिरात्रः । अतीकाः पशुकल्पश्चि पूर्ववत् ॥ २८ ॥

शल्लीपिशङ्गेन । यं कामं कामयेत तमभ्यश्नुत
ज्योतिर्गौरायुरुक्थ्यहो ज्योतिर्गौरायुरुक्थ्यह आयुर्गौ-
रायुरतिरात्रः ॥ (ख० २१) ॥ २९ ॥

[illegible] । त्रिरात्र आवर्त्यमानो नवरात्र इति भाष्यकृत् । चतुर्विधेषु नवरात्रयागेष्वितरानीमुच्यमानस्य शल्लीपिशङ्ग इत्येतन्नाम । शल्लीपिशङ्गस्तृतीयः । शल्लीपिशङ्गेन नवरात्रेण यक्ष्ये, अन्नाद्यर्थम् । द्वादशाहवदारम्भः । सत्र एवेति केचित् । [illegible] पद्धपसदः । काठकपक्षेऽप्येवम् । केचिद् द्वादशाहवद्दीक्षा-

१ क. ख. ग 'लवर्ली' ।

ग्रीपवसथ्यान्तमहर्योगविशेषः । ज्योतिर्गौरायुर्ज्योतिर्गौरायुरायुर्गौरायुरिति त्र्यहः । चतुर्थे षोडशिग्रहणमतिका पशुकल्पश्च पूर्ववत् । न पृष्ठ्य । पञ्चहःसंमितं ग्रहाणामेव केचि. दिच्छन्ति ।

अत्र केचिदेवं वर्णयन्ति—यत्र यत्र प्रथमत्र्ये गणत्वेन ज्योतिर्गौरायु पठ्यते तत्र ज्योतिर्गौरादिषु कतुपशूनेवेच्छन्ति । महाव्रत प्राजापत्य शिष्टपत्रह मैत्रकाशशिनाना विधिरिति । तन्न । कापेया एवाहीनानामुपदेशेन विहितत्वात् ॥ २९ ॥

अथ दशरात्रोऽभिधीयते—

चत्वारो दशरात्राः ॥ ३० ॥

भवन्तीति शेषः । चत्वारो दशरात्रास्त्रिककुत् प्रथमो भवति । त्रिककुदा दशरात्रेण यक्ष्ये, समानानामुत्तमो भूयासमिति । ब्रह्मवर्चसेन समानेन धर्मेण वा कश्चित्समनुरागः । सर्वं द्वादशाहवत् ॥ ३० ॥

दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहोति ॥ ३१ ॥

ससहोतृकाले दशहोतारम् । जुहोतिचोदितत्वात्स्वाहाकारप्रदानो भवति ॥ ३१ ॥

भुवन इन्द्रस्य त्रिककुद्दशरात्रो यः कामयेत
त्रिककुदेव समानानाꣳ स्यामिति । स एतेन
यजेत ॥ ३२ ॥

विधास्यमानेषु दशस्वहःसु त्रयाणामह्नां त्रिककुत्संज्ञकत्वेन संपाद्य प्रशंसति—'त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविꣳशः ककुत्त्रय-स्त्रिꣳशो य एवं विद्वान्दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकविꣳशो यजमानस्त्रयस्त्रिꣳशः पुर इतरा' (तै० सं० ७।२।९) इति । त्रीणि ककुत्सदृशान्युन्नतस्तोमयुक्तान्यहानि यस्य दशरात्रस्य सोऽयं त्रिककुत् । किं तदुन्नतमहस्त्रयमिति । तदुच्यते—यः पञ्चदश उक्थ्यो द्वितीयमहस्तदेकं ककुत्स्थानीयम् । प्रथमतृतीययोस्त्रिवृदग्निष्टोमयोरह्नोर्नीचत्वेन .... । यथा वृषभस्य ककुदः पुरोवर्ती गलभागः पश्चाद्वर्ती पृष्ठभागश्चेत्युभौ निम्नौ तद्वत् । तथैकविंश उक्थ्यः पञ्चममहः । तदेकं ककुत्स्थानीयम् । चतुर्थषष्ठयोः सप्तदशोक्थ्यरूपयोरह्नोर्निम्नस्थानीयत्वात् । तथा त्रयस्त्रिंश उक्थ्योऽष्टममहः । तदप्येकं ककुत्स्थानीयम् । त्रिणवाग्निष्टोमरूपयोः सप्तमनवम-योरह्नोर्निम्नस्थानीयत्वात् । एवं महिमानमभिज्ञायानुष्ठाने यजमानः समानानां मध्ये त्रिगु-णेनोन्नत्येन प्रजापशुधनादिकृतेन युक्तो भवति । ये एते पञ्चदशैकविंशत्रयस्त्रिंशास्तत्स्था-नीयो यजमान इतरा अहस्थानीया प्रजा यजमानस्य पुरस्थानीया भवन्ति । यथा पुरः सर्वस्या राजा स्वामी, एवमस्यामा प्रजाना यजमानः स्वामी भवतीत्यर्थः ॥ ३२ ॥

त्रिवृदग्निष्टुदग्निष्टोमः । पञ्चदश उक्थ्यस्त्रिवृदग्निष्टोमः सप्तदशोऽग्निष्टोम एकविंश उक्थ्यः । सप्तदशोऽग्निष्टोमस्त्रिणवोऽग्निष्टोमस्त्रयस्त्रिंश उक्थ्यस्त्रिणवोऽग्निष्टोमः । विश्वजित्सर्वपृष्ठोऽतिरात्रः ॥ ३३ ॥

औपवसथ्यान्तं कृत्वा वसतीवरीं परिहृत्य रात्रमा विरामनं कृत्वा महारात्रे बुद्ध्वा त्रिवृदग्निष्टोमः षाडि(ष्ठि)कस्य प्रथमः । ऐन्द्रवायवाग्रः । पशुकाले अग्निष्ठ आग्नेयं पत्नीसंयाजान्तम् ।

श्वोभूते पञ्चदश उक्थ्यः । षाष्ठिकस्य द्वितीयः । शुक्राग्रः । अग्निष्ठस्योत्तरत ऐन्द्रः । पत्नीसंयाजान्तम् । श्वोभूते त्रिवृदग्निष्टोमः । षाष्ठिकस्य तृतीयः । आग्रयणाग्रः । अग्निष्ठस्य दक्षिणत ऐन्द्रः । पत्नीसंयाजान्तम् ।

श्वोभूते सप्तदशोऽग्निष्टोमः षाडि(ष्ठि)कस्य चतुर्थः । अत्र षोडशी । पशुकाले उत्तरतस्तृतीये सारस्वतम् । पत्नीसंयाजान्तम् ।

श्वोभूते एकविंश उक्थ्यः । षाडि(ष्ठि)कस्य पञ्चमः शुक्राग्रः । दक्षिणस्तृतीये सावित्रम् । पत्नीसंयाजान्तम् ।

श्वोभूते सप्तदशोऽग्निष्टोमः । षाष्ठिकस्य षष्ठ आग्रयणाग्रः । उत्तरतश्चतुर्थे सौम्यम् । पत्नीसंयाजान्त मवभृथादि ।

श्वोभूते त्रिणवोऽग्निष्टोमः । छन्दोमाना प्रथमविकार ऐन्द्रवायवाग्रः । दक्षिणतश्चतुर्थे वैश्वदेवम् । पत्नीसंयाजान्तम् ।

श्वोभूते त्रयस्त्रिंश उक्थ्यः । छन्दोमाना द्वितीयः शुक्राग्रः । अत्र षोडश्युक्थ्यवदेव क्रतुकरणमुत्तरतः पञ्चमे पौष्णम् । पत्नीसंयाजान्तम् ।

श्वोभूते त्रिणवोऽग्निष्टोमश्छन्दोमाना तृतीय आग्रयणाग्रः । दक्षिणतः पञ्चमे मारुतम् । पत्नीसंयाजान्तमर्हानसंततयः । विश्वजित्सर्वपृष्ठोऽतिरात्रो व्याख्यातः । अविवाक्यधर्माः प्रवर्तन्ते । उत्तरेण (उत्तरतो) षष्ठे बार्हस्पत्यम् । दक्षिणतः षष्ठे वारुणम् । यज्ञपुच्छादि सर्वं द्वादशाहवत् । पयस्यान्तमुक्तो दशरात्रः । प्रजार्थं पापक्षयार्थं च तैत्तिरीयश्रुत्यभिप्रायेण ॥ ३३ ॥

पुर इतरा अभिचर्यमाणो यजेत । त्रिवृदग्निष्टोमो ज्योतिरग्निष्टोमस्त्रिवृदग्निष्टोमो ज्योतिरुक्थ्यो गौरुक्थ्य आयुरुक्थ्योऽभिजिदग्निष्टोमो विश्वजिदग्निष्टोमः सर्वजिदग्निष्टोमः सर्वस्तोमोऽतिरात्रः ॥ ३४ ॥

गतः । पुर इतरा अभिचर्यमाण इति । देवपुराऽतिरात्रेण यक्ष्ये, अभिचारपरिहारार्थम् । पूर्ववत् । अहर्योगविशेष—त्रिवृदग्निष्टोम पाक्षि(ष्ठि)कस्य प्रथमज्योतिरुक्थ्यः । त्रिकद्रुकाणां प्रथमो ज्योतिरुक्थ्य । पुनश्च त्रिवृदग्निष्टोमोऽग्निष्टोम । पाक्षि(ष्ठि)कस्य तृतीयः । तथैवातिग्राह्याः । अथाभिजिदग्निष्टोम । अभिजिदेकाह. । अत्र षोडशी । अग्निष्टोमवत् क्रतुकरणम् । अथ गौरुक्थ्य । त्रिकद्रुकाणां द्वितीय । अथाभिजिदग्निष्टोमः । अथ विश्वजिदग्निष्टोमः । आयुरुक्थ्यः । अत्र न षोडशी । विश्वजिदग्निष्टोमः सर्वस्तोमोऽतिरात्र एकाहः पृश्निप्राणग्रहाद्यविवाक्यधर्मान्केचिदिच्छन्ति ।

अथवाऽनुष्टुभश्चरन्तीति निरोअह्रान्तम् । पत्नीसयाजोत्तरकाले मानम इति केचित् । केचिदत्र मानमं नेच्छन्ति । सुब्रह्मण्यान्ते ब्रह्मप्रतिष्ठित्यादिना प्रायश्चित्तम् । अवभृथादि समानं कर्म पयस्यायाः । अनीका पशुक्लृप्तिश्च पूर्ववत् ।

भ्रातृव्यवतश्चैष दशरात्र उक्त. । अह·क्लृप्तिश्छन्दोग आम्नाता । तैत्तिरीयाणामह.क्लृप्तिस्त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति (तै० सं० ७–२–९) इत्यादि । आग्नेयीषु साम स्तुवते । पञ्चदश उक्थ्य. । ऐन्द्रीषु स्तुवते । इन्द्रस्तुतो विकारः । त्रिवृदग्निष्टोमो वैश्वदेवीषु वैश्वदेवस्तुतो विकार । षडहस्याहर्विकाराणामविरोधेन । सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसेः सर्व्वाः...(?) । प्राजापत्यास्वृजु स्तवनम् । अत्र षोडशी । एकविंश उक्थ्यः सौरीषु सूर्यस्तुतो विकारः । सप्तदशोऽग्निष्टोम प्राजापत्यासूपहव्य । उपहव्यस्य विकारः । उपहव्यो नाम कश्चिदेकाहविशेष. । त्रिणवावग्निष्टोमावभित ऐन्द्रीषु । इन्द्रस्तुतो विकार. । तयोर्मध्ये विकारे वैश्वदेवस्त्रयस्त्रिंश उक्थ्यो वैश्वदेवस्तुत् । अत्र षोडशी । तेषां क्रमः—त्रिणवमग्निष्टोमं कृत्वा इन्द्रस्तुत कृत्वा वैश्वदेवमुक्थ्यं षोडशिमन्तं कृत्वा पुनश्च त्रिणवमग्निष्टोममिन्द्रस्तुत विश्वजित्सर्वपृष्ठोऽतिरात्रो दशममहर्विकार । नारम्भोऽहरहरुपशयश्च । अत्राय [illegible] । उत्तमवर्जं सर्वाणि पत्नीसंयाजान्तानि ।

एवमहःक्लृप्ति । अस्यामङ्गः (ग्य·) पञ्चाह·, चत्वारश्छन्दो(मा) महाव्रतं विश्वजित्सर्वपृष्ठोऽतिरात्रश्छन्दोमाना प्रथम मध्यशनादिनिगमात् । चतुर्थो नामधेयाद्विवाक्यधर्मा महाव्रतं न सांनाय्यमुभयत्रातिरात्रः प्रथममुभयक्लृप्तौ चतुर्थोऽस्मग्रो षोडशिरात्रप्रभृत्युपारिष्टादतिरात्रेषु एकादशरात्रपर्यन्तेषु अत्यदि(ति)रात्रेषु षोडशी नियत इति केश्चिद्विकल्पेन व्याख्यातं तन्न युक्त सूत्रविरोधाच्च । अतिरात्रः । निरोअह्रान्तं कृत्वा यज्ञपुच्छादि सर्वं द्वादशाहवत् ॥ २४ ॥

कौसुरुविन्दो दशरात्रः । यः कामयेत सर्वमिदं
भवेयमिति । स एतेन यजेत । तस्य त्रयस्त्रिवृ-

तोऽग्निष्टोमास्त्रयः पञ्चदशा उक्थ्याः । त्रयः सप्त-
दशा उक्थ्या अतिरात्रः ॥ ३५ ॥

रात ॥ ३५ ॥

अथैकादशरात्रोऽभिधीयते—

पौण्डरीक एकादशरात्रः । अयुतं दक्षिणा ।
अश्वसहस्रमेकं । दश दक्षिणाः । सर्वामृद्धिमृध्नोति ।
परमेष्ठितां गच्छति । अभ्यासङ्ग(ङ्ग्यः) पञ्चाहः
षडहः स्यादहस्त्रयस्त्रिंशं द्वे सवने षट्त्रिंशत-
मन्त्यश्चतुष्टोमोऽग्निष्टोमस्त्रयश्छन्दोमा विश्वजित्स-
र्वपृष्ठोऽतिरात्रः । अन्वहं दश सहस्राणि दद्यात् ।
अश्वसहस्रमुत्तमेऽहन्यश्वसहस्रमुत्तमेऽहनि ॥ (ख० २२)॥३६॥

इति सत्याषाढहिरण्यकेशि सूत्रे सप्तदशप्रश्नेऽष्टमः पटलः ।
इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशप्रश्नः ।

पौण्डरीक इति । अस्य चैकादशरात्रस्य सत्रलक्षणभूतयाऽपि चोदनया विधानात्सत्रत्वं द्रष्टव्यम् । तथाच सा यानी षड्रात्र इव धर्मातिदेशार्थेयमासि(मस्ति) चोदना । तद्वद्वातिदेश्याना धर्मविशेषाणामाश्रयणात् । ऋतवो वै प्रजाकामाः (तै० सं० ७–२–६) इति [illegible] सत्रम् । इतोऽन्ये शाखान्तरविहिता एकादशरात्रा अहीनाः ।

'एतस्मिन्नृतूनामेकादशरात्रे प्रथममहर्विभक्ते–ज्योतिरतिरात्रो भवति ' (७–२–६) इति । पूर्वं ज्योतिर्गौरायुरिति ज्योति शब्दाभिधेयो य एकाह उक्तस्तमेकाहमत्रातिरात्रसंस्थारूपं कुर्यात् । अथ द्वितीयादिसप्तमान्तान्यहानि विभक्ते—' पृष्ठ्यः षडहो भवति' (७–२–६) इति । द्वादशाहे द्वितीयदिनमारभ्य सप्तमान्तेषु दिनेषु रथंतरादिभिः षड्भिः पृष्ठैर्युक्तानि षडहानि विहितानि । तानि चास्माभिः साध्यानां षड्रात्रप्रसङ्गेनोदाहृतानि । तथा सैव पृष्ठ्यः षडहः । सोऽत्र कर्तव्यः । चतुर्विंशस्तोमयुक्तो रथंतरसामा य उक्थ्यः सोऽयमत्राष्टममहः । चतुश्चत्वारिंशस्तोमयुक्तो बृहद्रथंतरसामा य उक्थ्यः सोऽयमत्र नवममहः । अष्टाचत्वारिंशस्तोमयुक्तो बृहत्सामा य उक्थ्यः सोऽयमत्र दशममहः । एकोनत्रिंशस्तोमयुक्तो योऽयमतिरात्र एकाहविशेषः, सोऽयमत्रैकादशमहः ।

तथच पौण्डरीके नियतम् । द्वादशाहीनस्य दशरात्रस्य प्रथमाहर्येस्त्रिवृद्धर्मः पौण्डरीके, द्वयोरह्नोरादितः प्रवृत्तिरतिग्राह्यादिषु प्रयोजनम् । तदा विश्वजिदतिरात्रे मानसादि

सूत्रकारेण द्वादशरात्रे, [illegible] इत्यनीकप्रकारेण उक्तः । द्वादशाहधर्मः स्वर्गफलश्च । तत्र श्लोकौ—

चत्वारिंशदहीनाश्च सूत्रकारेण चोदिताः ।
षट्तैत्तिरीयकेऽधीताः शिष्टाश्छन्दोगदर्शिताः ॥
त्र्यनीक(काया)विधिश्चात्र वाचकः परिकल्प्यते ।
ईरितः सूत्रकारेण पौण्डरीकविधिस्ततः ॥

व्याख्यातमन्यत् । अश्वसहस्रमुत्तमेऽहनीति द्विरुक्तिः प्रश्नसमाप्त्यर्था ॥ ३६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्नेऽष्टमः पटलः ।

प्रयोगवैजयन्त्यास्तु मालायाः सूत्रसंस्थिते ।
एकाहस्येह कृतो निर्णयः कौस्तुभो मणिः ॥
सत्ययोगी यज्ञवपुषस्तुष्टयेऽस्तु मयाऽर्पितः ।
गृह्णाति हि स्वमप्येष भक्तैर्यद्यत्ततः कृतम् ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्नः समाप्तः ।

अथाष्टादशप्रश्ने प्रथमः पटलः

उक्ता अहीनाः इदानीं सत्राण्यभिधीयन्ते—

द्वादशाहप्रजादीनि सत्राणि ॥ १ ॥

द्वादशरात्रादीनि सत्राणि (का० श्रौ० २४-१) इति कात्यायनः । रात्रिसत्राणीति नाम । तच्च द्वादशरात्रप्रभृतीनाम् । पूर्वपदप्रधानोऽयं बहुव्रीहिः । ननु ऋद्धिकामाः सत्रमासीरन् (जै० सू० ६-६-२) इत्यत्र विप्रा इति विशेषो न श्रूयते । तस्माद्वर्णत्रयस्य सत्राधिकार इति चेन्नैवम् । विप्राणामार्त्विज्यमिति परिभाषायां व्याख्यातम् । ऋत्विक्कार्ये यजमानाः सत्रे समाम्नाताः ' ये यजमानास्त ऋत्विजः ' इति । तस्माद्विप्राणामेव सत्रम् ॥ १ ॥

यानि पुरस्तात्संवत्सराद्गवामयनप्रकृतीन्युत्तराण्युभयतोतिरात्राणि सत्राणि ॥ २ ॥

यानि मन्त्राणि। गवामयनस्य विधिर्विवक्षितस्तं विवक्षुः सर्वमन्त्राणां सामान्यं विधानमारभते—'मन्त्रेषु सर्वानिन्द्रयुर्वीक्षयेत्' (द्रा० श्रौ० ३-३-९) इति। तेषां द्वादशाहेन मन्त्रभूतेन कल्पो व्याख्यातः। यानि पुरस्तात्संवत्सरात्। गवामयनेनेतरेषाम्। उभयतोऽतिरात्राणि भवन्ति ॥ २ ॥

उपरिष्टादतिरात्रस्तृतीयः पञ्चदश उक्थ्यः ॥ ३ ॥

भवतीति शेषः ॥ ३ ॥

तथा कुण्डपायिनामयनम् ॥ ४ ॥

तृतीयं पञ्चदशरात्रं परिहाप्य कुण्डपायिना च मन्त्रमिति सूत्रान्तरम् ॥ ४ ॥

तेषां द्वादशाहेन कल्पो व्याख्यातः ॥ ५ ॥

गतः ॥ ५ ॥

ऋतूनामेकादशरात्रेण प्रजाः सृजन्ते प्रजामवरुन्धते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ॥ ६ ॥

गतार्थः। अस्य चैकादशरात्रस्य ... अपि चोदनया विधानात्सत्रत्वं द्रष्टव्यम्। नह्यत्र सांख्याना षड्रात्र इव धर्मातिदेशार्थं समासि (अस्ति) चोदना। तद्वदत्रातिदेश्याना धर्मविशेषाणामश्रवणात्। ... सत्रम्। इतोऽन्ये शाखान्तरविहिता एकादशरात्रा अहीनाः। स एष तित्तिरिणा समाम्नातः—'ऋतवो वै प्रजाकामा' (तै० सं० ७-२-६) इत्यादि ॥ ६ ॥

एतस्मिन्नृतूनामेकादशरात्रे प्रथममहर्विधत्ते—

ज्योतिरतिरात्रः ॥ ७ ॥

भवतीति शेषः। पूर्वं ज्योतिर्गौरायुरिति ज्योतिःशब्दाभिधेयो य एकाह उक्तस्तमेकाहमत्रातिरात्रसंस्थारूपं कुर्यादिति भावः ॥ ७ ॥

अथ द्वितीयादिसप्तमान्तान्यहानि विधत्ते—

पृष्ठ्यः षडहः ॥ ८ ॥

भवतीत्यत्रापि शेषः। द्वादशाहे द्वितीयदिनमारभ्य सप्तमान्तेषु दिनेषु रथंतरादिभिः षड्भिः पृष्ठैर्युक्तानि षडहानि विहितानि। तानि चास्माभिः सांख्याना षड्रात्रप्रसङ्गेनोदाहृतानि। तथा सत्ः पृष्ठ्यः षडहः सोऽत्र कर्तव्यः ॥ ८ ॥

त्रयश्छन्दोमाः ॥ ९ ॥

भवन्ति। अष्टमदिनमारभ्य दशमान्तेषु दिनेषु ॥ ९ ॥

अतिरात्रः ॥ १० ॥

एकोनत्रिंशस्तोमयुक्तो योऽयमतिरात्र एकाहविशेषः सोऽयमत्रैकादशमहः । सर्वस्तोमोऽतिरात्र उत्तममहरिति वचनाद्द्वादशाहे भवतीति भावः ॥ १० ॥

अथ त्रयोदशरात्रोऽभिधीयते--

द्वौ त्रयोदशरात्रौ ॥ ११ ॥

योऽयं त्रयोदशरात्रो विधास्यमान एष एव संपूर्णो द्वादशाहः । पूर्वस्माद्द्वादशाहादेकदिनाधिक्येन फलाधिक्यादिनाधिक्ये सति केन साम्येन द्वादशाहत्वमिति चेत्—तदुच्यते । प्रायणीय उदयनीयश्चेत्युभयं द्वादशाहे यादृशं तादृशमेवात्रापीति द्विविधस्याहः समानत्वाद्द्वादशाहत्वोपचारः ॥ ११ ॥

यं कामं कामयन्ते तमभ्यश्नुवते ॥ १२ ॥

यं मुख्ययजमानमुद्दिश्य कामयन्त इतर इत्यर्थः ॥ १२ ॥

अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोऽतिरात्रश्छन्दोमा अतिरात्रः ॥ १३ ॥

षडहस्य च्छन्दोमाना मध्ये यदि कश्चिदन्यः सर्वस्तोमोऽतिरात्रोऽनुष्ठीयेत तदानीं द्वादशाहगता स्वल्पसां संतता वाचमनुष्ठानारी विच्छिन्द्युः । तथा सति यजमानस्य वागुपक्षयशीला स्यात् । अतस्तत्परिहाराय च्छन्दोमानामुपरि . . . . । तदेवाह: सर्वस्तोमोऽतिरात्रस्त्य कुर्यात् । तस्मिश्च महाव्रतधर्मातिदेशाभिप्रायेण महाव्रतशब्दप्रयोगः । संततामेव वाचमवरुन्धते (तै० सं० ७–३–३) इत्यादिशेषाच्च ॥ १३ ॥

द्वितीयं ब्रह्मवर्चसकामा उपेयुः ॥ १४ ॥

द्वितीयं पृष्ठ्यषडहम् ॥ १४ ॥

अतिरात्रो द्वादशाहस्य दशाहानि महाव्रतमतिरात्रः ॥ १५ ॥

भवतीति शेषः ॥ १५ ॥

अथ चतुर्दशरात्रोऽभिधीयते—

त्रयश्चतुर्दशरात्राः । यं कामं कामयन्ते तमभ्यश्नुवते । अतिरात्रः पृष्ठ्यः षडह आवृत्तः पृष्ठ्यः षडहोऽतिरात्रः । सर्वामृद्धिमृध्नुवन्ति य एता उपयन्त्यतिरात्रः । पृष्ठ्यः षडहः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणोऽतिरात्रो द्वितीयं ब्रह्मवर्चसकामा उपेयुः । अतिरात्रो ज्योतिर्गौरायुरित्यहः पृष्ठ्यः षडह आयुर्गौर्ज्योतिरतिरात्रस्तृतीयं प्रति-

ष्ठाकामा उपेयुः। अतिरात्रो गौश्चाऽऽयुश्च द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्रः ॥ (ख० १) ॥ १६ ॥

भवन्तीति शेषः। प्रायणीयोदयनीययोर्मध्यवर्तीनि द्वादशसंख्याकान्यहानि विभज्ते—'यत्पराचीनानि पृष्ठानि भवन्ति यत्प्रतीचीनानि पृष्ठानि भवन्ति' (७–३–४) इति। रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामसाध्ये. पृष्ठस्तोत्रैरुक्तान्यहानि पृष्ठानीत्युच्यन्ते। तेषामुक्तोऽनुक्रमः पराचीनत्वम्। विपरीतक्रमः प्रतीचीनत्वम्। तेन द्वैविध्येन आरोहावरोहौ। एतमेवाऽऽरोहावरोहप्रकारं पुनः प्रशंसति—त्रयस्त्रिंशौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्ति (७–३–४) इति। त्रिवृत्पञ्चदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंश इत्येष स्तोमानां षट्स्विहाऽऽरोहक्रमः। त्रयस्त्रिंशस्त्रिणव एकविंशः सप्तदशः पञ्चदशस्त्रिवृदित्ययमवरोहक्रमः। एवं च सत्येषु द्वादशस्वहःसु मध्ये षष्ठसप्तमयोरह्नोर्निरन्तर्येण त्रयस्त्रिंशस्तोमौ संपद्येते। तेन च यजमानाः साम्राज्यं गच्छन्ति। किंचैतावन्येषां स्तोमानामधिराजौ। अर्वाचीनानां तत्रान्तर्भावात्। अतो यजमानाः सर्वेषामन्येषामधिराजा भवन्ति।

आदावेकोऽतिरात्रः। ततो ज्योतिर्गौरायुरित्यारोहरूपस्त्रिरात्रः। ततः पृष्ठ्यः षडहः। तत आयुर्गौर्ज्योतिरित्यवरोहरूपस्त्रिरात्रः। ततोऽतिरात्र इति ॥ १६ ॥

अथ पञ्चदशरात्रोऽभिधीयते—

चत्वारः पञ्चदशरात्राः ॥ १७ ॥

उच्यन्त इति शेषः ॥ १७ ॥

देवत्वं गच्छन्ति ॥ १८ ॥

सत्रिण इति शेषः ॥ १८ ॥

अमावास्यायां प्रायणीयोऽष्टम्यां महाव्रतम्। पौर्णमास्यामुदयनीय इतरथा युक्तं वोपेयुः॥ अतिरात्रः पृष्ठ्यः षडहो महाव्रतं पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणोऽतिरात्रः ॥ १९ ॥ द्वितीयं याऽस्तल्प उदके विवाहे वा मीमांसेरन्। अतिरात्रो ज्योतिर्गौरायुरित्यहः पृष्ठ्यः षडहो महाव्रतमायुर्गौर्ज्योतिरतिरात्रः। तृतीयं प्रतिष्ठाकामा उपेयुः। त्रिवृदग्निष्टोमो ज्योतिर्गौरायुरित्यहो द्वादशाहस्य दशाहान्यतिरात्रः। चतुर्थं स्वर्ग-

कामा उपेयुः । अतिरात्रो ज्योतिर्गौरायुरित्यहो द्वादशाहस्य दशाहान्यतिरात्रः । एतेन षोडशरात्रेण सर्वाभिजितीर्विजयन्तोऽभिपूर्वमन्नाद्यमायन्ति । एता एव समहाव्रताः ॥ २० ॥

पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येतानि दशाहान्तर्गतानि । अथाहर्विशेषा विधातव्याः । तत्राग्निष्टुदाख्यमेकमहः स्तुत्यर्थोपात्तमिति द्रष्टव्यम् । अग्निष्टुता पाप्मानं निरदहन्निति स्तुतिः पूर्वमुदाहृता । अत ऊर्ध्वं त्र्यहं विधत्ते—ज्योतिर्गौरायुरिति त्र्यहो भवति (७-३-७) इत्यादि । पृष्ठ्यषडहगतान्यहानि विधत्ते—यदन्यत पृष्ठानि स्युर्विविवधं स्यान्मध्ये पृष्ठानि भवन्ति (७-३-७) इत्यादि । आरोहरूपकमहः पूर्वं विहितं । ऊर्ध्वमवरोहरूपं त्र्यहं विधत्ते—पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति (७-३-७) इत्यादि ॥ १९ ॥ २० ॥

सप्तदश रात्रोऽभिधीयते—

सप्तदशरात्रमन्नाद्यकामा उपेयुः । अतिरात्रो ज्योतिर्गौर्ज्योतिर्गौरायुः पञ्चाहः । द्वादशाहस्य दशाहान्यतिरात्रः ॥ २१ ॥

सप्तदशरात्रेण यक्ष्ये, अन्नादो भूयासमिति । एतत्र्यहस्य मध्ये ज्योतिर्गौरायुरित्येत विषमहा पञ्चकं पञ्चाहो भवति (७-३-८) इति विधत्ते । विराट्त्वेन अहः द्वितीयज्योतिर्वर्जितोऽवशिष्टः पञ्चाहः । अथ पृष्ठ्य षडह चतुश्छन्दोमाश्च पूर्ववद्द्रष्टव्यम् ॥ २१ ॥

अष्टादशरात्रं ब्रह्मवर्चसकामा उपेयुः । अतिरात्रोऽभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ २२ ॥

अष्टादशरात्रेण यक्ष्यामहे ब्रह्मवर्चस्विनो भूयास्मेति । शेषं पूर्ववत् ॥ २२ ॥

एकान्नविंशतिरात्रेण । सर्वेषां पशूनामाधिपत्यं गच्छन्ति । एता एव समहाव्रताः ॥ २३ ॥

एकान्नविंशतिरात्रेण स प्रजया पशुभिर्जायन्ते (७-३-९) इत्यापस्तम्बः ॥ २३ ॥

विंशतिरात्रेण ब्रह्मवर्चसिनोऽन्नादा भवन्ति । य एता उपयन्ति । अतिरात्रौ गौश्चाऽऽयुश्च द्वे अहनी । अभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ (ख० ७) ॥ २४ ॥

विंशतिरात्रेण यक्ष्यामहे ब्रह्मवर्चस्विनो भूयास्मान्नादा भूयास्मेति च । यथा प्रथमस्याह्नो ज्योतिरादित्वं एवं द्वितीयतृतीययोरपि ज्योतिरादिकौ । तत्त्वत्र कश्चिद्व्यायुरादिकोऽस्ति । पूर्वोक्तेषु त्र्यहेषु योऽयमन्त्यरूपाहो यश्च भावी त्र्यहस्तयोरुभयोर्मध्यवर्तित्वेन विवक्षमाणम् । अन्यच्च पूर्ववद्व्याख्येयम् ।

ननु—प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति (जै० सू० ४–३–८) इति श्रुतम् । रात्रिशब्देन ज्योतिर्गौरायुरित्यादिवाक्योत्पादितानि सोमा (ष्ठा) नि कर्माण्युच्यन्ते । तदिदं रात्रिसत्रं स्वर्गार्थमुत प्रतिष्ठार्थमिति संशयः । तदर्थं च प्रतितिष्ठन्तीति विषय फलविधिरुतार्थवाद इति ।

अपापश्रुतिकत्वाच्च वर्तमानापदेशतः ।
फलविध्यसमर्थत्वात्तद्वेवार्थवादता ॥
अनादिष्टफलत्वेन तस्मात्स्वर्गफलार्थता ।
निर्देशात्तु प्रतिष्ठैव फलत्वेन विनम्यते ॥
जुहूवत्तैव कर्मैतन्निराकाङ्क्ष फल प्रति ।
कल्पनीय फल तत्र विनाशोऽर्थाहृतेर्वरम् ॥

स्वर्गस्य यद्यपि तत्स्वरूपं तस्य च श्रुतकर्मसंबन्धः फलत्वं च कल्प्यम् । प्रतिष्ठायास्तु स्वरूपसंबन्धावगतौ च केवलं फलत्वमिच्छार्थसन्नन्ततया विपरिणाममात्रं लघीयः । उपयन्तीत्यपि वर्तमानापदेशो विधिरूपेण विपरिणम्यते । यच्छब्दश्च व्यवहितान्वयः । तदयमर्थः—ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरिति । एवं हि धर्ममात्रकल्पनालाघवमितरथा तु सर्वस्यैवार्थवादत्वात्स्वर्ग एव विध्युद्देशोऽप्रतिपन्नफलविशिष्टः कल्पनीयः । स्वर्गकामा एता रात्रीरुपेयुरिति कल्पितेऽप्यस्मिन् प्रतिष्ठार्थवादो न सुष्ठु संगच्छते । यस्मात्प्रतितिष्ठन्ति तस्मात्स्वर्गकामा उपेयुरिति किं केन संगच्छते । ततश्च यद्यप्यध्याहारः स्यात्तथाऽप्यर्थवादसंगत्यर्थं प्रतिष्ठैवाध्याहर्तव्येति प्रतिष्ठार्थता ॥ २४ ॥

अथैकविंशतिरात्रोऽभिधीयते—

द्वावेकविंशतिरात्रौ । यं कामं कामयन्ते तमभ्यश्नुवते । सर्वामृद्धिमृध्नुवन्ति । वर्षीयांसो

भवन्ति । य एता उपयन्त्यतिरात्रः पृष्ठ्यः षडहस्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानः पृष्ठ्यः षडहस्त्रयस्त्रिꣳशाऽरम्णोऽतिरात्रो निदाघ उपयन्ति सोमापौष्णं पशुमालभन्ते । मनोऽर्चः सामिधेन्यो भवन्ति ॥ २५ ॥ द्विर्नीयेनोभयोर्लोकयोर्ऋध्नुवन्ति । अग्निश्चाग्निश्च । य एता उपयन्त्यतिरात्रोऽभिप्लवः षडहोऽभिप्लवः षडहोऽतिरात्रः ॥ २६ ॥

तत्र तावदियमहःक्लृप्तिः—आदावतिरात्रः । ततः पृष्ठ्यः षडहः । ततः स्वरसामानस्त्रयोऽहर्विशेषाः । ततो दिवाकीर्त्यमेकमहः । पुनरपि त्रयः स्वरसामानः । पुनरपि पृष्ठ्यः षडहः । ततोऽतिरात्र इति । गतमन्यत् ॥ २५ ॥ २६ ॥

द्वात्रिꣳशतिरात्रं ब्रह्मवर्चसकामा उपेयुः । अतिरात्रो ज्योतिर्गौरायुरित्र्यहोऽभिप्लवः । षडहो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रः ॥ २७ ॥

पूर्ववद् व्याख्येयम् ॥ २७ ॥

त्रयोविꣳशतिरात्रं प्रतिष्ठाकामा उपेयुरिति । अतिरात्रो ज्योतिर्गौरायुः पञ्चाहोऽभिप्लवः । षडहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ २८ ॥

त्रयोविंशतिरात्रेण यक्ष्यामहे प्रतिष्ठार्थमिति । शेषं पूर्ववत् ॥ २८ ॥

द्वौ चतुर्विꣳशतिरात्रौ । यं कामं कामयन्ते तमभ्यश्नुवते । सर्वामृद्धिमृध्नुवन्ति । सर्वायाꣳ सो भवन्ति । य एता उपयन्त्यतिरात्रौ द्वावभिप्लवौ । द्वादशाहस्य दशाहान्यतिरात्रः (ख० ३) ॥ २९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रेऽष्टादशप्रश्ने प्रथमः पटलः ।

अत्र चत्वारस्त्र्यहा विज्ञेयाः । तावता विवक्षितसङ्ख्याया पूरणात् ॥ २९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामष्टादशप्रश्ने प्रथमः पटलः ।

अष्टादशप्रश्ने द्वितीयः पटलः ।

अथान्यश्चतुर्विंशतिरात्रोऽभिधीयते ।—

सत्त्रसदा चतुर्विंशतिरात्रेण स्वर्गं लोकं सीदन्ति । य एता उपयन्त्यतिरात्रश्चतुर्विंश उक्थ्य आरम्भणीयस्त्रिवृदाः पृष्ठ्यः स्तोमः षडहः । अथ त्रयस्त्रिंशमहर्निरुक्तमुक्तमुपहव्यस्य तन्त्रे क्लृप्तं तस्य कण्वरथंतरं माध्यंदिने सवने यत्त्रयस्त्रिंशमहर्निरुक्तं त्रिणवं द्वे एकविंशे त्रिणवं त्रयस्त्रिंशमहर्निरुक्तं पृष्ठ्यः स्तोमः षडहः प्रत्यङ् त्रिवृदहर्निरुक्तं ज्योतिर्वैश्वानरोऽतिरात्रः ॥ १ ॥

अत्रायमहःक्लृप्तिः सूत्रकारेण दर्शिता । चतुर्विंशतिरात्रस्य प्रथममहः सूत्रेऽभिहितं तज्ज्योतिरतिरात्रो भवतीति वाक्येनाऽऽम्नातम् । यत्त्वारम्भणीयरूपं द्वितीयमहस्तच्चा- स्थानान्तरगतम् । तृतीयमहरारभ्याष्टमान्तं षडात्मकः पृष्ठ्यः षडहः । तत्र षष्ठमहस्त्रयस्त्रिंशरूपम् । यच्चाऽऽदित आरभ्य गणनायामष्टममहः । ततो नवममहर्निरुक्तं त्रयस्त्रिंशम् । स्पष्टलिङ्गैर्मन्त्रैर्गानं निरुक्तं तद्विपरीतमनिरुक्तम् । ततो दशममहर्निरुक्तं त्रयस्त्रिंशम् । त एते षष्ठनवमदशमा अहर्विशेषास्त्रयोऽप्यस्मादर्वाग्भागे वर्तमानास्त्रयस्त्रिंशाः । तत एकादशद्वादशत्रयोदशचतुर्दशाख्यान्यहानि त्रिणवैकविंशद्वयत्रिणवरूपाणि मध्यवर्तीनि पृष्ठानीत्युच्यन्ते । ततः पञ्चदशषोडशसप्तदशा अहर्विशेषास्त्रिसंख्याकाः परस्तादूर्ध्वभागे वर्तमानास्त्रयस्त्रिंशाः । तेषु त्रिषु मध्यमं निरुक्तं त्रयस्त्रिंशम् । तस्मादुपरितनं त्रयस्त्रिंशस्तोमयुक्तमनिरुक्तम् । सप्तदशसंख्यापूरकं दिनमारभ्य द्वाविंशतिदिनपर्यन्तमावृत्तः पृष्ठ्यः षडहः । अत एवाह प्रत्यङ्ङिति (७-४-२) निर्दिश्यते । तत ऊर्ध्वमुपान्तिममहस्त्रिवृदनिरुक्तं [illegible] । तत ऊर्ध्वमतिरात्रोऽन्तिमः । एवं स्थिते सति एकादशादिचतुर्दशान्तानां यानि दिनान्यस्मात्पुरस्ताद् उपरिष्टाच्च ये त्रिसंख्याकास्त्रयस्त्रिंशास्तैरुभयतोऽभिमितैर्वर्तिनः पाप्मानमपहत्य दैवीं सभां मध्यवर्तिनीं गच्छन्ति । यानि मध्यवर्तीनि चत्वारि पृष्ठ्याख्यान्यहान्येतान्येवात्र दैवी संसदित्युच्यते । तस्मादु[illegible] कुर्यादिति विधिरूह्यः ।

अथार्वाचीनेषु त्रिषु त्रयस्त्रिंशेषु यो मध्यमो यश्चोर्ध्ववर्तिषु त्रिषु मध्यमस्तयोरुभयपतितस्य स यमस्याऽनिरुक्तत्वमिति भाष्यकृत् ।

उभयतोऽभिमितानां त्रयस्त्रिंशानां मध्यवर्तिषु चतुर्ष्वहःसु कंचिद्विशेषं विवक्ते —

ऊर्ध्वानि पृष्ठानि भवन्ति (७–४-२) इति । रथंतरबृहदाद्यनुक्रमगतानि पृष्ठस्तोत्राणि निष्पादनीयानि । तथा चतुर्विंशचतुश्चत्वारिंशाद्यनुक्रमगताश्छन्दोमा निष्पादनीयाः । यद्यपि त्रिणवैकविंशद्वयत्रिणवस्तोमस्तान्यहानि निष्पाद्यानीति शास्त्रान्तरानुसारेण सूत्रेऽभिहितम् । तथाऽप्यत्रवचनबलात्पवमानादिषु केषुचित्स्तोत्रेषु चतुर्विंशादयश्छन्दोमा अनुक्रमेण प्रयोक्तव्याः ।

उक्तेषु पृष्ठस्तोत्रेषु पर्यायेण सामद्वयमेव विधत्ते—'बृहद्रथंतराभ्याम्' (तै० सं० ७ ४-२) इत्यादि पूर्ववद्व्याख्येयम् । अथोपान्त्यं त्रयोविंशमहर्विधत्ते—त्रिवृतोऽभितिवृतमुपयन्ति स्तोमानां संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवति (७–४–२) इत्यादि । आवृत्ते पृष्ठ्ये षडहस्यावर्त्तिशादित्रिवृदन्त । तथा सति द्वाविंशे दिने त्रिवृत्स्तोमः प्राप्नोति । तस्य [illegible] त्रयोविंशदिने त्रिवृतमेवानुतिष्ठेयुः । तथा सति त्रिवृत्स्तोमस्य सातत्यादेषां स्तोमानां संपत्तिर्भवति । सा च संपत्तिर्यजमानस्य पुत्रादिप्रभवाय संपद्यते । स च [illegible] ज्योतिष्टोमः कार्यः । सप्तसंस्थारूपोऽ(पेऽ)ग्निष्टोमः (से) प्रथमसंस्थारूपं कुर्यादित्यर्थः ॥१॥

पञ्चविंशतिरात्रमन्नाद्यकामा उपेयुः । अतिरात्रो द्वावभिप्लवौ । द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ १ ॥

पञ्चविंशतिरात्रेण यक्ष्यामह इत्यादि ॥ २ ॥

षड्विंशतिरात्रं स्वर्गकामा उपेयुः । अतिरात्रो गौश्चाऽऽयुश्च द्वे अहनी द्वावभिप्लवौ । द्वादशाहस्य दशाहान्यतिरात्रः ॥ ३ ॥

षड्विंशतिरात्रेण यक्ष्यामहे । स्वर्गं लोकमवाप्नवाम इत्यादि पूर्ववत् ॥ ३ ॥

सप्तविंशतिरात्रेणाऽऽदित्यलोकं जयन्ति एता एव समहाव्रताः ॥ ४ ॥

सप्तविंशतिरात्रेण यक्ष्यामहे आदित्यलोकजयार्थमिति । शेषं पूर्ववत् ॥ ४ ॥

अष्टाविंशतिरात्रं ब्रह्मवर्चसकामा उपेयुः । अतिरात्रो ज्योतिर्गौरायुरित्यहो द्वावभिप्लवौ । द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ ५ ॥

अष्टाविंशतिरात्रेण यक्ष्यामहे ब्रह्मवर्चसमवाप्नवाम इत्यादि ॥ ५ ॥

एकान्नत्रिंशतिरात्रं श्रीकामा उपेयुः । अतिरात्रो

ज्योतिर्गौरायुर्गौरायुः पश्चाहो द्वावभिप्लवौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ ६ ॥

एकोनत्रिंशद्रात्रेण यक्ष्यामहे । श्रीकामार्थमित्यादि पूर्ववत् ॥ ६ ॥

त्रिंशद्रात्रमन्नाद्यकामा उपेयुः । अतिरात्रस्त्रयोऽभिप्लवा द्वादशाहस्य दशाहान्यतिरात्रः ॥ (ख० ४ ॥) ७ ॥

त्रिंशद्रात्रेण यक्ष्यामहे अन्नाद्यकामार्थमित्यादि ॥ ७ ॥

एकत्रिंशद्रात्रेणाभिपूर्वमन्नाद्यमाप्नुवन्त्येता एव समहात्रताः ॥ ८ ॥

एकत्रिंशद्रात्रेण यक्ष्यामहे । अन्नाद्य भूयासमित्यादि ॥ ८ ॥

द्वात्रिंशद्रात्रं ब्रह्मवर्चसकामा उपेयुः । अतिरात्रो गौश्चाऽऽयुश्च द्वे अहनी । त्रयोऽभिप्लवा । द्वादशाहस्य दशाहान्यतिरात्रः ॥ ९ ॥

द्वात्रिंशद्रात्रेण यक्ष्यामहे ब्रह्मवर्चसमवाप्नवाम इत्यादि ॥ ९ ॥

त्रयस्त्रिंशद्रात्रमृद्धिकामा उपेयुः । अतिरात्रस्त्रयः पश्चाहा विश्वजिदतिरात्रस्त्रयः पश्चाहा अतिरात्रः । द्वितीयेन यावद्येन सत्रेणर्द्धिमाप्नुवन्ति । तावता समृद्धिरतिरात्रोऽभिप्लवः पडहोऽतिरात्रोऽभिप्लवः पडहोऽतिरात्रोऽभिप्लवः । पडहो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च । तृतीयं प्रतिष्ठाकामा उपेयुः । अतिरात्रस्त्रयः पश्चाहा विश्वजिदतिरात्र एकः पश्चाहो द्वादशाहस्य दशाहान्यतिरात्रः ॥ १० ॥

त्रयस्त्रिंशद्रात्रेण यक्ष्यामहे. ऋद्धिमवाप्नवाम इति । समृद्धिविकल्पः । ज्योतिर्गौरायुरित्येवंविधो द्विरावृत्तऋग्यहो द्वितीयज्योतिर्विवर्जित पश्चाह । अत्र प्रायणीयोदयनीययोरतिरात्रयोर्मध्यमे चातिरात्रे शस्त्राणि- त्रीण्याश्विनानि भवन्ति' (तै० सं० ७-४-९) इति श्रुते । अन्यदहर्विश्वजिद्भवति, इति विधानात् । अत्र द्वादशाहशब्देन प्रायणीयोदयनीयौ वर्जयित्वाऽवशिष्टस्य दशरात्रस्य विवक्षा दर्शयति । गतमन्यत् ॥ १० ॥

चतुस्त्रिंशद्रात्र ब्रह्मवर्चसकामा उपेयुः । अतिरात्रो ज्योतिर्गौरायुऋग्यहऋग्यहोऽभिप्लवाः । द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ (ख० ५) ॥ ११ ॥

संकल्पादिवाक्यं पूर्ववत् ॥ ११ ॥

पञ्चत्रिंशद्रात्रेण संवत्सरादादित्यादन्ना-
द्यमवरुन्धते । य एता उपयन्ति । अतिरात्रो
ज्योतिर्गौरायुर्गौरायुः पञ्चाहस्त्र्योऽभिप्लवाः । द्वाद-
शाहस्य दशाहान्यतिरात्रः ॥ १२ ॥

गत ॥ १२ ॥

षट्त्रिंशद्रात्रं स्वर्गकामा उपेयुः । अतिरात्रश्च
त्वारोऽभिप्लवाः । द्वादशाहस्य दशाहान्यति
रात्रः ॥ १३ ॥

सुवर्गं लोकं यन्ति (७ ४–६) इत्याम्नानात । प्रायणीयमहर्विवृत्ते—'ज्योति-रतिरात्रो भवति' इत्यादि । अथोत्तराणि मानिनिरहानि विवृत्ते— षडहा भवन्ति' इति । ज्योतिर्गौरायुर्गौरायुरित्येते त्र्यहा अभिप्लवः षडहः । तादृशा षडहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेया । तथा सत्यत्र चत्वारो भवन्ति इति । चतुर्भिः षडहैस्त्रापेक्षिता संख्या पूर्यते । अथ पृष्ठ्यः षडहश्छन्दोमाः इत्येवमिव द्वादशाहस्य दशरात्रम् । अथोदयनीय विवृत्ते—अतिरात्रावभितो भवत इति । प्रायणीयेन सह निर्दिष्टु द्विवचनम् ॥ १३ ॥

सप्तत्रिंशद्रात्रेणाऽऽदित्य लोकं जयन्त्येता
एव समहाव्रताः ॥ १४ ॥

षट्त्रिंशद्रात्रेण व्याख्यातम् । आदित्यलोकजयार्थमित्य विमहाव्रतान्ता ॥ १४ ॥

अष्टात्रिंशद्रात्रेण ब्रह्मवर्चसकामा उपेयुः । अति-
रात्रो गौश्चाऽऽयुश्च द्वे अहनी । चत्वारोऽभिप्लवाः ।
द्वादशाहस्य दशाहान्यतिरात्रः ॥ १५ ॥

गतार्थः ॥ १५ ॥

एकोनचत्वारिंशद्रात्रेण सर्वेषां पशूनामाधि-
पत्यं गच्छन्ति । प्रजाकामा उपेयुरतिरात्रो ज्योति
र्गौरायुरूयहश्चत्वारोऽभिप्लवा द्वादशाहस्य दशा-
हान्यतिरात्रः ॥ १६ ॥

आधिपत्यं साम्राज्यम । एकोनचत्वारिंशद्रात्रेणानन्ता श्रियं जयन्तीत्येके ॥ १६ ॥

चत्वारिंशद्रात्रेण परमायां विराजि प्रतिष्ठां
गच्छन्ति । एता एव समहाव्रताः ॥ (ख० ६) ॥१७॥

इति सत्याषाढहिरण्यकेशिसूत्रेऽष्टादशप्रश्ने द्वितीयः पटलः ॥

चत्वारिंशद्रात्रेण यक्ष्यामहे । परमां प्रतिष्ठां गच्छन्तीति श्रुतिश्च ॥ १७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां सप्तदशप्रश्ने द्वितीयः पटलः

अथाष्टादशप्रश्ने प्रथमः पटलः ।

विधृतिरेकस्मान्न पञ्चाशो विपाप्मना भ्रातृव्येणाऽऽवर्तन्ते । य एता उपयन्त्यतिरात्रस्त्रयस्त्रिवृतोऽग्निष्टोमा अतिरात्रो दश पञ्चदशा उक्थ्याः षोडशिमद्दशममहरतिरात्रो द्वादश सप्तदशा उक्थ्या अतिरात्रः पृष्ठ्यः षडहोऽतिरात्रो द्वादशैकविंशा उक्थ्या अतिरात्रोऽयमतिरात्रः ॥ १ ॥

त्रिवृत्स्तोमयुक्ता अग्निष्टोमरूपा अहर्विशेषास्त्रयः कर्तव्याः । पञ्चदशस्तोमयुक्ता अहर्विशेषा दशसंख्याकाः कर्तव्याः । षोडशिस्तोत्रयुक्तं दशरात्रस्य दशममविवाक्यमेकमहः कार्यम् । सप्तदशस्तोमयुक्ता अहर्विशेषा द्वादशसंख्याकाः कार्याः । अथ षट्संख्याकान्यहानि—'पृष्ठ्यः षडहो भवति' (तै० सं० ७–४–७) इति विधिदर्शनात् । अथान्यानि कानिचिदहानि विधत्ते—'द्वादशैकविंशा भवन्ति' (७–४–७) इत्यादि । एकविंशस्तोमयुक्ता अहर्विशेषा द्वादश कर्तव्याः ॥ १ ॥

अथान्यानि कानिचिदहानि विधत्ते —

द्वितीयोऽयमेवैतेषां श्रीर्भवति । मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्चेन्द्रश्च विवस्वांश्चेत्येतासां देवतानामृद्धिमृध्नुवन्ति । वर्माण्यस्मा भवन्ति । य एता उपयन्त्यतिरात्रः । द्वावभिप्लवौ । गोआयुषी द्वौ द्वावभिप्लवावभिजिच्च विश्वजिच्चातिरात्रावेकोऽभिप्लवः सर्वस्तोमो नव सप्तदशाश्चातिरात्रा द्वादशाहस्य दशाहानि महाव्रतश्चातिरात्रश्च ॥ (ख० ७) ॥ २ ॥

तेषां यजमानानां श्रीः शोभा भवतीत्यर्थः । गतमन्यत् ॥ २ ॥

१ ख. घ. °त्रौ गायत्रीषु जगतीष्वनुष्टुप्सु त्रिष्टुप्सु नानदं बृहतीषु रथन्तरं पङ्क्तिषु गायोवादिवं त्रिष्टुभि ऋशनं जगतीषु कावमुद्यानं छन्दांस्युपयन्त्युपसंशायमतिरात्राद् ।

आञ्जनाभ्यञ्जनीयस्तृतीयो यां न जानीयुर्यदा वाऽञ्जतेऽभि वाऽञ्जते शुभमेवाऽऽस्मन्दधते जानन्त्येनान गौल्गुल्वेन प्रातःसवने । सौगन्धिकेन माध्यंदिने सवने । पौतुदारवेण तृतीयसवने । य एता उपयन्त्यतिरात्रश्चत्वारोऽभिप्लवाः सर्वस्तोमोऽतिरात्रो नवरात्रगर्भश्च द्वावभिप्लवौ द्वादशाहस्य दशाहान्यतिरात्रो नवरात्रगर्भश्चतुर्थः । संवत्सरसंमिता संवत्सरस्य प्रसवं गच्छन्ति य एता उपयन्त्यतिरात्रश्चतुर्विंश उक्थ्यश्चाऽऽरम्भणीयस्त्रिवृद्वा द्वावभिप्लवौ पृष्ठ्यः षडहोऽभिजित्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिदेकोऽभिप्लवः प्रत्यङ्गो आयुषी द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ (ख० ८) ॥ सवितुः ककुदः पञ्चमः सर्वस्य प्रसवं गच्छन्ति । य एता उपयन्त्यतिरात्रस्त्रीणि त्रिवृन्त्यहान्यग्निष्टोमसुत्याः षडहोऽभियानि त्रीणि त्रिवृन्त्यहान्यग्निष्टोमावभित उक्थ्यं मध्ये तथैव नव पञ्चदशानि नव सप्तदशानि नवैकविंशानि द्वादशाहानि महाव्रतं चातिरात्रश्च । ऋतूनां षष्ठं प्रतिष्ठाकामा उपेयुः । अतिरात्रश्चत्वारोऽभिप्लवा महाव्रतम् । द्वावभिप्लवौ द्वादशाहस्य दशाहान्यतिरात्रम् । इन्द्राग्न्योः सप्तमोऽस्त्यन्याः प्रजा भवन्त्योजिष्ठा भवन्ति । य एता उपयन्त्यतिरात्रः । षडभिप्लवा महाव्रतं द्वावभिप्लवौ द्वादशाहस्य दशाहान्यतिरात्रः ॥ (ख० ९) ॥ ३ ॥

अत्राऽऽञ्जनाभ्यञ्जनीयस्तृतीयो नवरात्रगर्भश्चतुर्थः सवितुः ककुद पञ्चम ऋतु षष्ठ एकोनपञ्चाशद्रात्रे प्रभेद इति भाष्यकृदभिप्राय । गतार्थं ॥ ३ ॥

· एकषष्टिरात्रेण यं कामं कामयन्ते तमभ्यश्नुवते सर्वामृद्धिमृध्नुवन्ति वर्षीयांसो भवन्ति । य एता उपयन्ति अतिरात्रश्च-

तृतीयेऽश उक्थ्य आरम्भणीयस्त्रिवृद्द्वा
त्रयोऽभिप्लवाः पृष्ठ्यः षडहोऽभिजित्त्रयः
स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसा-
मानोऽभिजित्त्रयस्त्रिंशदारम्भणः पृष्ठ्यः
षडह एकोऽभिप्लवः प्रत्यङ्गो आयुषी
द्वादशाहस्य दशाहानि महाव्रतं चातिरा-
त्रश्च ॥ ४ ॥

सप्त समस्तासमिह पारनुयन्ति सर्वागामो नमस्तो भवन्ति । एकषष्टिरात्रेण यश्चा-मेह तमुपन्तो भूयांसमत्याहि । दशाहवत्सौत्रामण्यन्तं समानम् ॥ ४ ॥

देवानां शतरात्रेण देवत्वं गच्छन्ति । य एता
उपयन्त्यतिरात्रो ज्योतिर्गौरायुरित्यहश्चतुर्दशाभि-
प्लवाः द्वादशाहस्य दशाहानि महाव्रतं चातिरात्र-
श्चाभिप्रयन्तः समानत्र वा तिष्ठन्तोऽभिषुण्वन्ति ॥
(ख० १-) ॥ ५ ॥

देवानां शतरात्रमिति कर्मनामधेयम् । दशाहवत् सौत्रामण्यन्तं पूर्ववत् ॥ ५ ॥

आदित्यानामयनेनैतेषु लोकेषु प्रतितिष्ठन्ति ॥ ६ ॥

आदित्यानामयनमिति संज्ञा सत्रस्य ॥ ६ ॥

गवामयनेन व्याख्यातम् ॥ ७ ॥

गवामयनेन प्रकारेण ॥ ७ ॥

सर्वेऽभिप्लवा मासा मध्ये पृष्ठ्यः पञ्चदशास्त्रिवृतोऽ-
भिप्लवाः ॥ ८ ॥

संवत्सरसंमितानि यानि यानि सत्राणि तानि गवामयनप्रकृतीनि भवन्ति । संवत्सर-सामान्यात्तद्गुणदर्शनाच्च (का० श्रौ० २४, १, ८) । दृश्यन्ते हि तेषु गवामयनिका गुणाः । अथ यत्पृष्ठ्यं षडहमुपयन्ति । यदभिप्लवं षडहमुपयन्ति, इति । तत्राभिप्ल-वास्त्रिवृत्पञ्चदश स्तोमा भवन्ति गवामयने हि पृष्ठ्यान्ता मासा इह पृष्ठ्यमध्या भवन्ति ॥ ८ ॥

अभिजितः स्थाने त्रिवृद्बृहस्पतिसवः ॥ ९ ॥

भवतीति शेषः ॥ ९ ॥

विश्वजितः स्थाने पञ्चदश इन्द्रस्तोमः ॥ १० ॥

अत्रापि भवतीति शेषः ॥ ११ ॥

पृष्ठाभिप्लवावुपेत्य व्यहावग्निष्टोमाग्निष्टुत उद्भिद्बलभिद्भ्यामिति । ऊर्ध्वं दशरात्रो मास उत्तमे संभार्येऽभिप्लवाति । यो मध्ये पृष्ठ्यः पटल ऊर्ध्वं गोआयुषी ॥ १२ ॥

पूर्ववद्व्याख्येयम् ॥ १२ ॥

छन्दोमा दशरात्रः ॥ १२ ॥

भवतीति शेषः । दशरात्रस्य छन्दोमत्र्यहाद इति व्याख्यातम् ॥ १२ ॥

प्रत्यङ्ङष्टाचत्वारिंशं चतुश्चत्वारिंशं षट्त्रिंशं द्वात्रिंशं त्रिंशं द्वे अष्टाविंशे पञ्चविंशं चतुर्विंशमतिवाक्य दशमं महाव्रतमुदयनीयमतिरात्र इति ॥ १३ ॥

प्रत्यङ्ङष्टाचत्वारिंश चतुश्चत्वारिंश षट्त्रिंश द्वात्रिंश त्रिंश द्वे अष्टाविंशे पञ्चविंश चतुर्विंशम । महाव्रतोदयनीयाभ्यामिति द्व्यूनो मास पूर्यते (आप० श्रौ० २३-९-१०) इत्यापस्तम्ब ॥ १३ ॥

अङ्गिरसामयनं स्वर्गकामा उपेयुः ॥ १४ ॥

अङ्गिरसामयनमिति सत्रसंज्ञा ॥ १४ ॥

आदित्यानामयनेन व्याख्यातम् ॥ १५ ॥

तदादित्यानामयनवद्भवति ॥ १५ ॥

सर्वेऽभिप्लवा मासाः पुरस्तात्पृष्ठ्याः प्राग्विषुवत उपरिष्टात्पृष्ठ्या ऊर्ध्वं विषुवतश्छन्दोमा दशरात्रः । ऊर्ध्वं स्तोमः पञ्चविंशं द्वे अष्टाविंशे त्रिंशं द्वात्रिंशः षट्त्रिंशं चत्वारिंशमष्टाचत्वारिंशं चतुश्चत्वारिंशमष्टाचत्वारिंशं चतुर्विंशमतिवाक्य दशमं महाव्रतमुदयनीयं चातिरात्र इति ॥ १६ ॥

त्रिवृतोऽभिप्लवा भवन्ति । मासाः पुरस्तात्पृष्ठ्या भवन्ति प्राग्विषुवत ऊर्ध्वं विषुवत उपरिष्टात्पृष्ठ्याः पञ्चदशिन । छन्दोमदशरात्र ऊर्ध्वं … पञ्चविंश द्वे अष्टाविंशे त्रिंशं द्वात्रिंश षट्त्रिंश चत्वारिंशमष्टाचत्वारिंश चतुश्चत्वारिंशमष्टाचत्वारिंशम । महाव्रतोदयनीयाभ्यामिति द्व्यूनो मासः पूर्यते । अन्येषाम्—पृष्ठ्या आवर्तन्ते चाऽऽ-

दित्यानामयनमभिप्लवा आयन्ति चाङ्गिरसामयनम् । यदन्यत्पृष्ठ्याभिप्लवेऽभ्यस्तान्या-
ऽभ्यस्तान्यायन्ति (भ० श्रौ० २३-९-१६) इति भरद्वाजश्चाऽऽह ॥ १६ ॥

**इति वानवतोऽयनेन यं कामं कामयन्ते तमभ्यश्नु-
वते सर्वामृद्धिमृध्नुवन्ति वसीयांसो भवन्ति । य
एता उपयन्त्यतिरात्रः ॥ (ख० ११) ॥ १७ ॥**

इति सत्याषाढहिरण्यकेशिसूत्रेऽष्टादशप्रश्ने तृतीयः पटलः ॥

इति वानवतोऽयनमिति सत्रस्य संज्ञा । सकल्पादि पूर्ववत् ॥ १७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां
प्रयोगचन्द्रिकायामष्टादशप्रश्ने तृतीयः पटलः ॥

अथाष्टादशप्रश्ने चतुर्थः पटलः ॥

**त्रिवृता मासं पञ्चदशेन मासꣳ सप्तदशेन मास-
मेकविꣳशेन मासं त्रिणवेन मासं त्रयस्त्रिꣳशेन
मासम् । एत एवोत्तरं मासांस्त्रयस्त्रिꣳशारम्भण-
स्त्रिवृदुत्तमा अतिरात्रः ॥ १ ॥**

अतिरात्रावभितः । त्रिवृता मासं पञ्चदशेन मासं त्रयस्त्रिंशेन मासम् । अथ विषु-
वन्महाव्रतं तस्मिन्नन्वेऽपि तिष्ठत्य । एत एवोत्तरं मासांस्त्रयस्त्रिंशारम्भणास्त्रिवृदुत्तमाः ।
तत्रैकैकेन पृष्ठ्यस्तोमेन मासं नयेत । पृष्ठ्यस्तोमाश्च त्रिवृदादयः । एवं ह्यत्र श्रूयते—
त्रिवृता मासं पञ्चदशेन मासं सप्तदशेन मासमेकविंशेन मासं त्रिणवेन मासं त्रयस्त्रिं-
शेन मासमिति सत्रायणीयश्रुति । अतस्त्रिवृदादिभिरेकाहैर्मासं मासं नयेदिति । तदुक्तं
कात्यायनाचार्येण पृष्ठ्याहान्स्तोमकवतान' (का० श्रौ० २५-१२५) इति । तेषां
शब्दस्तोमशब्दः सत्राभिधायक उपलभ्यते पृष्ठ्यस्तोमशब्दोऽपि नैकाहानामेव वाचक उप
लभ्यते । पृष्ठ्यस्तोमशब्दस्त्रिवृदादय । ननु च स्तोमेष्वपि दृश्यते पृष्ठ्यस्य षडहस्य
स्तोमा पृष्ठ्यस्तोमा इति स्तोमेष्वपि भवति । नैतदेवम् । पृष्ठ्यस्तोमशब्दः प्रत्ययस्तमि-
तावयवार्थवृत्तित्वात् एकाहविशेषाणां वाचक इति । स्तोमेषु पुनः षष्ठीं कल्पयित्वा
समासकल्पनेन लक्षणेन च स्तोमेन प्रवृत्ति । न च तन्न्याय्यम् । तस्मात्पृष्ठ्यस्तोमश-
ब्दः एकाहाना वाचक इति । एवं प्राप्ते ब्रूमः—

नानाहानि वा सत्रनामशब्दात् (का० श्रौ० २५-१२६) इति । वाशब्दः पक्ष-
व्यावृत्त्यर्थो नानाहानि वा । सत्रनामप्रमाणानि तेषु स्तोमविधान त्रिवृता स्तोमेन मासं

पञ्चदशस्तोमेन मासमित्येवमादि । कुत एतत्–सघातशब्दो यत्र भवति तत्रैकाहवचने त्रिवृद्भवति, स च मासमिति वाक्यं भिद्यते । अथ पुनर्यो मासः स त्रिवृता स्तोमेनेति नैष दोषो भवति ॥ १ ॥

कुण्डपायिनामयने मासं दीक्षिताः २ ॥

भवन्तीति शेषः । कुण्डपायिनामयनमिति सत्रस्य सज्ञा ॥ २ ॥

राजानं क्रीत्वोपनह्य द्वादशभिरुपसद्भिश्चरित्वा हविर्यज्ञमासं यजन्ते ॥ ३ ॥ मासमग्निहोत्रं जुह्वति ॥ ४ ॥

प्रायणीयया प्रचर्य राजानं क्रीत्वोपनह्य निदधाति । द्वादशभिरुपसद्भिश्चरित्वा हविर्यज्ञैर्यजन्त इति । सोमोपगूहनं कृत्वा यानि सुत्यास्थानानि तेष्वग्निहोत्रहोमः । अग्नि-होत्रं च सायमारम्भं प्रातरपवर्गम । तत्र द्वावपि होमौ फलिकयात्तन्त्रेणोपक्रमितव्यौ । प्रधानस्य तु भेद –'अग्निर्ज्योतिर्ज्योति सूर्यो ज्योतिर्ज्योति सम्सृष्टिर्वा' (इत्यादि) गार्ह-पत्यकार्य तत्र प्राजहित एव न शाल्लामुखीये । ज्योतिष्टोमे हि 'न जुहोति न पचती-त्यादिनिषेधोऽपि ।

ननु कुण्डपायिनामयनेऽग्निहोत्रे किं प्राजहिते सत्ये गार्हपत्ये श्रपणमुत शाल्लामुखीय इति संशये चोदकप्राप्त शाल्लामुखीये स्यात् 'ज्योतिष्टोमे हि शाल्लामुखीय एवात ऊर्ध्वं गा-र्हपत्यो भवति' इति शाल्लामुखीये गार्हपत्यकार्ये विहितश्चोदकपरम्परया कुण्डपायिनामयने प्राप्तस्तस्मात्तत्र श्रपणम् । सत्यम । चोदकादेवम । अग्निहोत्रनामधेयात्तु नैमित्तिकाग्निहोत्र-वन्मुख्य एव गार्हपत्ये श्रपण प्रापित तच्चोदकाद्बलीय इत्युक्तम् । केचित्तु–कृत्वाचिन्ता-माहुः । असत्यपि नामधेये 'गार्हपत्ये हवींषि श्रपयन्ति' इत्यस्यानारभ्यवादस्य सर्वार्थत्वादु-पदेशात प्राप्तः प्राजहितश्चोदकप्राप्तं शाल्लामुखीय बाधत इति । तन्न नैवम् । अनारभ्यवा-दस्य हवि [illegible] पायिनामयने च हवि श्रपणस्य [illegible] । नित प्राप्य-माणस्य सहैव प्राजहितेन प्राप्तेर्निरुक्तत्वान्नोपदेशासम्भव । तस्मान्नाम्नैव प्राजहितप्राप्ति ।

ननु सिद्धं नाम्न. प्राबल्यं सप्तम । सत्यम् । इह तु प्रसङ्गनिराकरणार्थं सूत्रम् । शाल्लामुखीयस्यास्मिंस्तन्त्रे चोदकेन सर्वगार्हपत्यकार्याय प्रवृत्त स एव प्रसङ्गादग्नि-होत्रश्रपणमपि साधयिष्यति, विनाऽपि नाम्नेति शङ्का सेय निराक्रियते । अन्या-र्थस्य नामप्राप्तेन प्राजहितेन बाधितत्वादिति [illegible] गुण्यानाश्रयणादि-त्यस्यैव न्यायस्य प्रपञ्चोऽयम । (जै० सू० १२–१–६) ॥ ३ ॥ ४ ॥

मासं दर्शपूर्णमासाभ्यां यजन्ते ॥ ५ ॥

दर्शपूर्णमासाभ्या मासमिति [illegible] ॥ ५ ॥

मासं वैश्वदेवेन मासं वरुणप्रघासैर्मासः साकमेधैः मासः शुनासीरीयेण । त्रिवृता मासं पञ्चदशेन मासमेकविंशेन मासं त्रिणवेन मासमष्टादश त्रयस्त्रिंशान्यहानि द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्च ॥ ६ ॥

पुनःपुनः सामिश्रान्तर्भावेन ......मिनीयन्ते (मा० क० ९-३-८) वैश्वदेवेन मासं वरुणप्रघासैर्मासं साकमेधैर्मासं शुनासीरीयेण मासमिति श्रुतेः ॥ ६ ॥

सर्वेण यज्ञेन यजन्ते ॥ ७ ॥

यज्ञ .... इति न्यायवदेकवचनेन सर्वयज्ञोपलक्षणत्वाच्च ॥ ७ ॥

सर्वे भवन्ति ॥ ८ ॥

हविर्यज्ञसंस्था .... भवन्तीति । सामिमिति सर्वत्र ॥ ८ ॥

अन्तरुक्थ्यमसंभक्षयन्ति ॥ ९ ॥

अन्तरुक्था अनुक्तका कुण्डपायिनां वृत्ता ...... कात्यायनेन—अन्तरुक्था: कुण्डपायिनामयनमा. (का० श्रौ० २४-१४) इति । भवन्तीति शेषः ॥ ९ ॥

यो होता सोऽध्वर्युः स पोता य उद्गाता । स नेष्टा सोऽच्छावाको यो मैत्रावरुणः स ब्रह्मा । स प्रतिहर्ता । यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुत्यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्यः ॥ १० ॥

अन्तरुक्थ्यमसंभक्षयन्तीत्यन्वयः ॥ १० ॥

तपश्चितामयने संवत्सरं दीक्षाः । संवत्सरमुपसदः । संवत्सरः सुत्याः ॥ ११ ॥

भवन्तीति शेषः । चतुरश्चतुरो मासानेकैकेनोपसन्मन्त्रेण जुहोति । अनुपसदमग्निं चिनोति । द्वौ द्वौ मासावेकैका चितिः । चतुर उत्तमा । चतुर्भिस्त्रिभिर्द्वाभ्यामेकेनेति त्रीन्त्स्तनान्मासानुव्रतानि । संवत्सरं प्रसुता (आप० श्रौ० २३-११-३ । ७) इत्यापस्तम्बोक्तं विशेषः । तपश्चितामयनसत्रनाम । तत्र दीक्षाः संवत्सरं भवन्ति उपसदः सुत्याश्च ॥ ११ ॥

प्रजापतेर्द्वादशसंवत्सरं प्रजया पशुभिर्जायन्ते ॥ १२ ॥

प्रजापतेर्द्वादशसंवत्सरेण प्रजापतेर्ऋद्धिमश्नुवन्ति इत्यापस्तम्बीये विशेषः ॥ १२ ॥

य एतदुपयन्ति त्रयस्त्रिवृतः संवत्सरास्त्रयः पञ्च-
दशास्त्रयः सप्तदशास्त्रय एकविंशाः ॥ १३ ॥

प्रजापतिसत्रमिति संज्ञा ॥ १३ ॥

एतदेव नैमिषीयाणां । स्वर्गकामा उपेयुः । नव
त्रिवृतः संवत्सरा नव पञ्चदशा नव सप्तदशा
नवैकविंशाः शाक्यानां षट्त्रिंशत्संवत्सरं
तरसपुरोडाशमगस्त्यगृहपतिकम् ॥ १४ ॥

शाक्यानामयनमिति संज्ञा सत्रस्य । तत्र षट्त्रिंशत् संवत्सरा भवन्ति । तत्र तरसमयाः पुरोडाशा भवन्ति । मांसमया इत्यर्थः ॥ १४ ॥

काण्याध्वर्यवः संस्थिते संस्थितेऽहनि गृहपति-
र्मृगयां प्रयाति ॥ १५ ॥

गृहपतिर्मुख्ययजमानः ॥ १५ ॥

स यान्मृगान्हन्ति । तेषां तरसाः पुरोडाशा भवन्ति ॥ १६ ॥

सर्वत्राविशेषादिति पूर्वपक्षः । भवन्तीत्या वा बहुश्रुतेरिति सिद्धान्तः ॥ १६ ॥

नव त्रिवृतः संवत्सरा नव पञ्चदशा नव सप्तदशा
नवैकविंशाः ॥ १७ ॥

भवन्तीति शेषः ॥ १७ ॥

एतेन ह वै शाक्यो गौरिवीतिः सत्त्रामृद्धिमृध्नो-
त्सत्त्रामृद्धिमृध्नुवन्ति । वर्ष्मायास्मो भवन्ति । य
एतदुपयन्ति ॥ १८ ॥

हवै शब्दौ निश्चयार्थे निपातौ । तरसपुरोडाशा अथोद्देवलोके च मनुष्यलोके चार्द्धिमृध्नुवन्ति (२३-१०-१४) इत्यापस्तम्बः ॥ १८ ॥

पञ्चविंशतिस्त्रिवृतः संवत्सराः पञ्चविंशतिः
पञ्चदशाः पञ्चविंशतिः सप्तदशाः पञ्चविंशति-
रेकविंशाः ॥ १९ ॥

शाक्यो गौरिवीतिः सत्रमिति वैतानम् ॥ १९ ॥

अग्नेः सहस्रसाह्येन सर्वस्य प्रसवं गच्छन्ति ।
य एतदुपयन्त्यतिरात्रः सहस्रसाभ्यानि त्रिवृतोऽ-
ग्निष्टोमोऽतिरात्रः ॥ २० ॥ (ख० १२) ॥

सा-यानामयन सत्र तच्छतसंवत्सरं भवति । तदाह कात्यायनः— ‘ शतसंवत्सरं सा-यानाम् ’ (२४-१७९) इति ॥ २० ॥

त्रीणि सारस्वतानि ॥ २१ ॥

सत्राणि भवन्तीत्यर्थः ॥ २१ ॥

कानि पुनस्तानि—

मित्रावरुणयोः प्रथमम् । इन्द्राग्न्योर्द्वितीयम् ।
अर्यम्णस्तृतीयम् ॥ २२ ॥

स्पष्टम् ॥ २२ ॥

सरस्वत्या उपमज्जनेन दीक्षन्ते ॥ २३ ॥

ये सत्रिण इत्यर्थः ॥ २३ ॥

अमावास्यायां प्रायणीयमहस्तदहर्वत्सानपाकुर्वन्ति ॥ २४ ॥

प्रायणीयया प्रचर्य राजानं क्रीत्वोपनह्य निदधाति । द्वादशभिरुपसद्भिश्चरित्वा प्राय-णीयमतिरात्रमुपेत्य [illegible] सूत्रान्तरम् ॥ २४ ॥

सं स्थितेऽतिरात्रे सांनाय्येन यजन्ते ॥ २५ ॥

संस्थिते प्रायणीये सानाय्येन यजन्त इति ॥ २५ ॥

तस्मिन्सं स्थितेऽध्वर्युः शम्यां परास्यति ॥ २६ ॥

शम्या प्राचः परास्यति ॥ २६ ॥

सा यत्र निपतति तद्गार्हपत्यः । ततः षट्त्रिंशं-
त्प्रक्रमेष्वाहवनीयम् ॥ २७ ॥

सा शम्या यत्र निपतति तद्गार्हपत्यायतनं भवति । तस्मात् षट्त्रिंशतं प्राचः प्रक्र-मान्प्रक्रामति । तदाहवनीय इत्यापस्तम्बः ॥ २७ ॥

चर्कीवन्ति सदोहविर्धानान्याग्नीध्रश्च ॥ २८ ॥

भवन्त्यन्यथा गमनासंभवात् ॥ २८ ॥

उलूखलबुध्नो यूपः प्रकृत्य उपोप्य एव ॥ २९ ॥

उलूखलमिव बुध्नो यूपस्य भवति । स च प्रकृष्यते न निखन्यते ॥ २९ ॥

नोपरवान्खनन्ति ॥ ३० ॥

---

१ ग अनद्याने ।

प्रतिषेधात् ॥ ३० ॥

न एतमापूर्यमाणपक्षममावास्येन यजन्ति ॥ ३१ ॥

अमावास्येन हविषा यजन्ति ॥ ३१ ॥

पौर्णमास्या गोष्टोम उक्थ्यो रथंतरसामा ॥ ३२ ॥

रथंतरसामस्थाने बृहत्सामानमुपयन्तीत्यापस्तम्बः ॥ ३२ ॥

तस्मिन्संस्थिते पौर्णमासेन यजन्ते ॥ ३३ ॥

तस्मिन्पौर्णमास्यामित्यर्थः ॥ ३३ ॥

न एतमपरपक्षं पौर्णमासेन यजन्ति ॥ ३४ ॥

अपरपक्षः कृष्णपक्षः । पौर्णमासेन हविषा यजन्तीत्यापस्तम्बः ॥ ३४ ॥

अमावास्यायामायुष्टोम उक्थ्यो बृहत्सामैवं विष-
योमयन्ति ॥ ३५ ॥

अमावास्यायामायुष्टोम रथंतरसामानमुपयन्ति[1] इत्यापस्तम्बः ॥ ३५ ॥

सरस्वत्या दक्षिणेन तीरेणाऽऽक्रोशन्तो यान्ति ॥ ३६ ॥

न एवमेव व्यत्यासं सरस्वत्या दक्षिणेन कूलेनाऽऽक्रोशन्तः प्राञ्चो यान्ति या सरस्वत्याख्या नदी तया सह न हि प्रतिदिनं गच्छेयुरिति भाष्यकृत । उत्साहातिशयेन क्रियमाण उच्चतमो ध्वनिराक्रोशस्तं कुर्वन्तो गच्छेयुः ॥ ३६ ॥

दृषद्वत्या अप्ययेऽपोनपत्रीयं चरुं निरुप्यातियन्ति ॥ ३७ ॥

दृषद्वत्यप्यये प्रदेशे चरुर्भवति ॥ ३७ ॥

गवां दशसु शते वृषभमुत्सृजन्ति ॥ ३८ ॥

दशसु गोषु शते वृषभमुत्सृजन्ति ॥ ३८ ॥

यदा दशशतं कुर्वन्त्यथैकमुत्थानम् । यदा शतं सहस्रं कुर्वन्त्यथैकमुत्थानम् । यदा गृहपतिर्म्रियतेऽथैकमुत्थानम् । यदा वा सर्वं ज्यानिं जीयन्त्यथैकमुत्थानम् । यदा प्लक्षं प्रस्रवणं प्राप्नुवन्त्यथैकमुत्थानम् । प्लक्षं प्रस्रवणं प्राप्याग्नये कामायेष्टिं निर्वपन्ति ॥ ३९ ॥

प्लक्षे प्रास्रवणप्रदेशेऽग्नये कामायेष्टिर्भवति ॥ ३९ ॥

तस्यामश्वां पुरुषीं च धेनुके दत्त्वा कारपचवं (यं) प्रति यमुनावभृथमभ्यवयन्ति ॥ ४० ॥

---

१ ग. पशु'।

इष्यतेऽध्वर्य्वोर्दानं चेतनत्वे सति तदुपकाराभावात्तत्प्रसूतेश्च दानम् । दानं च प्रसर्पकस्य । तस्या कामदुघाऽसीत्यर्थः । अवभृथग्रहणेन सत्रसमाप्तिः ॥ ४० ॥

देवमनुष्येभ्यस्तिरो भवन्ति ॥ ४१ ॥

ब्राह्मणादेरस्य सत्रप्रशंसा चात्र ॥ ४१ ॥

द्वितीयेऽतिरात्रे ज्योतिर्गौरायुरयनं विश्वजिदभि-
जिता मनुष्येभ्यस्तिरो भवन्ति ॥ ४२ ॥

आयुष्कृत्यातिमरणेऽतिरात्रो भवति (२४-२११) इति कात्यायन । सर्वज्याना विश्वजिज्ज्योतिष्टोमो वा सर्वेषां भवतीति सूत्रान्तरम् ॥ ४२ ॥

द्वितीयेऽतिरात्रे ज्योतिर्गौरायुरयनं विश्वजिदभि-
जिताविन्द्रकुक्षी । अन्यन्याः प्रजा भवन्ति ॥४३॥

अतिरात्र कल्प्य । द्वितीये सारस्वते सत्रे ॥ ४३ ॥

ओजिष्ठा भवन्ति ॥ ४४ ॥

ओजिष्ठा बलिष्ठा ॥ ४४ ॥

तृतीयेऽतिरात्रेस्त्रिवृत्पञ्चदशमपरे गोआयुषी इन्द्रकुक्षी ॥ ४५ ॥

भवन्तीत्यनुवर्तते ॥ ४५ ॥

अर्यम्णः पन्थानं यन्ति । (स्व) १३॥ देवयानं पन्थानं गच्छन्ति ॥४६॥

सत्रिण इत्यर्थात् ॥ ४६ ॥

दार्षद्वते संवत्सरं ब्राह्मणस्य गा रक्षेत् ॥ ४७ ॥

दार्षद्वतमिति सत्रनामधेयम । तत्र कर्म व्याख्यायते । कात्यायन·—'ऋत्विगाचार्ययोरन्यतरस्य गा रक्षेत्संवत्सरम्' (का० श्रौ० २४-२२४) इति । संवत्सरं गवा रक्षणमित्यर्थः ॥ ४७ ॥

संवत्सरं व्यर्णे नैतन्धवेऽग्निमिन्धीत ॥ ४८ ॥

अग्निनिर्धान, पुनराधानवचनाच्च । नैतन्धवप्रदेशे गत्वोदकेऽग्निन्धनं कुर्यात् ॥४८ ॥

संवत्सरे परिणह्याग्नीनादधीत ॥ ४९ ॥

अन्वारम्भणीयान्तमिति कात्यायनोक्तविकल्प. । दर्शपूर्णमासान्तं वेति सिद्धान्तित. । नैतदयुक्तमस्मच्छाखायामाग्नेय्यष्टिर्भवति वक्ष्यमाणसूत्राच्च ॥ ४९ ॥

दृषद्वत्या दक्षिणेन तीरेणाऽऽग्नेयेनाष्टाकपालेन
शम्यापरासा ॥ ५० ॥

तेन यागं [illegible] दृषद्वतीतीरेण दक्षिणेन गच्छेत् ॥ ५० ॥

त्रिः प्लक्षं प्रति यमुनामवभृथमभ्यवयन्ति ॥ ५१ ॥

त्रि. प्लक्षप्रस्रवणमारभ्य यमुनामवभृथमभ्यवयन्ति ॥ ५१ ॥

तदेव मनुष्येभ्यस्तिरो भवति ॥ ५२ ॥

गत. ॥ ५२ ॥

तुरायणेन सर्वामृद्धिमृध्नुवन्ति ॥ ५३ ॥

तुरायणमिति सत्रनाम ॥ ५३ ॥

परमेष्ठितां गच्छन्ति ॥ ५४ ॥

परमेष्ठी ब्रह्मा ॥ ५४ ॥

आग्नेयोऽष्टाकपाल ऐन्द्राग्न एकादशकपालो वैश्व-
देवं चरुम् ॥ ५५ ॥

यत्तपस्तप्यन्ते दृर्वा तेन हविरुच्छिष्टव्रतो भवति । संवत्सरं सवनविधा इष्टीर्निर्वपति । वैश्वदेवो द्वादशकपालः (आप० श्रौ० २३-१४-२) इत्यापस्तम्बसूत्रम् । कृत एतत्—आग्नेयं प्रातःसवनमैन्द्रं माध्यंदिनं वैश्वदेवं तृतीयसवनमित्यर्थवादात् ॥ ५५ ॥

दीक्षितः कृष्णाजिनं प्रतिमुञ्चते ॥ ५६ ॥

स्वयमेव तूष्णीं कृष्णाजिनादीनि (२४-२३०) इति कात्यायन ॥ ५६ ॥

मानुषि(षी)मेव तेन समृद्धिमृध्नोति ॥ ५७ ॥

मनुष्यसंबन्धेनर्द्धिमृध्नोति तेन प्राप्नोतीत्यर्थः ॥ ५७ ॥

यत्तपस्तप्यते दृर्वा तेन हविरुच्छिष्टव्रतो भवति ॥ ५८ ॥

तेन गृहपतिना । वा प्रकृतनाशनः ॥ ५८ ॥

संवत्सरमहरहरिष्टिभिर्यजते ॥ ५९ ॥

संवत्सरं यजनीयेषु यागपरिसमाप्तौ सत्यामन्वह वेत्युच्यते । संवत्सरशब्देन हि सर्वाण्यहानि गृह्यन्ते न यजनीयान्येव । अत्रैवाहरहरिति प्रयोगदर्शनात् ॥ ५९ ॥

सवनकल्पो भवति ॥ ६० ॥

गत· ॥ ६० ॥

सर्वमन्त्रेणापपुनर्मृत्युं जयति ॥ ६१ ॥

गृहपति· ॥ ६१ ॥

आदित्यानामिवैषां प्रकाशो भवति ॥ ६२ ॥

स्पष्टम् ॥ ६२ ॥

अतिरात्रावग्निष्टोमं मध्ये ॥ ६३ ॥

प्रायणीयोदयनीयवर्जम् । मध्येऽतिरात्रावग्निष्टोमश्च भवति ॥ ६३ ॥

सर्वो दशदशी संवत्सरो द्वादशो विषुवान् ॥ ६४ ॥

भवतीति शेषः ॥ ६४ ॥

त्रिसंवत्सरं गवामयनमादित्यानामङ्गिरसाम् ।
प्रजापतिं समानं गच्छन्त्यभिस्वर्गं लोकं जय-
न्त्येषु लोकेषु प्रतितिष्ठन्ति ॥ ६५ ॥

आदित्यानामङ्गिरसां गवामयनं नाम सत्रं त्रिसंवत्सरमिति । ते च यजमानाः प्रजापतिं समानं गच्छन्ति । पश्चात्स्वर्गं लोकं प्राप्नुवन्ति । ततः स्वर्गमृत्युपातालेषु प्रतितिष्ठन्तीति फलार्थवादश्रवणात्सत्रान्तरं ॥ ६५ ॥

प्रजापतेः सहस्रसंवत्सरेण प्रजापतेर्ऋद्धिमृध्नु-
वन्ति ॥ ६६ ॥

ब्रह्मणः सायुज्यं सलोकतां यन्ति यजमानाः । प्रजापतेः सहस्रसंवत्सरेण सत्रेण सहयामह इत्यादि ॥ ६६ ॥

य एतदुपयन्त्यतिरात्रः सहस्रं संवत्सरांस्त्रि-
वृतोऽग्निष्टोमा अतिरात्रः ॥ ६७ ॥

प्रायणीयोदयनीयावतिरात्रावभितो भवत इति विध्यर्थवादश्रवणाच्च ॥ ६७ ॥

विश्वसृजां सहस्रसंवत्सरं विश्वमेनाननुसृजते ।
य एतदुपयन्ति—पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः
पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः
पञ्चपञ्चाशत एकविंशाः । विश्वसृजां सहस्रसं-
वत्सरम् । विश्वमेनाननुसृजते । य एतदुपयन्ति ।
तत्र श्लोको विश्वसृजः प्रथमाः सत्रमासत सह
स्रसमं प्रसुतेन यन्तः । ततो ह जज्ञे भुवनस्य
गोपा हिरण्मयः शकुनिर्ब्रह्मनामेति । तत्र ब्रह्मणः
सायुज्यं सलोकतां यन्ति य एतदुपयन्ति य
एतदुपयन्ति ॥ (स्व० २४) ॥ ६८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रेऽष्टादशप्रश्ने चतुर्थः पटलः ॥

इति सत्याषाढहिरण्यकेशिसूत्रेऽष्टादशप्रश्नः ।

सार्धशतद्वयसंवत्सरा सहस्रचतुर्थांशस्य [illegible] संभृता कार्या । त्रिवृत्स्तोमयुक्तेन सोमयागेन तावन्तः संवत्सरा नेतव्याः । सोऽयं सहस्रसंवत्सरसत्रस्यैकोंऽशः । पुनस्तावन्त एव संवत्सराः पञ्चदशस्तोमयुक्तेन सोमयागेन नेतव्याः । सोऽयं द्वितीयोंऽशः । पुनरपि तावन्तः संवत्सराः सप्तदशस्तोमयुक्तेन सोमयागेन नेतव्याः । सोऽयं तृतीयोंऽशः । पुनरपि तावन्तः संवत्सरा एकविंशस्तोमयुक्तेन सोमयागेन नेतव्याः । सोऽयं चतुर्थोंऽशः । तदेतत्सर्वं मिलित्वा विश्वसृजां देवानां सहस्रसंवत्सरसत्रमित्युच्यते ।

ये मनुष्या एतत्सहस्रसंवत्सरसत्रमुपयन्त्यनुतिष्ठन्ति । ये चाध्यापका एतद्ब्राह्मणजातमाहुः । येभ्यश्च शिष्येभ्य एतद्ब्राह्मणजातमाहुः । एताननुष्ठातॄनध्यापकाञ्छिष्यांश्चानुसृत्य विश्वं प्रजायते । तत्रानुष्ठातारः [illegible] कर्तारः । अध्यापकास्तदनुष्ठानद्वारा कर्तारः । शिष्यास्तु [illegible] विदित्वा तथाऽनुष्ठाय पश्चाद्विश्वस्य कर्तारः । तदेवं साक्षात्परम्परया वा तान्सर्वाननुसृत्य वि[illegible] प्रजायते । किंच देहपातादूर्ध्वं ब्रह्मणश्चतुर्मुखस्य सायुज्यं तादात्म्यं सलोकतां समानलोकनिवासं वा प्राप्नुवन्ति । किं चैतासामेवाऽऽदित्यानां देवतानां सायुज्यं तादात्म्यं सार्ष्टितां समानैश्वर्योपेतत्वं सलोकतां समानलोकनिवासं वा प्राप्नुवन्ति । तत्र [illegible] फलभेदो द्रष्टव्यः ।

पूर्वेषु लक्षसंवत्सरसत्रं निरूपितम् । उत्तरेषु सहस्रसंवत्सरसत्रं निरूप्यते —विश्वं सृजन्तीति विश्वसृजस्ते च प्रथमाः सृष्ट्यादावुत्पन्नाः सत्रमनुष्ठितवन्तः । कीदृशं सत्रं सहस्रसंख्याकाः समाः संवत्सरा यस्मिन्सत्रे तत्सहस्रसमम् । किं कुर्वन्तः प्रसुतेन यन्तः प्रतिदिनमभिषुतं सोमं प्रसुतस्तेनानुतिष्ठन्तः । ततः संवत्सरसत्रानुष्ठानाच्छकुनिर्जज्ञे ज्ञानशक्तिक्रियाशक्तिरूपद्वयपक्षोपेतः समुत्पन्नः । स च भुवनस्य गोपाः सर्वस्य लोकस्य पालकः । हिरण्मयो ज्योतिर्मयः । ब्रह्मेति तस्य नाम परब्रह्मैव विश्वसृजामनुष्ठानं पालयितुं हिरण्मयशकुनिरूपं स्वीचकार । तं हिरण्यगर्भ इत्याचक्षते । तथा च मन्त्रान्तरमाम्नायते—हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् (तै० सं० ४-१-८) इति स एतदुपयन्तीतिद्विरुक्तिः प्रश्नसमाप्त्यर्था ॥ ६८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामष्टादशप्रश्ने चतुर्थः पटलः ॥

प्रयोगवैजयन्त्यास्तु मालाया सूत्रसम्मिते. ।
सत्यसूत्रस्येह कृतो निर्णयः कौस्तुभो मणिः ॥

मत्प्रयोगो यज्ञवपुषस्तुष्टयेऽस्तु मयाऽर्पितः ।
गृह्णाति हि किमप्येष भक्तैर्यद्यत्तत्कृतम् ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामष्टादशप्रश्नः ।

====

अथ सत्याषाढहिरण्यकेशिसूत्र एकाहादिविधिप्रतिपादक-सप्तदशाष्टादशप्रश्नगतसूत्राणां क्रमेण प्रतीकानि ।

सू० प्र०	पृष्ठाङ्क ।	सू० प्र०	पृष्ठाङ्कः ।
सर्वक्रतुना प्र०	३९५	पूर्वस्मुराग्नेय	४००
निकायिना तु	,,	तदलाभ ए०	४०१
यथादिष्ट वा	,,	धारयत्याह०	,,
ज्योतिर्गौरायु०	,,	व्याघारयत्यु०	,,
प्रथमोऽग्निष्टो०	३९६	सर्पिष्मद०	,,
सर्वे	,,	हिरण्यं सुवे०	,,
ज्योतिषि मह०	,,	इष्ट्वा यक्ष्य	,,
एतेनानियमाद्	,,	नाभिवाय	,,
सर्वेदमे	३९७	तेभ्यो यजवनी०	४०२
दक्षिणाकाले	,,	योजने चतु०	,,
यदन्यद्ब्राह्म०	,,	व्याख्यात उ०	,,
उत्तमा दक्षिणा	,,	त्रिवत्स साण्डः	,,
उदवसाय गो०	,,	उपत्स्तु त्रि.	,,
संवत्सर द्वा०	३९८	समीत्य वा	,,
इन्द्रस्याभिजि०	,,	यवोर्वरा	,,
बृहत्तु होतु	,,	यवानां खल	४०३
सहस्रदक्षिणा	,,	आरोहणे ह०	,,
सर्वजिताऽग्नि०	३९९	शिमितः सद	,,
अतादृश्च	,,	स्फ्यो यूप	,,
तस्य महाव्रतं	,,	अग्नीषोमीय०	,,
सहस्र दक्षि०	,,	सवनीयका०	४०४
चत्वार साह०	,,	अग्नीषोमीयः	,,
ज्योतिरग्निष्टो०	,,	अग्नीषोमीय०	,,
चत्वार साह्न०	४००	सदश्च चैतो	,,
रथन्तरसामा	,,	तमाङ्गिरसा०	,,

सू० प्र०	पृष्ठाङ्कः ।	सू० प्र०	पृष्ठाङ्कः ।
द्रव्यं वा आज्य०	४०४	ता दक्षिणाकाले	४१०
सततमर नो०	४०५	त्रयो वाचस्तो०	४११
द्वितीयस्यैक०	४०६	आत्याना प्रवा०	४१२
तिस्रामिस्तिस्रु०	,,	त्रिवृतोऽग्नि०	,,
तृतीयस्य	,,	उष्णीष प्रतो०	,,
परोक्षपृष्ठौ	,,	तद्रूपत	४१३
हीनानुज्ञा०	,,	वल्कान्तानि	,,
अ रमाद.	,,	द्वे द्वे दामनी	,,
दक्षिद्रुतिश्च	,,	द्विप-हितान्य०	,,
ऋजीषं गो सोम०	,,	त्रयस्त्रिंशता	,,
प्रश्नणुतागो	४०७	ता दक्षिणा	,,
सर्वाल्लत वे०	,,	अपिवा पदृष०	,,
प्रथमेन समा०	,,	अथो खल्वाहु०	,,
यद्यत्स्वाराज्ये०	,,	षट्षोडशी	४१४
अग्निरग्निष्टो०	,,	आदित्याना प्र०	,,
प्रजापतेरेक०	,,	दयावृत्ति पाप्म०	,,
भ्रातृव्यस्माया०	४०७	अग्निष्टोमा	,,
सोम ताके	,,	चितिस्तोम प्र०	,,
अचाक्षिपः	,,	गायत्रणोश्येन	,,
न पुन आन०	,,	उत्तर अत्रिय०	,,
श्येनतामि०	४०९	तेजो ब्रह्मवर्च०	,,
यो हविषा०	,,	त्रिवृतोऽग्निष्टु०	,,
तेजस्कं वार्कं	४१०	आग्नेय पृगा०	,,
आपनस्ये अचि०	,,	आग्नेयीषु स्तु०	,,
अग्नेः रुद्रवत्	,,	एतमेव चतु०	,,
[illegible]	,,	अश्व श्यावो	४१६
शरमय व०	,,	स ब्रह्मणा	,,
वैमीदक०	,,	यथाप्रकृती०	,,
लोहितोष्णीषा	,,	एतस्यैव वाय०	,,
नवनवदक्षिणा.	,,	एतस्यैव रेव०	,,

मृ० प्र०	पृष्ठाङ्क ।	मृ० प्र०	पृष्ठाङ्क ।
त्रिवृद्वाद्यं	४१७	अन्नाद्य – ह वै	४२१
पञ्चदशोऽग्नि०	,,	त्रिवृदग्निष्टो०	४२३
सप्तदशोऽन्ना०	,,	वै प्रदेव. प०	,,
त्रिणवे नी०	,,	न यूप मि०	,,
पञ्चदशेन वी०	,,	नात्तरवेदि०	,,
अपिवा ज्योति०	,,	परिव्यो पशु	,,
त्रिवृताऽग्निष्टो०	४१८	ततश्चतुर्ष मा०	,,
अनिरुक्त प्रा०	,,	ततश्चतुर्षु मा०	४२६
अश्व. श्वेता	,,	आग्नेय पशु०	,,
बृहस्पतिम०	,,	ततश्चतुर्षु	४२८
ब्रह्मणा ब्रह्म०	,,	सर्वत्राहत	,,
परिस्रजी हो०	,,	पञ्चाशद्व्र०	४२९
अरुणा मिर्मि०	,,	यथर्तुजा वा	,,
बृहस्पते जु०	,,	तस्मात्स्तु०	,,
बार्हस्पत्य. प०	४१९	उपहव्येना०	,,
प्रात. सवने	,,	यथाप्रकृती०	,,
आज्येन साध्य०	,,	ऋतुपेयेना०	४३०
अश्वद्वादश	,,	पदुर्दीक्षा: पदु०	,,
ता वशायामु०	,,	यावदिद प्र०	,,
अपिवाऽष्टौ	,,	उत्तरेणोत्तर०	,,
सतस्रेतस्या:	४२०	नक्तमग्निम०	,,
त्रिवृताऽग्नि०	,,	ऋतमुक्त्वा	,,
समानमितर०	,,	औदुम्बरश्च०	४३१
त्रिवृताऽग्नि०	,,	यथाप्रकृती०	,,
शुनस्कर्णस्ता०	,,	बहुहिरण्येना०	,,
मरणकामो य०	,,	द्वादशमान	,,
याम्य पशु.	,,	एवमत ऊर्ध्व	,,
कृताक्ष दक्षि०	,,	सत्रेषु नाराशंस०	,,
आसैवे स्तुय०	,,	त्रिवृताऽग्निष्टु०	४३२
पृथगरणीष्व०	४२१	पञ्चदशेन०	,,

सू० प्र०	पृष्ठाङ्क	सू० प्र०	पृष्ठाङ्क
सप्तदशाना०	४३२	नपुंसकपशु	४३६
प्रतिधुषा प्रा०	३३	उद्भिद्बलभि०	,,
नीतमिश्रेण	,,	उद्भिदेष्ट्वा	४३७
तीव्रसुतोक्थ्ये०	,,	अन्नेयनाशा	,,
सोमातिपवितं	,,	उभयत्र गाय०	,,
प्रतिधुषा प्रा०	,,	अग्रा पूर्वस्मि०	,,
शृतमाशिर	,,	अपचितिका०	,,
शृतमाशिर०	,,	उभयसामानो	,,
ता दक्षिणा	४३४	पक्षिण्या मासि०	,,
अचित्तमना०	,,	ऋषभेणाग्नि०	४३८
अवनिग्रन्थ्य०	,,	ऋषभो दक्षि०	,,
तावच्छावाक०	,,	गोसवेनोक्थ्य०	,,
ब्रह्मणि होत्रका	,,	अयुतं द०	,,
यजमान ऋत्वि०	,,	दक्षिणनाऽऽहव०	,,
प्राच्यैकादशि०	,,	गोसवेनेष्ट्वा	४३९
यावद्यूप	,,	उपमातरमि०	,,
वडवा श्वेता	,,	यत्र यत्रैन	,,
यथाप्रकृती०	,,	मरुतां स्तोम०	,,
मरुत्स्तोमेन	,,	एतेन ग्रीन्	,,
अथैषोऽग्राट्	४३५	इन्द्रस्तोम०	,,
विराजाऽन्नाद्य०	,,	ऋषभेणाग्नि०	,,
बहु प्रतिगृह्य	,,	इन्द्राग्न्यो कुला०	,,
औपच्छदेन	४३६	तेजो ब्रह्मवर्चस	,,
एकैकया स्तो०	,,	विघनेन विपा०	,,
गन्धर्वाप्सरसो:	,,	सद्यःशेन मा०	,,
गन्धर्वा देवा	,,	त्रयोदशरात्र०	,,
अपध्वस्मन	,,	सर्वस्तोमेन	,,
पुनःस्तोमेन	,,	अप्तोर्यामेण	,,
गोतमचतु०	,,	यस्मात्पशव	४४०
उक्थ्यः षोडशि०	.	एकादशिनाः	,,

मु० प्र०	पृष्ठाङ्क ।	मु० प्र०	पृष्ठाङ्कः ।
नवसप्तदशेन	४४१	अश्वरशना	४४६
त्रिणवता ज्यो०	,,	सहस्र दक्षिणा	,,
गोष्टोमेन श्रा०	,,	ता प्रथमेऽह०	४४७
आयुषा स्वर्ग०	,	प्रथमेऽहनि	,,
अभिजिता प०	,,	गमन न	,,
विश्वजिता श्रा०	,,	यत्तनैका प्र०	,,
त्रिवृता ब्रह्म०	,,	तामुत्तरेणाऽऽ०	,,
पञ्चदशेन	,,	दक्षिणेन वा	४४८
सप्तदशेन	,,	उदीचीमाशी०	,,
एकविंशेन	४४२	पराचीं सह०	,,
त्रिणवप्रभृत०	,,	तामुत्सृज्य	,,
तेषां द्वादशा०	४४३	तामशीत वा	४४९
त्रिणवस्य त्रिण०	,,	द्वौ वेद्वानरौ	,,
त्रिणवस्यान्त०	,,	सा मा स्वर्ग	,,
मध्यम त्रिण०	,	ता प्रतिगृह्णी०	,,
आङ्गिरसेन	,,	तामन्यया गत्वा	,,
तस्य ज्योतिष्टो०	४४४	यास्मिन्स्त्रि०	,,
सर्वस्तोमोऽ०	,,	कृताक्ष पथ०	,,
गायत्र पूर्व०	,,	य अपेयो वि०	४५०
रथन्तरं पृ०	,,	दक्षिणा नय०	,,
वैखानस पृ०	.	यदि यावन्०	,,
हविष्मन्निध०	४४५	शवलि समु०	,,
अमावास्याया	,	नित्य काम्या	,,
कापिवनेन य	,,	वेदत्रिरात्रेण	४५१
तस्य ज्योतिष्टो०	,,	तस्य त्रयस्त्रि०	,,
चैत्ररथेन स०	,,	छन्दोमपवमा०	४५२
तस्य त्रिवृत्प०	,,	अन्तर्वसुना	,
गर्गत्रिरात्रेण	४४६	पराक्रम स्व०	,,
अग्निष्टोम उ०	,,	अश्वश्चतुर्वि०	,,
आग्नावैष्णव०	,,	अग्निष्टोम प्र०	,,

मू० प्र०	पृष्ठाङ्क ।	मू० प्र०	पृष्ठाङ्क ।
उक्थ्यो मध्यमो०	४५५	सरस्वत्या या०	४७३
जामदग्न्येन	४५६	यदा दशशत	,,
पुरोडाशिन्य उ०	,,	यदा शतं स०	,,
वसि स्य स१०	४५७	यदेषा प्रमीयेत	,,
त्रि गामिन्नस्य	,,	ऋतुना पट०	४७६
संवन्सरस्य प०	४५८	पृष्ठ्य षड०	,,
प सहस्र	,,	देवानामुपरि०	,,
वाच प्रवदिता	,,	त्रिवृदग्निष्टो०	,,
त्रिवृदग्निष्टो०	,,	कामुकविन्देन	४७७
वि ाजित्सर्व०	,,	ससर्पाणामु०	,,
अभ्यासङ्ग्येन	४६०	पृष्ठ्य षडह०	,,
य काम काम०	,,	प्राजापत्यस्तु०	४७८
पञ्चशारदीये०	४६१	पृष्ठ्य षडह ०	,,
अनुसंवत्सरं	,,	पृष्ठ्यावलम्बेन०	,,
सप्तदश पूर्वा०	,,	छन्दोमपवमा०	,,
तान्प्रोक्षितान्	,,	जनकः सप्त०	,,
दनगानुत्सु०	,,	तस्य चत्वारि	,,
तत संवत्सर	४६२	अष्टरात्रेण	४७९
तत स ात्सर	,,	त्रयो नवरा०	,,
पञ्चमे वर्षे	,,	पृष्ठ्य षडहो	,,
यस्तः गा स०	४६३	द्विरात्रेन ब्रह्म०	४८०
महाव्रतो स्पर्व०	४६४	शल्कीपिशङ्ग०	,,
सर्वेनामुपेन	,,	चत्वारो दश०	४८१
मा ानाः प००	४७२	दशरात्राय	,,
पृष्ठ्य षडह	,,	भुवन इन्द्र०	,,
वृहद्रथंतर०	,,	त्रिवृदग्निष्टु०	४८२
आ य्यो हवि०	,,	पुरा इतरा	,,
चक्रवर्ती स०	,,	कामुकविन्दो	४८३
उत्क्रान्तव्रु ता	,,	पौण्डरीक ए०	,,
प्राञ्चो यन्ति	४७४	अथाष्टादशप्रश्ने —	

सू० प्र०	पृष्ठाङ्क ।	सू० प्र०	पृष्ठाङ्क ।
द्वादशाहप्र०	४८९	पञ्चवि.शति०	४९३
यानि पृश्न्या०	,,	षड्वि.शति०	,,
उपरिष्टाद०	४८६	सप्तवि.शति०	,,
तथा कुण्डपा०	,,	अष्टावि.शति०	,,
तथा द्वादशा०	,,	एकोनत्रि.श०	,,
उत्तम सत्रा०	,,	त्रि.शद्रात्र०	४९४
ज्योतिरतिरा०	,,	एकत्रि.शद्रात्र	,,
पृष्ठ्य षडह.	,,	द्वात्रि.शद्रा०	,,
त्रयश्छन्दोमा	,,	त्रयस्त्रि.शद्रा०	,,
अतिरात्र	,,	चतुस्त्रि.शद्रा०	,,
द्वौ त्रयोदश०	४८७	पञ्चत्रि.शद्रा०	४९५
य कामं काम०	,,	षट्त्रिशद्रात्र.	,,
अतिरात्र. पू०	,,	सप्तत्रि.शद्रा०	,,
द्वितीय अग्न०	,,	अष्टत्रि.शद्रा०	,,
अतिरात्रौ द्वा०	,,	एकोनचत्वारि०	,,
त्रयश्चतुर्दश०	,,	चत्वारि.शद्रा०	,,
चत्वार पञ्च०	४८८	त्रिवृतिरुक्मा०	४९६
स्त न गच्छ०	,,	द्वितीयोऽग्ने०	.
अमावास्याया प्रा०	,	आङ्गनाभ्यत्र०	४९७
द्वितीय या स्वल्प	,,	एकपद्विरात्रेण	.
मत्त शरात्रम०	४८९	त्वानाः शत०	४९८
अष्टादशरात्र	,	आदित्यानाम०	
एकोनवि.शति०	,,	गवामयनेन	..
वि.शतिरात्रेण	४९०	सर्वेऽभिप्लवा	,
द्वाविक्रवि.श०	,,	अभिजित स्या०	,,
द्वितीयेनाम.	४९१	विश्वजित स्या०	,
द्वावि.शतिरा.	,	[illegible]	४९९
त्रयोवि.शति.	,	छन्दोमा दश०	.
द्वौ चतुर्वि.श०	,,	प्रत्यङ्कडष्टाच०	,,
सत्र चतुर्वि०	४९२	अङ्गिरसाम०	,,

मृ० प्र०	पृष्ठाङ्क।	मृ० प्र०	पृष्ठाङ्क।
आदित्यानाम०	४००	सर्के वदन्ति सहो०	१०४
सर्वेऽभिप्लवा	,,	उलूखलबुध्नो	,,
इतिवानवतो०	१००	नोपरवात्मन०	,,
त्रिवृता साम	,,	न एतमपूर्व्य०	१०५
कुण्डपायिनाम०	१०१	पौर्णमास्या गो०	,,
राजानं क्रीत्वा०	,,	तस्मिन्नस्मिन्नि०	,,
साममग्निहोत्र	,,	न एतमपरस०	,,
साम दर्शपूर्ण०	,,	अमावास्यायामा०	,,
साम वैश्वदेवेन	१०२	सरस्वत्या ट०	,,
सर्वेण यज्ञेन	,,	दृषद्वत्या अप्य०	,,
सर्वे भवन्ति	,,	गवा दशम्	,,
अत्सरुकैश्च०	,,	यदा दशशत	,,
यो होता सोऽ०	,,	तस्यामध्या पु०	,,
तपश्चिनाम०	,,	देवमनुष्येभ्य०	१०६
प्रजापतेर्द्वाश०	,,	द्वितीयेऽतिरा०	,,
य एतदुपयन्ति	१०३	द्वितीयेऽतिरा०	,,
एतदेव नैमि०	,,	आजिष्ठा स०	,,
काप्या वर्षव:	,,	तृतीयेऽतिरा०	,,
स यान्मृगान्	,,	अर्यम्ण पन्था०	,,
नव त्रिवृत	,,	द्वापद्वते स०	,,
एतेन ह वै	,,	संवत्सर इय०	,,
पञ्चविंशति०	,,	संवत्सरे पारि०	,,
अग्ने सहस्र०	१०४	दृषद्वत्या दक्षि०	,,
स्त्रीणि सारस्व०	,,	त्रि प्लक्ष प्रति	१०७
मित्रावरुणयो:	,,	तदेव मनुष्य०	,,
सरस्वत्या उप०	,,	तुरायणेन स०	,,
अमावास्याया प्रा०	,,	परमेष्ठिना	,,
संस्थितेऽतिरा०		आग्नेयोऽष्टा०	,,
तस्मिन्नस्मिन्नि०	,,	दीक्षित क्र०	,,
सा यत्र निपत०	,,	मानुषीमेव	,,

सू० प्र०	पृष्ठाङ्कः ।	सू० प्र०	पृष्ठाङ्कः ।
यत्तपस्तप्य०	५०७	सर्वो दशदशी	५०८
संवत्सरम०	,,	त्रिसंवत्सर	,,
सवनकल्पा	,,	प्रजापते स०	,,
सर्वमन्त्रणा०	,,	य एतदुपयन्त्य०	,,
आदित्यानामि०	,,	विश्वसृजा स०	,,
अतिरात्राद०	,,		

इति सत्याषाढहिरण्यकेशिसूत्रे सप्तदशाष्टादशप्रश्नगतसूत्राणां प्रतीकानि ।

====